## श्री धर्मसूरीश्वर–गुरुस्तुतय:

भक्तौस्तीर्थसमा जिनेन्द्रनिलया यस्योपदेशात् कृता:,
ग्रन्थैस्तात्त्वभरैस्तथा प्रवचनैर्लोके जना निर्वृता: ।
येनाऽहं सततोपकारनिवहै: सिक्त: सदा भास्वरं,
वन्दे तं गुणसागरं गुरुवरं श्री धर्मसूरीश्वरम् ॥

- पूज्याचार्यवर्यश्रीसूर्योदयसूरीश्वरा:
(सुमङ्गलाटीकाभावानुवादादुद्धृता)

दधामि चित्ते गुरुधर्मभक्तिं,
स्मरामि चित्ते गुरुधर्मशक्तिम् ।
सृजामि धर्मस्तवनां च भूरिं,
नमामि नित्यं गुरुधर्मसूरिम् ॥

- पूज्याचार्यवर्यश्रीराजरत्नसूरीश्वरा:

येषां स्थानं विमलजलवन्निर्मलं हन्ति तापम्,
येषां शुभ्रो गुणगणनिधिर्हन्ति दोषोपतापम् ।
येषां ज्ञानं वितरति मुदं पण्डितानां नराणाम्,
तेषां वन्दे चरणयुगलं धर्मसूरीश्वराणाम् ॥

- पूज्याचार्यवर्यश्रीराजरत्नसूरीश्वरा:

Designed & Printed by : JAYANT PRINTERY LLP Mumbai-2. Tel.: 4366 7171

नमामि नित्यं गुरुधर्मसूरिम् - मुनिः अक्षयरत्नविजयः



# नमामि नित्यं गुरुधर्मसूरिम्

मुनिः अक्षयरत्नविजयः

'विद्वत्कुलावतंसैः पूज्यपादाचार्यदेवश्रीसूर्योदयसूरीश्वरैः
सम्पादिता संशोधिता प्रेरिता च युगदिवाकरजन्मशताब्दीग्रन्थमाला'ऽन्तर्गता साहित्यसृष्टिः



# १ धर्मजनन्या : संवेगनिर्झरन्ती प्रेरणा

मृत्युः। जीवनस्यायमेकोऽनिवार्यःसमयखण्डकोऽस्ति। जगत : सर्वे मानवा विदन्ति यद्यो जीवो भवे जीवनमाप्नोति, स नियतं मृत्युमाप्नोति। अनादिकालीनपरम्परामेतां भूतभाविवर्तमानकालेषु कोऽपि परिवर्तयितुं न शक्नोति। तथाऽपि केचिदतिस्नेहपात्राः स्वजना यदाऽन्तवेलां प्राप्नुवन्ति तदा मर्त्याणां लोचनान्यतितमां वर्षन्ति। मनसि संस्थितस्तत्स्वजनानामतिस्नेह ईदृशं कारयति। कदाचित् सन्तापस्येदमेव कारणं हृदि निर्वेदस्य बीजारोपणेऽपि निमित्तीभवति।

अस्मद्दृष्टिपथे संप्रति येषां गुणसिन्धूनां गुरुदेवानां जीवनप्रसङ्गाः क्रमतोऽवतरन्ति, तेषां पूज्यपादारविन्दयुगदिवाकरगुरुवर्याणामन्तर्विरागबीजमपि एतादृश्यैककारुण्यपूर्णया घटनयाऽऽविर्भूतम्। इदमस्ति तन्महत्त्वपूर्णमितिवृत्तम्।

तस्मिन्काले ते गुरुवराः षड्वर्षमात्रवयस्का आसन्। तेषां सांसारिकाभिधानं तदा **'भाईचन्दकुमारः'** इत्यासीत्। वैक्रमाब्दे १९६६ तमे **'हीराचन्दभाई'** इत्याख्यो भाईचन्दकुमारस्य पिताऽकस्माद् व्याधिं प्राप्तवान्। लघीयसि व्याधौ तस्यातर्कितो मृत्युरभवत्। तेषां गृहं स्वजनैर्ग्रामजनैश्चाकीर्णमभूत्। समन्ताद् व्यथानां पर्यश्रूणां च दृश्यानि समुद्भूतानि।

**'छबलबहेन'** इत्याख्यया भाईचन्दकुमारस्याम्बायाः करुणकथा त्ववर्णनीयाऽऽसीत्। तस्या नयनाभ्यामविरत–मश्रुधारा वर्षन्त्याऽऽसीत्। बालो भाईचन्दकुमार एतत्सर्वमाश्चर्यभृतनेत्राभ्यां निरैक्षत।

गेहे प्रसृतामुद्विग्नतां निरीक्ष्य किञ्चिद् दुःखदं जातमिति सोऽनुभूतवान्।किन्तु 'मृत्युर्नाम किं?'इमां वास्तविकतां बालमानसः स नाऽजानीत्। एतत्सर्वं निरीक्ष्य तन्मनसि नैके तर्क–वितर्का उदपद्यन्त। मनसो वितर्का बहिरागन्तुमिच्छन्ति







स्म । स्वजनैः परिवेष्टितां शोकाधीनां जननीं तु किञ्चिदपि प्रष्टुं शक्यं नाऽऽसीत्। ततस्तेन स्वेन सह स्थितो युवा पृष्टः।

पञ्चषाणि प्रश्नोत्तराणि कृतानि । किन्तु पश्चादपि तस्य मनसि सन्तोषो नाऽभूत्। द्वि-त्रिदिनपर्यन्तं गृहे ग्रामजनानां स्वजनानां च गमनागमनं करुणदृश्यानि च सञ्जातानि । तन्मध्ये भाईचन्दकुमारस्य जिज्ञासा बलीयसी सञ्जाता।

अवसरमवलोक्य जिज्ञासुना तेन माता पृष्टा – ''मातः ! अहं जानामि यत् पितरं ग्रामजना बहिर्ग्रामं नीतवन्तः सन्ति। किन्तु ततः स क्व गमिष्यति ? तन्नाऽहं जानामि।''

तीव्रशोकग्रस्ता व्यथिताऽपि माता तस्य प्रकृष्टजिज्ञासां धर्मार्थं वैराग्यार्थं च परिवर्तितवती। प्रीतिस्निग्धया तयाऽतिसुगमभाषया भाईचन्दकुमारः प्रतिबोधितः – ''वत्स! आत्मा यादृशानि कर्माणि कुर्यात्, तादृशं स्थानं प्राप्नुयात् । प्रशस्तकार्याणि (पुण्यकार्याणि) कुर्यात्, तदा वरं सुखदं स्थानं प्राप्नुयात्। अप्रशस्तकार्याणि (पापकार्याणि) कुर्यात् तदाऽप्रशस्तं दुःखदं स्थानं प्राप्नुयात् । तव पिता धर्मं करोति स्म, ततः समीचीनं स्थानं प्राप्स्यति । वयमपि यदि धर्मं कुर्याम, तदैव समीचीनं स्थानं प्राप्नुयाम । यो धर्ममाद्रियेत स सद्गतिं गच्छेत्, अधर्मं (पापं) च समाचरेत् स दुर्गतिं गच्छेत्।''

जनन्या वात्सल्यपूर्ण-संवेगनिर्झरत्प्रेरणया भाईचन्दकुमारस्य बालमानसे धर्मप्रतिष्ठा तदानीमेतादृशी बलीयसी बभूव, यया तस्य समग्रं जीवितं धर्ममयं सञ्जातम्। तस्य नाम-स्थान-कार्येषु सर्वत्र धर्मध्वजोऽनवरतः स्पन्दमान आसीत्।

रे! सम्पूर्णजीवनावलोकनेन किम्? गुरुवराणां त्वेतद् बाल्यजीवनमात्रं वयं पश्यामः, तदापि सूक्तिरियं समागत्य मनोमन्दिरे संतिष्ठेत यथा –

बाला अपि रवेः पादाः, पतन्त्युपरि भूभृताम्।
तेजसा सह जातानां, वयः कुत्रोपयुज्यते।।





संझरागजलबुब्बुओवमे,
जीविए अ जलबिन्दुचंचले ।
जुव्वणे अ णइवेगसंनिभे,
पावजीव ! किमियं न बुज्झसे ?

## नमस्करणीया नम्रता १०

विनयमहिमा श्रामण्ये विशेषः । यत उक्तमार्यैः **'विणओ सव्वगुणाणं मूलं'** इति । विनयेन सर्वे गुणा अवतरन्ति। अत एव सर्वे जिनश्रमणा गुरुसमर्पणं विनयं चोत्कृष्टमाचरन्तो दृश्यन्ते । गुरुवरा अपि एतेषु नितरामन्यतमा आसन् ।

वैक्रमीयमष्टाधिकद्विसहस्रीये चतुर्मासे नववर्षस्यारम्भदिनम् । पूज्यपादयुगदिवाकरगुरुवराणां चातुर्मासिकी स्थिरता तदानीं वटपद्रनगरे (वडोदरा–कोठीपोळमध्ये) आसीत् । तस्मिन् दिने तत्रभवद्भिः समीपस्थे छाणीनगरमध्ये चतुर्मासं विराजमानस्वकीयपूज्यपादगुरुवरान् प्रति लिखितं गुर्जरभाषीयं पत्रं गुरुवराणां स्वभावसिद्धं विनयं दर्शयति। यस्मिन् मननीयान्येतानि वचनानि लिखितानि आसन् –

**'अनन्तलब्धिनिधानाय श्रीगौतमस्वामिसर्वज्ञाय नमः**

**परमकारुणिक–प्रातःस्मरणीय–पूज्यप्रवर–आचार्यदेव–१००८ श्रीमद्विजयमोहनसूरीश्वरपरमगुरुवरेभ्यो नमः।**

**पूज्यपाद–परमकृपालु–प्रातःस्मरणीय–गुरुवराणामाचार्यभगवतां**

**१००८ श्रीमद्विजयप्रतापसूरीश्वराणां पर्युपासनायाम्...**

**भवतामाज्ञापर–बालकिङ्कराणां सविनयं वन्दनावलिः ।**

**अभिनववर्षीये श्रेयसि प्रभातेऽस्मदीया वन्दनावलिरुररीकर्तव्येति प्रार्थये । सेवकोपरि भवतां निःसीमा कृपादृष्टिर्वर्धताम्, यस्याः प्रभावाद् वयं सने भवद्बाला रत्नत्रय्या आराधनायामनारतमेधेमहि।**







अद्य प्रात: सूरिमन्त्रादिजप–देववन्दन–नवस्मरण–गौतम–रासादीन् यथाविधि कृत्वा, भवत: सान्त:करणं वन्दित्वा प्रत्याख्यानं कृतमस्ति।

–भवतां चरणकिङ्करस्य वन्दना नैकश: पठितव्या...'

अनुतृतीयपदारोहणं, संयमजीवनस्य त्रयस्त्रिंशत्तमे वर्षे पत्रमिदं लिखितमासीदिति ध्यातव्यम्। प्रौढावस्थायामपि गुरुवराणां प्रत्येक – प्रवृत्तिषु विनयदर्शनं सहजं भवति स्म।

यदा यदा निजगुरुवरै:सह वार्तालापादयोऽवसरा: समुपतिष्ठन्ते स्म, तदा तदा युगदिवाकरगुरुवरा: स्थिता एव नतशीर्षेण संवादं कुर्वन्ति स्म।

गुरुवराणां समक्षमन्तरेण प्रसङ्गविशेषमुपवेशनं तैर्भूयसा नोचितं मतम्। यदि वाऽस्यां विनयशीलतायां तेषां हृद्गतमेतादृशमेव सम्भाव्यते यच्चतुर्ज्ञानधारिण: ५०,००० शिष्याणां च गुरव: श्रीगौतमस्वामिन: स्वगुरुवराणामुत्कृष्टं विनयं निर्वहन्ति स्म, तर्हि वयमपि अस्माकं गुरुवराणां यथाशक्यमुत्कृष्टं विनयं कथं न निर्वहेम?

गुरुवराणामेषां श्रामण्यस्याल्पपर्याय एव विनयादिसद्गुणान् ज्ञात्वा गुरुवरै: श्रीमत्प्रतापसूरीश्वरै: वैक्रमीये १९८१ तमे वर्षे स्वसम्पादितोप–देशपदाख्यमहाग्रन्थस्यामुखे युगदिवाकरगुरुवरेभ्य इमे शब्दा आलिखिता: सन्ति, तथाहि– ''नैसर्गिककुलजविनय–वैयावृत्त्यादिसद्गुणभाक्–प्रकर्षप्रज्ञ–स्वीकृतलघुवय:प्रव्रज्य–व्याकरणसाहित्य–सिद्धान्तावगाहक–मुनिश्रीधर्मविजयस्य...''
पूज्यगुरुवराणां गुणवैभवो विनयवैभवश्च तदानीमपि गुरुजनहृदयमन्दिरे कीदृश: प्रतिष्ठित आसीदिति द्योतकानीमानि पदानि सन्ति।

समाप्तौ धर्मरत्नप्राकरणिकं विनयस्तुतिपरं श्लोकं स्मरेम।

गुरुपयसेवानिरओ, गुरुगुणआराहणम्मि तल्लिच्छो।
चरणभरधरणसत्तो, होई जई नन्नहा नियमा॥'

अर्थाद् गुरूणां चरणपर्युपासनायां गुरुभक्त्यां निरत:, गुरुगुणाराधनायां लग्नचित्त:, चारित्राराधनायां च सत्त्वशील एवाऽऽत्मा श्रामण्यं प्राप्तुमर्हति। अन्यथा निश्चयत: श्रामण्यप्राप्तिर्न भवतीति।





गुरुकृपा हि केवलं,
परं शिष्यस्य मङ्गलम्।

## जननी जन्मभूमिश्च, स्वर्गादपि गरीयसी ११

**'दुष्प्रतीकारौ माता,-पितरौ स्वामी गुरुश्च लोकेस्मिन्'** इति श्लोकपङ्क्त्या प्रशमरतिग्रन्थकारका भगवन्तः श्रीउमास्वातयो निर्दिशन्ति 'विश्वेऽस्मिँस्त्रयाणामुपकारो दुष्प्रतीकार्यः। (1) जन्मदातृपित्रोरुपकारः (2) अर्थदातृस्वामिन उपकारः (3) धर्मदातृगुरोरुपकारश्चे' ति।

बहुकष्टेन प्रत्युपकार्य उपकारो दुष्प्रतीकार्यः कथ्यते। इह प्रधानतः पित्रोरुपकारं विचिन्तयामः। पूजनीयेषु 45 आगमग्रन्थेषु अन्यतमश्रीस्थानाङ्गसूत्रेष्वपि एवमेवोक्तम्, अनन्तरं च प्रत्युपकारमार्गोऽपि दर्शितोऽस्ति तथाहि - 'पित्रोर्भक्तिधारकसन्तानः पित्रोर्दुष्प्रतीकार्योपकारार्णाद् द्विधा मुक्तिं प्राप्तुमर्हति।

(1) पितरौ जराऽवस्थायामधिकमधिकमुपास्य, तयोर्धर्मकार्येषु अधिकमधिकं साहाय्यं कृत्वा, तीर्थार्चनाञ्च कारयित्वा स मातुः पितुश्चार्णादांशिकमुक्तिमाप्नुयात्।

(2) यदि च स स्वयं श्रामण्यमङ्गीकृत्य स्वपित्रोरपि धर्मबोधं दद्यात् प्रव्रज्यां च प्रदाय तयोरात्मकल्याणं कुर्यात्तर्हि स ऋणात् सर्वांशेन मुक्तिमुपलभेत' इति। निःसंशयम्, ऋणमुक्तिं सर्वांशेन लभते सा सन्ततिः सर्वाभ्य उत्तमैव स्याद्।

प्रकृत्यैव दर्शनीयाः पूज्यपादयुगदिवाकरगुरुवरा अपि आसन्नेतादृशस्योत्तमपुत्रत्वस्य प्रापका गुरुवराः। अतः स्वदीक्षाजीवनस्य तृतीये वर्षे चतुर्मासे तत्रभवतां सांसारिकमाता सुखशातापृच्छार्थं राजनगरमुपगता तदानीं गुरुवरैस्तस्या अभ्यन्तरजीवने दृष्टिपातः कृतः। सदुपदेशेन माता प्रव्रज्याग्रहणार्थमुल्लसिता कृता। फलतः, वैक्रमाब्दे







१९८० तमे गुरुवरैः स्वजननी **'साध्वीश्रीकुशलश्रीजी'** इति रूपेण प्रव्राजिता। नैतावद्, वाचनाशास्त्रा-भ्यासेत्यादिभिस्तत्संयमजीवनं साधनामण्डित-मपि कृतम्। एवं सा श्रामण्ये कुशलाऽपि कृता। मातृश्रमण्याः कायेऽन्तिमवर्षेषु 'पक्षाघात' इति व्याधिरापतितवान्। तदानीं गुरुवरा तस्याः स्वोपकारिण्याः समाधिप्रदानाय निरन्तरं वर्षत्रयीं यावत् पादलिप्तपुरे चतुर्मासानकुर्वन्। नित्य-शिक्षाऽऽराधनाप्रेरकस्तोत्राणि शास्त्रवचनानि श्रावयित्वा तस्याः समाधिं प्रापयन्। वैयावृत्त्ये च तत्सहवर्तिश्रमणीवृन्दस्य प्रोत्साहनं दत्तवन्तः।

संस्कृतसूक्त्यां सत्यं प्रोच्चरितम्-**'जननी जन्मभूमिश्च, स्वर्गादपि गरीयसी'** इति। जन्मदात्र्या मातुर्जन्मस्थानस्य च महतामुपकाराणां यथार्थज्ञाता हृदयेनाङ्गीकर्ता जनः कदाऽपि तयोरुपकारविस्मरणं न कुर्यात्। लब्धाऽवसरः सोऽन्तःकरण ऋणशोधनभावमपि धत्ते। गुरुवरा अपि उक्तलक्षणा आसन्। गुरुवराणां जीवनं दृष्ट्वा नूनं प्रतिभाति, जाने तेषां जीवनं 'जगद्माता गुरुमाता जन्मदात्री माता' इति मातृत्रय्याः समर्पितमासीत्।





स कृतज्ञः पुमाँल्लोके,
स धर्म-गुरुपूजकः।
स शुद्धधर्मभाक् चैव,
य एतौ प्रतिपद्यते।।

## समुज्ज्वलकार्यसन्ततेमङ्गलाचरणम् १२

पूज्यपादगुरवराः स्वीयजन्मभूमिवढवाणग्रामे समागताः। स्वग्रामीयमहादीप्तिमतस्तारकस्य स्वागताय वढवाणसङ्घोऽतीवातुरो बभूव।

वैक्रमीये १९९८ तमे वर्षे प्रवृत्त एष प्रसङ्गः। ग्रीष्मदिनानि प्रवर्तमानान्यासन्। वृत्तमेवं घटितम्-पूज्यपादगुरुदेवानां स्थैर्यं तेषां परमगुरुदेवैः पूज्यचरणाब्जश्रीमद्विजयमोहनसूरीश्वरैः सह तीर्थाधिराजश्रीशत्रुञ्जयगिरेरङ्के पादलिप्तपुरनगर आसीत्, तन्मध्ये वढवाणसङ्घीया अग्रेसरा पादलिप्तपुरमागताः। वढवाणनगरे च गुरूणां चतुर्मासाय तैः परमगुरवोऽतिविज्ञप्ताः। गुरुवरैः तेषामनुनयोऽनङ्गीकृतः, अतस्तैर्दश दिनानि यावद् गुरुस्थिरतालाभोऽतिशयानुनयपूर्वं याचितः।

परमगुरुदेवैरूरीकृता सङ्घभावना, तदनन्तरं यदा राजकोटनगरं प्रति परमगुरुवराणां विहार आरब्धः, तदा वढवाणनगरे दश दिनानि यावत् स्थैर्यार्थं पूज्यगुरवोऽनुशिष्टाः। परमगुर्वाज्ञां शिरसा स्वीकृत्य तत्रभवन्तः स्वजन्मभूमिं समागच्छन् । सङ्घेन सोत्साहं गुरुदेवस्वागतं कृतम्। पश्चात्तु जलधरचातकवच्छशधरचकोरवच्चाऽन्वहं गुरुदेवप्रवचनानि श्रुत्वा सङ्घसमुल्लासो विस्तीर्णो निःसीमो जातः। फलतः 'अथ विहारो नाऽस्ति शक्यः.... इदं चतुर्मासं त्वत्रैव कर्तव्यम्....' इति भावना प्रार्थना च प्रबला प्रसृता। गुरुवरास्तु तदानीमतिमुग्धाः। इतः सङ्घाग्रण्यः स्वयं परमगुरुदेवसमीपं गतवन्तः। ते वढवाणग्रामसङ्घस्य भावनां प्रदर्शितवन्तः, चतुर्मासाय चाऽऽज्ञापत्रं याचितवन्तः। सङ्घस्य विज्ञप्तिं स्वीकृत्य परमगुरुवरैरपि आज्ञापत्रं प्रदत्तम्।

संयमजीवनस्य 22 वर्षीयगुरुकुलवासाऽनन्तरं गुरुवराणां सर्वप्रथमोऽयं स्वायत्तचतुर्मासयोगः। तत्रभवन्त एकलव्य इव गुरुकृपाया अवलम्बनेन तच्चतुर्मासं जन्मधरायां कृतवन्तः। भगवतीसूत्रमहागमानुगतैस्तत्रभवतां







प्रौढविदुषामर्हैस्तात्त्विकैः प्रवचनैस्तु जनमानसं शब्दशो मन्त्रमुग्धं सञ्जातम्। विविधतपश्चर्या- प्रवचनाऽनुष्ठानादिभिश्चत्वारो मासा आराधनामया जाताः।

चतुर्मासावसाने पूज्यपादगुरुवराणां पवित्रप्रेरणया सङ्घस्यश्री-शान्तिनाथपरमात्मनो महाजिनालयस्य नवनिर्माणं निर्णीतम्। एतस्मै कार्याय वढवाणनगरीया दातारो गुरुदेवैः प्रेरिताः। त्वरितं जिनालयनिर्माणार्थं लक्षरूप्यकमितं दानं पुण्यवद्भिर्दातृभिरुद्घोषितम्।

आङ्ग्लभाषीयस्याभाणकस्य स्मरणं भवत्यत्र - 'Well begun is half done' इति।

भावार्थोऽयं यद् - कार्यस्य शुभ आरम्भः, कार्यार्धं सम्पन्नमिति ज्ञेयम्। गुरुवराणां शासनकार्यरतं रम्यं जीवनं ज्ञात्वाऽहमस्मिन्नाभाणके मनाक् परिवर्तनाय लालसोऽस्मि - 'Well begun is full done' इति।

तस्य भावार्थोऽयम् - महापुरुषा यदि शुभमारभन्ते तर्हि तत्कार्यमर्धपूर्णं न, नवरं पूर्णमेव भवति। अत्राऽपि एवमेव सञ्जातम्। एतज्जिनालयनिर्माण-सम्बन्धिनी सर्वा व्यवस्था तस्मिन्नेव चतुर्मासे पूज्यगुरुवरप्रेरणया सम्पन्ना।

पूज्यपादगुरुवराणां समुज्ज्वलशासनकार्यपरम्परया इदमासीन्मङ्गलाचरणम्। अत्रैकस्याः संस्कृतसूक्तेः स्मरणं भवति- 'स्त्रीणां चरितं पुरुषस्य भाग्यं, देवो न जानाति कुतो मनुष्यः ?' इति।

जन्मभूमिमध्ये समुज्ज्वलकार्यसन्ततेर्मङ्गलाचरणकर्तृगुरुवराणां मनसि तस्मिन् समये कल्पनाऽपि नाऽऽसीद् यदतःपरमेतादृशानां जिनालयनवनिर्माण-प्रतिष्ठादिनैकविधशासनप्रभावकधर्मकार्याणां परम्पराऽविरता भविष्यतीति।





साधूनां दर्शनं पुण्यम्,
तीर्थभूता हि साधवः।
तीर्थं फलति कालेन,
सद्यः साधुसमागमः।।

## सम्पत्तौ च विपत्तौ च महतामेकरूपता १३

गुरुवराः कच्छप्रदेशीय-विहारयात्रायां स्थिता आसन्। दिनस्योत्तरार्धः प्रवर्तमान आसीत्। समयश्चासीदनुमानतश्चतुर्वादनवेलायाः। मोथाराग्रामात् सणोसराग्रामं प्रति श्रमणा विहृतवन्तः। प्रत्यहं सुदीर्घविहारयात्रा भवति स्म। विहारयात्रायां गुरुवरास्तेषां च प्रतिच्छायावत् *बालमुमुक्षुसेवन्तीकुमारः प्रायेण नित्यं सर्वेभ्यो मुनिभ्यः पश्चात् पौषधशालाया निर्गच्छन्ति स्म त्वरया च विहृत्य सर्वेभ्यः प्राग् गन्तव्यं ग्रामं प्रपद्यन्ते स्म।

नित्यक्रममनुगता गुरुवरा मोथाराग्रामादपि अनुसर्वं विहृतवन्तः। असौ बालमुमुक्षुरपि प्रासुकजलभृतां लघ्वीं घटिकां गृहीत्वा गुरुणा सह विहृतवान्। ग्रामाद् बहिः पथद्वयी दृष्टा। तदानीं तत्र काचित् स्त्री कूपाज्जलभृतं घटं गृहीत्वा ग्रामं प्रति व्यावर्तमानाऽऽसीत्। परिधानेन सा यवनिका भासते स्म। गुरुवरैः सा मार्गार्थं पृष्टा, तदा कुटिला सा महिला विरुद्धं मार्गमदर्शयत्। अनभिज्ञाः सरलमतयो गुरुवरास्तु तं मार्गं सम्यगवबुध्य विहृतवन्तः।

सार्द्धत्रय'किलोमीटर'मितविहारो गुरुवरैस्तस्मिन् कण्टकबहुले पथि कृतः। पश्चात् कोऽपि पन्था एव नाऽदृश्यत। केवलाः कण्टकाः शुष्कगुल्माः पर्वतीयसीमान्तप्रदेशाश्चाऽवगम्यन्ते स्म। अपथप्रपन्नैर्गुरुवरैरपि 'तया वनितया मिथ्यावर्त्म दर्शितमि'ति शङ्कितम्।

---

*न केवलं कच्छीयायामेतस्यां विहारयात्रायामेव, किन्तु तदनु यावज्जीवनं गुरुवराणामन्तेवासी स बालमुमुक्षुर्नाम पूज्यपादपरमशासनप्रभावका व्याकरण-साहित्य-न्यायतीर्थाचार्यप्रवराः श्रीमद्विजयसूर्योदयसूरीश्वराः, मदीया विद्वत्प्रवरा वात्सल्यवारिधिपरमगुरुवराः।







अत्रान्तरे दूरस्थः कच्छीयः कश्चित् कृषीवलो दृष्टः। गुरुवरानुपसृत्य स उक्तवान्- ''मान्याः! भवद्भिः क्व गन्तव्यम्? अत्र तु नास्ति कोऽपि मार्गः।''

''सणोसराग्रामं प्रति अस्माभिर्गन्तव्यम्'' - गुरुवरैरुक्तम्।

''तदर्थं मोथाराग्रामपर्यन्तं प्रत्यावर्तनीयम्, ततो द्वितीयमार्गेण अग्रे गन्तव्यं तदैव सणोसराग्रामं प्राप्स्यन्ति भवन्तः।'' इदं श्रुत्वा कश्चिदन्यो व्यथा-चिन्ताविह्वल एव स्यात्, गुरुवरास्तु नितरां मुक्तव्यथा एव आसन्। चित्तशमः सकृत्तु भग्नःस्यात्तादृशी आसीत् सा घटना। तथाऽपि क्षमाशीला गुरुवरा ईषदपि नाऽक्रुध्यन्त। वेगेनाऽऽरब्धविहारास्ते मुमुक्षुबालेन सह मोथाराग्रामं प्रत्यागतवन्तस्तदानीं 'सप्तकिलोमीटर'मिता निरर्थका कर्मनिर्जरादृष्ट्या तु सार्थका विहारयात्रा सम्पन्ना जाता। अद्यापि सणोसराग्रामं प्रति अष्ट 'किलोमीटर'मितो विहारोऽवशिष्ट आसीत्। किञ्च तत्र गमनमपरिहार्यमासीत्। यतस्तेषां गुरुवराः पूज्यपादाचार्यदेवश्रीमत्प्रतापसूरीश्वरा अन्ये च मुनिवरास्तं ग्राममासादितवन्त आसन्।

इतश्च यथोचितसमयातिक्रमे सति सणोसराग्रामे पूज्याचार्यदेवश्रीप्रतापसूरीश्वराणां मनसि संशयो जातः 'धर्मविजयगणिवराः प्रत्येकविहारयात्रासु प्रथममागच्छन्ति, परमद्याधुनाऽपि कथं नाऽऽगताः?' शैशिरिकं दिनं झटित्यस्तङ्गतम्। अस्तङ्गतेऽपि भानौ पूज्यवरा नाऽऽगताः। ततश्चिन्तितैः प्रतापसूरिगुरुवरैः सणोसराग्रामस्य श्रमणोपासकानाहूय सर्वं वृत्तं कथितम्। अतः केचन श्रावका अश्वावरोहीभूय त्रिचतुरैर्जानपदीयैः सार्धं यष्टिदीपादिसाधनं गृहीत्वा मार्गे गुरुवरसन्मुखमगच्छन्। मध्येपथमेव गुरुवरा मिलिताः। पूज्यवरा तैः सह बहुविलम्बेण सणोसराग्रामं प्राप्तवन्तः। तान् दृष्टवैव तेषां चिन्तातुरा गुरुवराः स्वस्थाः सञ्जाताः। गुरुवरा आगत्य यदा स्वगुरुवरचरणौ प्राणमंस्तदा पूज्यप्रतापसूरीश्वराणां नेत्राम्बुजे प्रमोदेन प्रफुल्ले जाते।

कयाचिदज्ञया विरुद्धो मार्गो दर्शितः, तथापि गुरुवरा उपशान्तचित्ता एवाऽऽसन्। एतदर्थं मनागपि चित्तविषादोऽपि गुरुवरैर्न प्रदर्शितः 'अद्य कष्टं बहु जातम्, श्रान्तोऽस्मि' वेत्यपि न। अपि तु कथितम्-'अद्य कर्मनिर्जराकर्त्री नियतिरस्ती'ति। कीदृशमद्भुतं चिन्तनम्? इदं चिन्तनमेकं सुभाषितं स्मार्यते-

'उदेति सविता ताम्रस्ताम्र एवास्तमेति च।
सम्पत्तौ च विपत्तौ च, महतामेकरूपता।।'





**समयाए समणो होइ,**
**बंभचेरेण बंभणो।**
**नाणेण उ मुणी होइ,**
**तवेण होइ तावसो।**





## शिष्याणां जीवनशिल्पिनः १४

गुर्जरधरायां राजनगरम्। सहस्राधिकजैनधर्मानुयायिनां निवासेन जैननगरमिव तद् धन्यनगरमासीत्। वि.सं. २००१ वर्षे पूज्यपादारविन्दयुगदिवाकरगुरुदेवस्थैर्यं नागजीभूधरपोळजैनप्रतिश्रय आसीत्। स्थैर्यान्तरे दर्भावती (डभोई) नगरीय एको मुमुक्षुर्बालकुमारः पूज्यवरनिश्रायां संयमशिक्षां गृह्णाति स्म । गुरुवरैस्तत्कृते प्रातःकाले कल्यवर्तात् प्राक् पञ्चगाथाकण्ठस्थीकरणनियमो निर्धारितः। मेधाविबालकुमारेण नियमो यथावदाचर्यमाण आसीत् । आदौ पञ्चगाथाः, पश्चादेव प्रातराश इति दैनिक उपक्रम आरब्धः।

परं, एकदाऽनवधानता स्थानं जग्राह। क्रीडावृत्तिवशीभूतेन मुमुक्षुबालकुमारेण तस्मिन्नह्नि पञ्चगाथा न कृताः। बहुः समयो गतः । किन्तु गाथा न जाताः । अन्यतश्च 'अये ! बहुतरः कालो व्यतीतः। अथ झटिति कल्यवर्तं यच्छ' इति भाटकध्वनिर्जठराच्च श्रूयते स्म। अतो बालमुमुक्षुरक्षमो जातः। स युगदिवाकरगुरुवरानुपसर्प्य प्रातराशायानुमतिं ययाच।

गुरुवरैः प्रत्युक्तम् – ''कथं भोः ! अद्य तु त्वयैकाऽपि गाथा न प्रदत्ता। गाथा अकृत्वैव कल्यवर्तं चिकीर्षुरसि किम् ?''

गुरुवरस्य वज्रध्वनिं श्रुत्वा बालमुमुक्षुर्भीतवान्। भयाच्च कम्पमानेन स्वरेण प्रार्थितवान् – ''गुरुदेव ! अद्य कथमपि गाथास्मरणं न भवति। क्षुधातुरोऽपि जातोऽस्मि। ततः कल्यवर्तं कृत्वा गाथाः करिष्यामि।''

इदं श्रुत्वा गुरुवरा नेत्रे किञ्चिद् रक्ते कृत्वोक्तवन्तः– ''न, यावत्कालं गाथा न भवन्ति, तावत्कालं प्रातराशोऽपि न स्यात्। प्रथमं गाथाः कर्तव्याः।''

भीरुर्बालो गाथाः कर्तुमुपविष्टवान् । यद्यपि अद्य प्रक्रमे क्रीडावृत्तिवशात् पश्चाच्च गुरुवरादुपालम्भश्रवणात् स विचलितचित्त आसीत्। अतस्तेन केनाऽपि प्रयत्नेनाऽध्ययने लीनता न प्राप्ता।







प्रत्यहं घटिकाद्वयेन भवन्त्यो गाथाः, अद्य चतुर्घटिकायां व्यतीतायामपि न जाताः। प्रवचनसमयः सञ्जातः। म्लानवदनो बालमुमुक्षुः पूज्यपादाब्जसिद्धान्तनिष्ठाचार्यदेवश्रीमत्प्रतापसूरीश्वराणां प्रकोष्ठेऽभ्यासं करोति स्म । पूज्यपादयुगदिवाकरगुरुवरास्तत्र सिद्धान्तनिष्ठगुरुवरसमीपं प्रवचनाऽनुज्ञाग्रहणार्थमागताः। संवादमध्ये तत्रभवद्भिः सङ्केतेन सिद्धान्तनिष्ठगुरुवरेभ्यः किञ्चित् कथितं पश्चाच्च प्रवचनार्थं गताः।

युगदिवाकरगुरुवरा प्रवचनमण्डपं प्रत्यचलन्। एवं दृष्ट्वा बालकुमारेण चिन्तितम् – 'अद्य तु नूनमेकादशवादनात् पूर्वं प्रातराशो न भविष्यती'ति । यद्यपि, गुरुदेवकृते तन्मनसि अपारबहुमानभाव आसीत् । किन्तु, उदरं वह्निमत् स्यात्तर्हि स किं कुर्यात् ? तन्मुखमधिकं म्लानमभूत्। तत्रान्तरे पूज्यप्रतापसूरीश्वरैः स आकारितः, शिरसि च करकमलं निधाय मधुरेण स्वरेणोक्तम् – ''गाथा न भवन्ति अद्य ? क्षुधया पीड्यते नु ? गच्छ, अहमनुजानामि त्वाम् । झटिति कल्यवर्तं कृत्वाऽऽगच्छ, पश्चाच्च सावशेषा गाथाः कर्तव्याः । अतःपरमेतादृशः प्रमादो न कर्तव्यः। कस्मैचिदपीयं वार्ता न ज्ञापनीयेति सावधानेन भवितव्यम् ।''

बालमुमुक्षुरुल्लासेन सञ्चरितवान् । स कल्यवर्तं कृत्वा शीघ्रं धावन् प्रत्यगात् । पश्चादुत्साहशीलः स पञ्चैव न, प्रत्युत दश गाथाः कृतवान् । युगदिवाकरगुरुवराः प्रवचनं समाप्य प्रत्यागच्छँस्तदानीं दशगाथा अशृण्वन् । गुरुवराणां च वात्सल्यप्रवाहे प्रातरनुभूतानि कोपवचनानि क्व गतानि तज्ज्ञातमपि न। आस्ताम्, एतदपि न ज्ञातं तेन यत् पूज्यवराः प्रतापसूरीश्वरा अपि अमीभिर्गुरुवरैरेव सङ्केतेन कथिता आसन् – 'मद्गमनपश्चादयं प्रातराशाय प्रेषणीयः' इति। यतो बहिर्नालिकेरा इव कर्कशाः, परमन्तस्तु मधुराः कोमलहृदयास्ते गुरुवरा आसन् । विनेयानामात्महितचिन्तका आसन् ।

कुशलः शिल्पी निर्व्यापारमपि पाषाणं टङ्कनक्रियया पूजनीयं प्रतिमारूपं निर्मिमीते । तथा वरीयसो गुरोरपीदृशी विशेषता भवति। स शिष्यानाश्रिताँश्च सुष्ठु घटयति, तानुत्तममार्गगान् करोति । गुरुवरा अस्या विशेषताया धारका अपि आसन्।

अतस्ते गुरुवरा अल्पसमयान्तस्तस्मै मुमुक्षुबालाय चारित्रं प्रदाय तं पूज्यमुनिश्रीसूर्योदयविजयरूपेण विशिष्टशासनप्रभावकताधारकं व्याकरण–साहित्य–न्यायसदृशविविधविद्याक्षेत्राणां च व्युत्पन्नं विद्वांसं शिष्यमसृजन्।

एवमन्येऽपि एतादृशा नैके शिष्या गुरुवरैः सज्जीकृता आसन्। कश्चित् साहित्यकलाकोविद आसीत्, कश्चिच्छतावधानी आसीत्, कश्चिद् विशदवक्ताऽऽसीत्। सरलशब्देषु कथयितव्यं यद् गुरुवरा आसन् शिष्याणां जीवनशिल्पिन इति।




सन्तप्तायसि संस्थितस्य पयसो, नामापि न ज्ञायते,
मुक्ताकारतया तदेव नलिनी,-पत्रस्थितं राजते ।
स्वातौ सागरशुक्तिसम्पुटगतं, तज्जायते मौक्तिकं,
प्रायेणाधममध्यमोत्तमगुणः, संवासतो जायते ॥-

## विरलमाचार्यपदार्पणम् १५

आचार्यपदः। जिनशासनस्यायं सर्वोत्तमो पदः। नवपदमण्डलस्य नमस्करणीस्तृतीयपदः। यस्मिन् महात्मनि प्रभावकताऽऽराधकता-नम्रता-गीतार्थता - विद्वत्तादीनां नैकेषां गुणानां समन्वयो भवति स एतत्पदार्हो भवति। गुरुवरेष्वपि एतेषां सद्गुणानां समन्वयोऽभूत्, तदा तेषां चारित्रपर्याय एकत्रिंशद्वर्षमित आसीत्। स्व-परसमुदायिका गुरुवरा अपि एतदर्थमाग्रहं कुर्वन्ति स्म। परं, गुरुवरा निःस्पृहा नम्राश्चाऽऽसन्। ते नम्रतयाऽस्वीकारं कुर्वन्ति स्म।

अन्तत एतदर्थं महतां गुरूणामाज्ञा अभवत्। अतः गुरुदेवपार्श्वे कश्चनोऽपि विकल्पो नाऽवशिष्टः। तैः परमगुरूणामाज्ञाऽङ्गीकृता।

एकप्रभावक-जनप्रियगुरुवरेभ्यः परमोच्चपदसमर्पणस्य महान् प्रसङ्गो नितरामद्भुतो जातः। तद्वर्णनं वर्णतूलिकया कथं भवेत्? भायखलामध्ये वैक्रमीये २००७ तमे वर्षे गुरुवराणामाचार्यपदारोहणप्रसङ्ग उपधानतपःसाधनायाः ७०० तपस्विभ्यः ४३० तपस्विनां मोक्षमालारोपणमपि आसीत्। इत्येतयोर्महामहोत्सवविषये विद्वद्वर्यश्रीधीरजलाल-टोकरशीशाहवर्येण स्वप्रकाशित 'नवतत्त्वदीपिका' ग्रन्थे ज्ञापितमेवम् "आचार्यपदार्पणप्रसङ्गास्तु बहुशो भवन्ति। परमयं प्रसङ्गस्तेषु विशेष आसीत्। उच्चैस्तरामुल्लासस्य 50 सहस्राणि यावज्जनानां च दृश्यं विरलम्। एतदनु तत्रभवन्त आचार्यश्रीमद्विजयधर्मसूरिरूपेण विश्रुता जाताः। अद्य तु नामेदं बह्वीं लोकप्रियतां प्राप्य सहस्रेषु लक्षेषु ओष्ठेषु समारूढं दृश्यते।"

ईदृश आसीत् स भव्यः प्रसङ्गः। वयं तस्यैकां झल्लिकां पश्यामः।







पूज्यगुरुवरसदृशा महोपकारिणः शासनस्तम्भसमाः पुण्यपुरुषा आचार्यपदमारोहन्ति स्म। अतस्तन्मङ्गलं दृश्यं निरीक्षितुं मुम्बईपत्तनस्य कोणात् कोणात् मानवा भायखलानगरं प्रत्यवहन्। भाटकयानचालका अन्ये चाऽपि चिन्तितवन्तः - 'नूनमद्य भायखलामध्ये जैनानां कोऽपि विरलः प्रसङ्गः प्रवर्तमानोऽस्ती'ति।

चतुश्चक्रयानैः'ट्राम-बस' इत्यादिनामकैः राज्ययानैश्च जनसमूहस्तत्र प्रवृद्धः, इतो धनिकजैनवर्गः 'कार' इति यानैः प्रवृद्धः। फलतो यत्र पदक्रियाविधिर्भवति स्म, तत्राऽतिविशाले मण्डपे पादन्यासार्थमपि स्थानं नाऽवशिष्टम्। सर्वत्र जना एव दृश्यन्ते स्म।

समग्रेऽपि भायखलामोतीशासङ्कुले लवलेनमार्गे भायखलासेतु-पर्यन्तस्थानेऽपि पदमात्रमपि स्थापितुं स्थानं दुर्लभं जातम्। एवमनुभूयते स्म - जाने मुम्बईपत्तनस्य तीरे जलसमुद्रस्तरङ्गायते, भायखलामध्ये जनसमुद्रस्तरङ्गायत इति। स्वयंसेवकवर्गोऽपि व्यामूढोऽभवत्। अत्रान्तरे किञ्चिद् विलम्बेन मुम्बापुर्या महाँल्लब्धप्रतिष्ठो दानवीरः श्रेष्ठिवर्यो माणेकलाल-चुनीलालः (जे.पी.) 'कार'यानेन वेगाद् भायखलासेतोः समीपमागतवान्। तत्रत्यां स्थितिं दृष्ट्वा स चिन्ताकूपे पतितवान् 'अथाऽतो गुरोः पार्श्वे गमनं सर्वथाऽशक्यम्। गुरुवरेभ्यः समर्पणायाऽऽनीतं कम्बलं मत्करतलेऽस्ति । परमिदानीं किं कर्तव्यम्?' इति।

अन्ततस्तद् वस्त्रं तेन च सह 'माणेकलाल चुनीलाल तरफथी सादर समर्पण' इति लिखितं पत्रखण्डं स लोकहस्तैरग्रेऽग्रे प्रेषितवान्। अनुमानतोऽर्द्धघटिकाप्रवासेन स वस्त्रखण्डो गुरुवरकरकमलं प्राप्तवान्। परं माणेकलालसदृशेन धुरन्धरश्रेष्ठिवर्येण गुरुवरदर्शनं नैव लब्धम्।

यद्यपि प्रसङ्गस्यैतस्य दर्शकास्तु प्रसङ्गस्येदं मानसचित्रं नितरामल्पमनुभविष्यन्ति। ईदृशस्य महतः प्रसङ्गस्य यथाप्रवृत्तं विश्लेषणं मया कथं कर्तुं शक्येत? अहं त्वत्रेदं गुर्जरस्तुतिचरणमेव कथयितुं शक्नोमि - ''ते दृश्य त्यारे जेमणे माण्युं हशे ते धन्य छे...'' इति।





यस्य निर्विषयं चित्तं,
हृदयं यस्य शीतलम्।
तस्य मित्रं जगत् सर्वं,
तस्य मुक्तिः करस्थिता।।

# दीपगुणाः सूचिगुणाश्च गुरुवराः १६

न्यायाचार्य-न्यायविशारद-महोपाध्यायश्रीमद्यशोविजयगणिवरैः स्वकृतगुरुतत्त्वविनिश्चयग्रन्थमध्ये महान्तः पञ्चमहाव्रतधारिणो गुरुवरा दीपकसमाना दर्श्यन्ते । तथाहि-

**जह दीवो अप्पाणं, परं च दीवेइ दित्तिगुणजोगा।**
**तह रयणत्तयजोगा, गुरु वि मोहंधयारहरो।।**

श्लोकार्थोऽयम् - यथा दीपकः स्वयं ज्योतिषा राजते अन्याँश्च दीपकशतान् दीप्तिगुणयोगाज्ज्योतिर्दानं कृत्वा प्रकाशयति तथा जिनशासनस्य महान्तो गुरुवरा अपि 'दर्शन-ज्ञान-चारित्र' इति रत्नत्रयीणामुपासनया स्वयं प्रकाशन्ते अन्येषाञ्च नैकेषां सत्त्वानां मोहतिमिरं रत्नत्रययोगादपहृत्य तेषां जीवनमपि प्रकाशमानं कुर्वन्ति। गुरूणामेतद् वैशिष्ट्यम्।

अन्यस्मिन् स्थले तु ३६ गुणालङ्कृतानां तृतीयपदारूढाणां गुणनिधीनां महात्मनां 'दीवसमा आयरिया' इति विशिष्टं विशेषणं प्रदत्तम्। यतः सूरिवराः स्वयं सद्गुणधर्माराधनादिकैर्भ्राजन्ते, अन्यांश्चानेकजीवानपि सद्गुणधर्माराधनादिसम्पद्भिर्भासयन्ते । इदं विशेषणं पूज्ययुगदिवाकरगुरुवरजीवने यथाश्रुतमन्वर्थमासीत्। यतस्तत्रभवद्भिः स्वकीयं जीवनं तु रत्नत्रय्यास्तेजसा भ्राजमानं कृतमेव। आधिक्ये चाऽन्येषां नैकेषां जीवानां जीवनमपि राजमानं कृतम्, कदाचित् प्रव्रज्याप्रदानेन कदाचित् प्रवचनदानावलम्बेन कदाचिज्जिनालयादीनामालम्बनेन, कदाचित्







प्रतिष्ठादिमहोत्सवालम्बनेन, किञ्च कदाचित् केनचिदन्येनानुष्ठानेन। अतः कथयामि-गुरुवरा आसन् दीपगुणाः, दीपवत् सर्वत्र अधर्मतमांसि हृत्वा सद्धर्मज्योतिराविष्कारकाः।

गुरुवरा आसन् सूचिगुणाः, यत्र यत्र विहृतास्तत्र तत्र स्थले स्थले सूचिवद् संयोजनकारकाः। अत एव ते 'सङ्घसमन्वयकारक' इत्यनेन विशेषणेनाऽलङ्कृता आसन् । सद्धर्मज्योतिराविष्करणमुत सङ्घसमन्वयकरणम्, सर्वत्र तत्रभवतां प्रबलपुण्यमपि एकं महत् कारणम्। पूज्यप्रवराणां पुण्यविषये केनचित् प्रसङ्गप्रमाणेनालम्। प्रत्युत, नैकमहापुरुषाणां शब्दानां प्रमाणमेवात्र भविष्यति यथार्हम् । असीमपुण्यप्रभावशालिनां गुरुवराणां कृते तेष्वेकतमैर्महापुरुषैरुक्तं कल्पनातीतमिदम् - 'साम्प्रतकालीनजैनशासने संप्रति पुण्योदयस्तु कस्यचिदन्यस्याऽपि बहुरस्ति। किन्तु तस्य पुण्योदयेन शासनस्याऽपचय एव भवति, नोत्कर्षः। इतो धर्मसूरेरपि पुण्योदयस्तादृश एवास्ति। परं, तस्य पुण्योदयेन शासनसमाजयोरतितरां लाभो भवति। एवं समीक्षायां तत्सदृशं पुण्यं साम्प्रतयुगे कस्यचिदपि नास्ती'ति।'

स्वश्रीमुखेन नैकश एतद्विधं कथयितारस्ते महापुरुषा आसन् पूज्यपादारविन्दसङ्घनायका आचार्यदेवश्रीमद्विजयनन्दनसूरीश्वराः। पूज्ययुगदिवाकरगुरुवराणां जीवने येषां स्थानं गुरुसदृशमासीत्त इमे महापुरुषाः। तेषां वचनान्यसन्दिग्धानि स्पष्टानि सन्ति। अतोऽधिकं विश्लेषणमनावश्यकम्। अथ गुरुवरेभ्य एकां लघुवन्दनपङ्क्तिं प्रस्तूय विरमामीहैव '**तस्मै श्रीगुरवे नमः**' इति।





जह दीवो दीवसयं,
पइप्पइ सो अ दीप्पए दीवो ।
दीवसमा आयरिया,
अप्पं च परं च दीवंति ।।





## १७ धन्यातिधन्याः शिष्याः

''सङ्घस्य महते कार्याय वयं निर्गच्छामः, ततः प्रथमं चरणं युष्माभिर्मुच्यताम्।'' सिद्धान्तनिष्ठगुरुवराणामिमे शब्दाः। अवधातव्यम्, इमे शब्दास्तत्रभवद्भिर्निजगुरुदेवानुद्दिश्य नोक्ताः, प्रत्युत स्वकीयं पुण्यप्रभावयुतं शिष्यमुद्दिश्य कथिता आसन्।

''गुरुवराः! कदाऽपि न भवेदेवम्।'' विनयावनतः शिष्यः प्रस्तावमिमं विनम्रस्वरेण प्रतिषिद्धवान्।

''अहं कथयामि प्रथमं चरणं युष्माभिर्मुच्यताम्। इयमस्ति मदीयेच्छा।'' सिद्धान्तनिष्ठगुरुवरा वात्सल्यार्द्रस्वरेणाऽनुरुद्धवन्तः।

''न गुरुवराः! वयं तु भवद्बालाः। भवन्तः सन्ति अस्मदीयाः शिरश्छत्राः। अतः प्रथमं चरणं तु भवतामेव स्यात्।'' श्रमणानां श्रमणोपासकानां च तत्रस्थितः स्तब्धलोचनो विशालगणो विमूढमनसाऽद्भुतं दृश्यमिदं निरीक्षते स्म। आसीत् स सस्नेहो मधुरो कलहः, उत विनायासमाविर्भूतो गुरुशिष्ययोः पारस्परिकः प्रबलः सद्भावः? आसीत् सिद्धान्तनिष्ठ-गुरुवराणामौदार्यं यद्वा पुण्यप्रभावकशिष्यस्य नम्रता? एतत् सर्वमनिर्णीतमेव जातम्।

अत्रान्तरे जडवत् तस्थुषां श्रावकाणां समक्षं सहसा दृष्टिपातं कृत्वा सिद्धान्तनिष्ठगुरुवरा हसितवन्तो मिष्टस्वरेण चोक्तवन्तः - ''अहमिदमागृह्णामि, तद् युष्मदीयसङ्घलाभार्थमेव। यत एतेषां पुण्यतारको साम्प्रतमतिदीप्तिमानस्ति। यदि प्रथमं चरणं तेन स्थापयिष्यते तर्हि आदेशघोषणासु अद्य सङ्घकोषः पूर्णो भविष्यति। अतोऽधुना युष्मदीयलाभार्थं भावनां न दर्शयामि, परमाज्ञां करोमि - 'प्रथमं चरणं स एव स्थापयेदिति।'







शब्दस्थं वात्सल्यमनुभूय तस्य शिष्यस्य श्रावकाणां च नेत्राण्यपि हर्षाश्रुभिरार्द्राणि जातानि। लज्जया नतशीर्षेण गद्गदेन शिष्येण विनम्रस्वरेणोक्तम् - ''गुरुवराः। भवतां वात्सल्यभावो वदत्येवम्, परमार्थत एवं किञ्चिदपि नास्ति। यदि चैतादृशमनुभूयते तर्हि भवतां कृपाया एव तत् फलमस्ति। आतपस्थः स्फटिको यदि चकास्ति तर्हि स प्रभावस्तस्य स्फटिकस्य न, परमंशुमालिनोऽशूनामस्ति। तत एतादृशं चिन्तनं न कार्यम्। प्रथमं चरणं भवद्भिरेव स्थाप्यम्।''

तस्य दर्शनीयदृश्यस्य पूर्णविरामः कीदृशोऽपि आगतः परं तद् दृश्यं किल विरलमासीत्। तद्विरलदृश्यस्य दृष्टृणां सर्वेषां सौभाग्यशालिजनानां चित्तं तदा हर्षेणापूरितं जातम्। तद् हर्षगर्भं वृत्तं ज्ञात्वाऽद्य मादृशानां हृदयमपि हर्षसमृद्धं भवति, ततस्तस्य साक्षाद्दृष्टृणां तु का वार्ता ?

* * *

वैक्रमीयं 2027 तमं वर्षम्। मुम्बई-घाटकोपरशाखापुरस्य चतुर्भूमिकस्य श्रीविंशतितमतीर्थकृन्मुनिसुव्रतस्वामिजिनप्रासाद-स्याञ्जनशलाका-प्रतिष्ठामहामहोत्सवप्रसङ्गः। स एवाऽस्या विरलघटनाया उद्भवस्थानम्।

ते सिद्धान्तनिष्ठगुरुवरा आसन् पूज्यचरणारविन्दपुण्य-नामधेयाचार्यदेवश्रीमद्विजयप्रतापसूरीश्वराः। तेषाञ्च विनम्रता-मूर्तितुल्या विनेया आसन् पूज्यपादपद्मपुण्यश्लोकाचार्य-देवश्रीमद्विजयधर्मसूरीश्वराः।

प्रस्तुतप्रसङ्गे का वर्धेत? पूज्यसिद्धान्तनिष्ठगुरुवराणां वदान्यतापूर्णं वात्सल्यम्? आहोस्वित् पूज्ययुगदिवाकरगुरुवराणां विनम्रता गुरुसमर्पणभावना गुर्वायत्तता वा? इति तुलाधिरोहणमत्र नास्ति शक्यम्। यद्यपि, उभौ गुरुदेवौ गुणगरिष्ठावास्ताम्। शासनस्य सन्निष्ठप्रभावका-वास्ताम्। तत्रभवतोः परस्परं गुणतुलनाया निरर्थका चेष्टा नितरां नोचिता। तत्रभवन्तौ गुरुवरौ तु श्लोकस्याऽमुष्य देहस्वरूपावास्ताम्- **'शुभानुष्ठानकार्येण, श्राद्धवर्गप्रबोधकः। आचार्य एव विज्ञेयो, धर्मतीर्थप्रभावकः।'** इति।

यद्यपि पूर्णविरामोऽत्र न कर्तव्यः। किन्तु, मनाग् विलक्षणदृष्टि-बिन्दुना किञ्चिदन्यदपि ज्ञातव्यम्।

कस्मिंश्चित् स्थले मया पठितं, गुरूणां च वाचनादौ श्रुतमपि यत् शिष्यः स धन्योऽस्ति यस्य हृदि गुरुर्वसति। परं स शिष्यस्तु धन्यातिधन्योऽस्ति यो गुरुहृदि वसति। सिद्धान्तनिष्ठगुरुवरैरुक्तानां शब्दानां प्रमाणेनाऽहं कथयामि 'पूज्य युगदिवाकरगुरुवराः केवलं शासनस्य समर्थप्रभावका आचार्या एव नाऽऽसन्, परं धन्यातिधन्यशिष्या अपि आसन्....।'





एकेनाऽपि सुशिष्येण,
गुरुर्गच्छति गौरवम्।
यथा चन्द्रप्रकाशेन,
रजनी याति गौरवम्।।

# सङ्घसमाधिकारका गुरुवराः १८

महाराष्ट्रप्रान्तीयपेनग्रामीया वार्तेयम् । तत्र प्रतिष्ठामहोत्सवहेतवे पूज्यपादगुरुवरा आगताः। एकादशवर्षेभ्यः प्राक् पूज्यपादसिद्धान्तनिष्ठाचार्यदेवश्रीमद्विजयप्रतापसूरीश्वरैरिदं जिनमन्दिरं प्रतिष्ठितम्। तदनु कस्मिंश्चिद्दिने श्रावकैः पूजासमये परमात्मप्रतिमा चलिता। अतः सङ्घः पुनः प्रतिष्ठानिर्णयं कृतवान्। एतन्मङ्गलकार्यार्थं च पूज्यगुरुवरा विज्ञप्ताः। सङ्घस्य विज्ञप्तिमुररीकृत्य गुरुवराः पेनग्रामं समागताः।

परं, पूर्वप्रतिष्ठामहोत्सवतुलनायामस्मिन् प्रसङ्गे काचिन्न्यूनताऽनुभूयमानाऽऽसीद्। एका विषमा घटना तस्या मूले सुषुप्ताऽऽसीत् । वृत्तमेवं जातम्, गतप्रतिष्ठामहोत्सवे महालाभग्राहकसङ्घनायकस्य सङ्घस्यान्यसदस्यैः सह पूर्वप्रतिष्ठा– दिने (वि.सं. २००६) एव महान् मतभेदः समुद्भूतः। घटना क्षुद्रा, किन्तु तस्या निराकरणं नाऽऽगतम्। फलतः सङ्घप्रमुखस्त्यागपत्रं दत्तवान्। सङ्घकार्यं तेन त्यक्तम्। प्रभुदर्शन–पूजने अपि त्यक्ते। किञ्च गृहं तस्य जिनालयाभिमुखमेव, तथाऽपीदं काटवं ११ वर्षपर्यन्तमनारतं स्थितम्।

एतद्विपरीतस्थित्यां पूज्यपादगुरुवराः पेनग्रामं प्राविशन्। असौ सद्गृहस्थो गुरूणां प्रवेशेऽपि नाऽऽगतः। अज्ञानवशात् कश्चिदात्मा जिनदर्शनं पूजामपि त्यजेदेषा घटना गुरुवरकृतेऽतिदुःखदाऽऽसीत् । प्रवचनानन्तरं मानाऽपमानयोः समानवृत्तयो गुरुवराः स्वयममुष्य श्रावकस्य गृहं गताः। स्वगृहस्याङ्गणे निमन्त्रणं विनैवागतानाचार्यदेवान् स ददर्श स्तब्धनयनश्च बभूव। तेन स्वागतवन्दनादिरुचिता गुरुभक्तिः कृता।

गुरुवरैर्लघुरपि हृदयस्पर्शिसद्बोधः प्रदत्तः। नैकेभ्यो वर्षेभ्यो कषायतापेन मनःसन्तापेन च तप्तः स सद्गृहस्थः पूज्यवराणाममृतमयीं वाणीं श्रुत्वा भृशं रोदितवान्।







गुरुवरैराश्वास्य स कथितः – ''अतीतकालो विस्मरणीयः। अथ सायाह्ने नूतनप्रतिष्ठामहोत्सवस्य नानाविधादेशानां घोषणा सङ्घसभायां भविष्यति। युष्माभिस्तस्यां नूनमागन्तव्यम्। सर्वं सुष्ठु भविष्यति।''

गुरुवराणां वाणीसुधावृष्ट्या सिक्तस्यामुष्य भ्रातुर्हृदयधरा नितरां कोमला सञ्जाता। नतशीर्षः स गुरुवचनं स्वीकृतवान्।

दिनान्ते यथासमयं सङ्घसभायां चित्रितास्तरणे स वस्तुत उपाविशत्, तदा सर्वे सङ्घजनाः 'अहिमरुचिः कथमद्य पश्चिमायामुद्गतः?' इति सुखदमाश्चर्यं प्राप्तवन्तः। अन्ततः प्रतिष्ठादिने नवकारशी–शान्तिस्नात्रमहानुष्ठानादेशौ तस्मै गृहस्थाय पूज्यपादगुरुवराः प्रेम्णा स्वयं दापितवन्तः, स च तानादेशान् हृदयेन स्वीकृतवानपि। गुरुवरनैपुण्येन स स्वयमेव सङ्घस्रोतसि समगच्छत। इतरेद्युर्गुरुवरैस्तस्य पूर्ववत् पूजासङ्कल्पः कारितः। अथ संघर्षस्थानं शान्तिसमाधिभ्यामादत्तम्।

प्रतिष्ठामहोत्सवं सोल्लासं कारयित्वा सङ्घसमाधिकारका गुरुवरा विक्रमसंवत् सप्तदशाधिकद्विसहस्रस्य (२०१७) वैशाखमासस्य ग्रीष्मर्तुदिनेषु विहृत्य पूनासङ्घप्रार्थनया पूनानगरं प्रति गताः। यद्यपि, तदा पेनग्रामेऽसौ श्लोकपङ्क्तिरक्षरशः सार्था सञ्जाता यथा–

**चन्दनं शीतलं लोके, चन्दनादपि चन्द्रमाः।**
**साधुसङ्गतिरेताभ्यां, नूनं शीततरा स्मृता।।**





ते तीर्णा भववारिधिं मुनिवरास्तेभ्यो नमस्कुर्महे,

येषां नो विषयेषु गृध्यति मनो नो वा कषायैः प्लुतम्।

रागद्वेषविमुक् प्रशान्तकलुषं साम्याप्तशर्माद्वयं,

नित्यं खेलति चाऽऽत्मसंयमगुणाक्रीडे भजद्भावनाः।।



# सङ्घसमन्वयाऽऽकाङ्क्षिणः ११

वैक्रमीयं २०२५ तमं वर्षम् । महाराष्ट्रसीमान्तवर्तिनि बोरडीग्रामे नवनिर्मितशिखरबद्धजिनायतनस्य भव्यप्रतिष्ठामहोत्सव आरब्धः । गुरुवराणां शुभनिश्राऽऽसीत् । हर्षोल्लाससाम्राज्यं परितः प्रसृतम् । अरे! न केवलं बोरडीजानपदीयाः, अपि तु पार्श्ववर्तिप्रत्येकग्रामीया भाविका अपि तन्महोत्सवस्य तत्प्रदेशानन्योपकारिगुरुवराणां च दर्शनार्थमायान्ति स्म।

परं, तत्रतः ४ 'किलोमीटर'दूरवर्ती घोलवडग्रामीयः सङ्घोऽस्मिन् महोत्सवे विशेषेण न सम्मिलति स्म । गुरुवरैरनुमितं यद् द्वयोः सङ्घयोर्मध्ये वैमनस्यबीजमुप्तमस्तीति। तदुच्छेत्तुमुभयोः सामीप्यं वर्धेत तादृशं किञ्चित् कर्तव्यम्। अतो गुरुदेवैरेकः प्रस्ताव उपन्यस्तः– 'प्रतिष्ठा बोरडीग्रामे कामं भवतु, परमपरेद्युर्द्वारोद्घाटनयात्रा घोलवडसङ्घप्राङ्गणतो भवतु' इति। गुरुवराणां पुण्यप्रभावायत्तावुभौ सङ्घावेनं प्रस्तावं सोत्साहं स्वीकृतवन्तौ। परमेतस्मै कार्याय घोलवडसङ्घेन प्रतिपणः कृतः– 'यदा द्वारोद्घाटनशोभायात्रा घोलवडसङ्घप्राङ्गणतः प्रारभ्येत, तदा भवद्भिस्तत्र निश्रां प्रदायाऽस्माभिः सार्धं नूनमागन्तव्यमेव । तत्पश्चादेव प्रस्तावोऽयमुचितो भवेदि'ति।

अभिमतसङ्घसमन्वयैर्गुरुवरैस्तदर्थं सम्मतिः प्रदत्ता। हृदयरोगेण च ग्रस्तास्ते गुरुवरा अस्यै द्वारोद्घाटनशोभायात्रायै न केवलं बोरडीग्रामाद् घोलवडग्रामं गतवन्तः, परं तत्रस्थसङ्घेन सार्धं घोलवडग्रामाद् बोरडीग्रामागमनस्य कष्टमपि गृहीतवन्तः। फलत उभौ सङ्घौ सख्यभावयुतौ बभूवतुः। द्वयोश्च मध्ये स्थिरा संहतिः संस्थापिता। पूज्यपादगुरुवरा आसन् सङ्घैकतायाः सफलशिल्पिनः। एतादृशा द्वित्रा एव न, अपि तु सङ्घसख्यतां सुदृढीकुर्वन्तो नैके प्रसङ्गास्तेषां जीवनशिलायामङ्किताः सन्ति।

* * *

अथ जिनालयनगरस्य खम्भाताख्यस्याऽऽख्यायिकामवगच्छेम। २०३३ तमे विक्रमसंवत्सरे मुम्बापुरीतः (मुम्बईतः) पादलिप्तपुरस्य महता छ'री'पालकपदयात्रासङ्घेन सह गुरुवरास्तत्र खम्भातनगरं समागताः। तत्रागमनात् पूर्वस्मिन् दिने







पदयात्रासङ्घस्य पूर्वविश्रामस्थले तत्रभवद्भिः खम्भातसङ्घाय स्वहृदयगतं ज्ञापितम्– ''भाग्यवन्तः! अहमभिलषामि, सङ्घप्रवेशनिमित्तेन सर्वेषां खम्भातवासिनां नवकाराराधकजैनधर्मिणां समूहसाधर्मिकवात्सल्यं भवेदि''ति।

अग्रगण्या भ्रातर आहुः– ''गुरुदेव ! अशक्यप्रायं कार्यमस्तीदम् । गते शताष्टके वर्षे नगरे किञ्चनमपि साधर्मिकवात्सल्यमेतद्विधं सामूहिकं न सञ्जातम्। यतः प्रत्येकावसरेषु मतभेदास्तस्थिवांस एव सन्ति। नैके कलहा अद्यापि विद्यन्ते। अतः कार्यमतिदुर्गममस्ति ।''

अग्रेसराः समूहसाधर्मिकवात्सल्यं कामं नेच्छन्ति स्म। परं, एकस्मिन्नाङ्ग्लभाषीये सुवाक्ये कथितमस्ति नु –**'Where there is a will, there is a way'** अर्थात्–मनःशक्तिर्भवेत् तर्हि मार्गो नूनं प्राप्येतेति।

गुरुवरा ईषदपि निराशा न भूत्वा यत्नशीला बभूवुः । यत्नश्च तेषां सफलो जातः। अन्ततः पदयात्रासङ्घस्य खम्भातप्रवेशदिने सर्वेषां खम्भातनगरवासिनां नवकाराराधकजैनधर्मिणामाकुमारपालाद्यावधि न सम्पन्नं विरलं समूहसाधर्मिकवात्सल्यमभवत् ।

* * *

विक्रमसंवत्सरे नवाधिकद्विसहस्रवर्षे चारित्राकरे दर्भावती(डभोई)–नगरेऽपि गुरुवरैरेवंविधं सङ्घवैमनस्यविसर्जनं सौमनस्यसर्जनं च कारितम्। तत्र नैकेभ्यो वर्षेभ्यो विजयदेवसूरिजैनसङ्घ–सागरगच्छजैनसङ्घयोर्मध्ये द्वन्द्वभावः प्रवर्तमान आसीत् । ततश्चोग्र–विवादाः प्रवर्तन्ते स्म । गुरुवरा एतदर्थं प्रयत्नं कृत्वा तत्र पर्युषणामहापर्वणः पश्चात् रथयात्रा–सङ्घसाधर्मिकवात्सल्यादिकार्यक्रमान् नित्यं संयुक्तान–कारयन्, सङ्घद्वयाभ्यन्तरे च परस्परसंहतिप्रीत्योः सर्जनमकुर्वन् । यतो गुरुवराः सदैवैवं मन्वाना आसन् **'संहतिः कार्यसाधिका'** इति।

* * *

ये ये सङ्घा गुरुवरसान्निध्यं प्राप्तवन्तः, प्रेमभावसर्जनं तेषु प्रत्येक–सङ्घेषु सञ्जातम्। कथयति सुभाषितमेवम् –

**'गङ्गा पापं शशी तापं, दैन्यं कल्पतरुस्तथा ।**
**पापं तापं च दैन्यं च, हरेत् साधुसमागमः।।'**

अहं वेद्मि–अस्य सुभाषितस्य साक्षात् प्रमाणमस्ति गुरुवरजीवन–चरित्रमिति।





श्रोत्रं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां,
परोपकारैर्न तु चन्दनेन।।

# हृदयङ्गमा क्रीडा २

हृदयङ्गमा क्रीडा न केवलं क्रीडाङ्गणे क्रीडावीराणां मध्ये क्रियते। परं क्वचिन् मध्येरथ्यं बालानां मध्येऽपि क्रियते। किञ्च, हृदयङ्गमाऽपि सा क्रीडा क्वचित् तादृशी स्याद्, यतो दर्शकाणां श्वासोऽपि क्षणं यावदुत्थितो भवेत्। एतादृश एव हृदयङ्गम: प्रसङ्गो वर्धमान(वढवाण)नगरे वैक्रमीये १९६७ तमे संवत्सरे सञ्जात:।

तदानीमेका लाघविमण्डली वर्धमाननगरमागता। ग्रामे जनप्रवादो वायुवत् प्रसृत:–तस्या मण्डल्या: कश्चिन् मायाकारो ज्वलत्सु अत्युष्णाङ्गारेषु चलिष्यतीति। अलम्, इमां वार्तां ज्ञात्वा कुतूहलप्रिया जना: सम्भाषणे मग्ना अभवन्। कस्मिंश्चित्स्थले केचिद् बाला अपि सम्भाषन्ते स्म।

एकोऽवदत् – ''ईदृशं शक्यमस्ति खलु ? नग्नपादो जन: साक्षादङ्गारेषु चलेत्, तथापि न दहेत् ?''

द्वितीय: प्राह – ''अरे भ्रात: ! ऐन्द्रजालिक: कस्य नाम ? स तु सर्वमेव कर्तुं शक्नोति।''

किञ्च, तृतीयेनोक्तम् – ''अरे ! इन्द्रजालस्येमा वार्तास्तु नितरां छलना अस्ति। लोकवञ्चनस्य व्यवसायोऽस्ति। अन्यथा शक्यं नास्तीदृशं दुष्करं कार्यम्।''

पूज्यपादयुगदिवाकरगुरुवरा अपि तदानीं सांसारिकावस्थायां भाईचन्दकुमाररूपेणास्मिन् बालवृन्दे विद्यमाना आसन्। तेऽपि प्राहु: – ''कथं शक्यं नास्ति ? यदि बुद्धिपूर्विका योजना भवेत्, तर्हि सर्वमेव शक्यं भवेत्।''

इदं श्रुत्वैक: ८ वर्षीयो मित्रबालो भाईचन्दकुमारस्य हस्तमादाय कथितवान् – ''रे ! एतस्मिन् बुद्धिविषय: कुत आगत: ? इमौ तव हस्तावधुना मया दहद्भिरङ्गारैर्भरिष्येते, तदा किं तव प्रज्ञा कार्यं करिष्यते ?''







सुहृदः साह्वानं वचनमङ्गीकृत्य त्वरितं भाईचन्द्कुमारः प्रत्युक्तवान् – ''ओमोम्, निःसंशयम् । तत्र मम प्रज्ञा नूनं कार्यं करिष्यते।''

''तर्हि तिष्ठ, एतर्ह्येव ज्वलतोऽङ्गारान् नीत्वाऽऽगच्छामि, तव च मुक्ते करतले तान् निक्षिप्य पश्यामि यद् बुद्धिः कथं कार्यं करोति ?'' इत्युक्त्वा स बालः स्वगृहं प्रत्यधावत्।

परिहास उपद्रवे परिणतः। परितः स्थितवन्तो वृन्दस्यान्ये सहचराः स्तब्धनेत्रा अभवन्। अत्रान्तरेऽसौ बाल एकस्मिन् भाजने त्रीन् यावदङ्गारान् गृहीत्वा समागच्छत्। 'अथ किं भविष्यति' इति मनःकल्पनायां निमग्ना मित्रबाला निकटगृहस्थिता च भाईचन्द्कुमारस्य माता (छबलबहेन) इदं हृदयङ्गमं दृश्यं मूकप्रेक्षकवद् निरीक्षमाणा आसन्।

कथ्यते सूक्तौ '**दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनाम्।**' एवमेवाभवत्तत्र।

तदा भाईचन्द्कुमारस्य साहाय्ये तन्मतिः किल धावन्ती समागता। तत्क्षणं धराधूल्या स्वस्य द्वौ हस्तौ स पूर्णवान्, अमुष्य च मित्रबालस्य सम्मुखमञ्जलिं विरच्य तेन कथितम् – ''आगच्छ, अथ निक्षिप तवाङ्गारान् मदीयामञ्जल्याम्।''

भाईचन्द्कुमारस्येमां सहसाऽऽविर्भूतां प्रतिभां दृष्ट्वा माता सहचराश्च नितरां हर्षिताः सञ्जाताः। आह्वानकर्ता चाऽसौ बालसहचरो लज्जानतास्योऽभवत्।

बालभाईचन्द्कुमारचेतसि आविर्भूतेयं प्रतिभा प्राकृता न, अपि तु विशिष्टाऽऽसीत्। तत्प्रभावतो भविष्यति नैकेषां जीवने सन्धिसर्जनमभवत्, नैकेषां हृदये धर्मभावसर्जनमभवत्। कदाचित् सा प्रतिभा गगनस्थित–तारकमिव भवविरागतारकं विद्योतितुं निमित्तरूपा सञ्जाता, कदाचिच्च सा शासनरागदीपकं दीप्तिमन्तं कर्तुं निमित्तरूपा जाता। आगम्यताम्, तस्यै विरलप्रतिभायै तत्स्वामिने च सहृदयं प्रणमामो वयम्।



**सिंहः शिशुरपि निपतति,**
**मदमलिनकपोलभित्तिषु गजेषु।**
**प्रकृतिरियं सत्त्ववतां,**
**न खलु वयस्तेजसो हेतुः।।**



## गुरुमाता... संस्कारमाता... २०

कस्मिंश्चित् स्थले गुर्जरप्रवक्तृणां वक्तृत्वस्पर्धाऽऽसीत् । प्रवक्तारो बहव आसन्, समयश्चाल्पः । अतः सभाध्यक्षः सूचितवान् – 'प्रत्येकवक्त्रा स्वव्याख्यानं संक्षेपेण कर्तव्यमि'ति।

विज्ञप्तिं श्रुत्वा सर्वे प्रवक्तारः समासतो व्याख्यातुं लग्नाः।

अनुभवी सैनिकोऽभिदधौ–''प्रत्येकशस्त्राणि 'धार–अणी ने धुबको' इति त्रितये समाविष्टानि जायन्ते ।''

परिणतप्रज्ञो भिषग्वर उवाच – ''प्रत्येकामयाः 'वात–पित्त ने कफ' इति त्रिके समाविष्टा भवन्ति ।''

सङ्गीतसम्राड् गायक उवाद – ''प्रत्येकवाद्यानां वर्गीकरणं 'धा–वा ने घसरको' इति त्रिधा भवति ।''

सानुभवः सूपकारः कथयामास – ''अनेकखाद्यानां समावेशः 'घी–गोळ ने घउं' इति त्रिषु भवति ।''

बहुदर्शी चिन्तक आचख्यौ – ''अनन्तकालिक इतिहासः 'जन्म–जीवन ने मरण' इति त्रिगणे समाविष्टो भवति ।''

साधनाशीलो महात्मा प्रथयाञ्चकार – ''मुक्तिमार्गस्य सङ्ख्यातीतयोगाः 'दर्शन–ज्ञान ने चारित्र' इति त्रिपद्यां समाविष्टा भवन्ति ।''

यदि नाम तस्यां वक्तृत्वस्पर्धायामहमपि एको प्रवक्ताऽभविष्यम्, तर्हि तस्मिन् समयेऽहमवश्यमेतादृगवदिष्यम्– ''मदीयपूज्यपादयुगदिवाकरगुरुवराणां जीवनस्य मुख्यगुणाः 'होश–होंश ने होशियारी' इति शब्दत्रय्यां समाविष्टा आसन् ।''




શ્રી વીર જૈન બાલમંદિર



अस्या: सद्य उक्ताया गुर्जरत्रिपद्या: क्रमेणाऽयमर्थो भवति – (१) 'होश'=(संस्कारविषये) जागृति: । (२) 'होंश' = (शासनविषये) अनुराग:। (३) 'होशियारी' = (सम्यग्) बुद्धि: । त्रिपद्या: प्रत्येकानर्थान् वयं क्रमश: पूज्यपादगुरुवराणां जीवनस्य विविधप्रसङ्गेन सह संयोजयिष्याम:।

तत्र प्रथमांशोऽस्ति जागृतिरिति। गुरुवरा: सम्यक्संस्काराणां नितरां पक्षपातिन आसन्। अत एव तेषां रक्षणार्थं सदैव जागरूका आसन्।

वैक्रमीये पञ्चाधिकद्विसहस्राब्दे जातोऽयं प्रसङ्ग:। तदानीं गुरुवरा घडियालीपोळ–वटपद्र (वडोदरा) नगरमध्ये चतुर्मासाय विराजन्ते स्म। नूतन उपाश्रयो निर्मीयमाण आसीत्, इति कारणात् ते पूज्या जैनधर्मशालायां चतुर्मासं स्थितवन्त आसन्। तत्र अधोभूम्यां लघुवयस्कबालानां बालमन्दिरं प्रवर्तते स्म। एतस्मिन् बहवो बाला जिनधर्मगा आसन्।

एकस्मिन् दिने विश्रामावसरे पूज्यवरा: सहजमधो निरीक्षितवन्तास्तर्हि सहसा विस्मयं प्रापु:। तत्र बालेभ्यो माध्याह्निकोपाहारे कदलीफलीयं न, किन्तु आल्वीयं खाद्यं दीयमानमासीत्। जैनबालेभ्य आल्वीयं खाद्यं दीयेतेति वृत्तं बालसंस्करणविषये पूर्णजागरूका: पूज्यवरा: कथं क्षमेरन् ? तै: श्रावका: कथिता:। तदानीं श्रमणोपासकै: प्रत्युक्तम् –

''गुरुवरा:! नैकश: कथितमेतत्। तथाऽपि बालमन्दिरस्य शिक्षक: किञ्चिदपि न श्रृणोति। इदं केवलं जैनं बालमन्दिरं नाऽस्तीति तदाशय:।''

आकर्ण्येदं गुरुवरास्तत्क्षणमादिष्टवन्त: – ''ततो वयमेव जैनं बालमन्दिरमारभेमहि। अस्माकमेवेदं स्थानम्। ततोऽस्मदीयसंस्थाया एवोद्भव: कामं भवतु। संस्काररक्षणं तु भविष्यति...।'' पुण्यशालिपूज्य–वराणां प्रस्ताव: श्रावकवरै: शीघ्रं शिरसि गृहीत:। ततो वैतनिकं बालमन्दिरं व्यारमत्। संस्कारनगर्यां चाऽनेकवर्षाणि यावत् प्राप्तप्राज्यप्रचारं जैनं बालमन्दिरं प्रारब्धम्।

**'संस्कारहीना: पशुभि: समाना:'** इमामुक्तिं दार्ढ्येन परिष्वजमाना गुरुवरा: प्रस्तुतप्रसङ्गे दृश्यन्ते। बालसंस्करणाभिलाषेण सार्धमभक्ष्यप–दार्थोपयोगमस्वीकुर्वतां गुरुवराणामाचारनिष्ठाऽपि प्रसङ्गेऽस्मिन् स्फुटा दृश्यते।

अन्ततो गुरुवरानेतावदेवाऽनुनयामि–''भो गुरुवरा:! यादृशी कृपादृष्टिर्भवद्भिर्बालमन्दिरस्याऽमीषु बालेषु कृता, तादृशीं कृपादृष्टिं सकृदस्मिन् बालसेवकेऽपि कुरुध्वम्। अहं विश्वसिमि–भवतां कृपादृष्टिर्मज्जीवने सुसंस्काराणां सर्जनमेव न, अपि तु संवर्धनमपि करिष्यतीति।''





पंचविहमायारं,
आयरमाणा तहा पभासंता।
आयारं देसंता,
आयरिया तेण वुच्चंति।।

## विरागिण: तथाऽपि परमशासनरागिण: २१

तदानीं पादलिप्तपुरे रम्यं दृश्यमासीत्। यतो मुम्बईमहानगरत: परमशासनप्रभावनापूर्वं प्रस्थितस्य भव्यपदयात्रासङ्घस्य पादलिप्तपुरे प्रवेशस्य महान्नवसर आसीत्।

लोहाध्वगन्त्रीभि: प्रस्तरतैलशकटिकाभी राज्यशकटिकाभिश्च (क्रमत: 'Train - Car - Bus' इति यानै:) पदयात्रासङ्घस्वागतार्थं समागतैर्भगवद्भक्तैर्गुरूपासकैश्च पादलिप्तपुरं जनाकीर्णं सञ्जातम् । स्वागतयात्रा प्रभूतोल्लासपूर्वकं पुरराजमार्गे प्रचलति स्म।

परं किमिदम् ? पूज्ययुगदिवाकरगुरुवरनेत्रे अस्मिन्नाह्लादपूर्णेऽवसरेऽपि बाष्पैर्जलसिक्ते अभवताम् । कारणं तत्र इदं यत् कस्मैचित् साध्वीवृन्दाय व्यवस्थापकैर्धर्मशालान्त: प्रवेशो न दत्त:, अत: बाबुपनालालधर्मशालाया अलिन्दे तेन साध्वीवृन्देन निवास: कृत:। श्रमणमर्यादारक्षणार्थं वासांसि परित: प्रलम्ब्य तेन वृन्देनोपयुक्तमावरणं रचितम्। गुरुवरनेत्रयोरिदं करुणं दृश्यं गतम् । अत एव करुणानिधीनां तेषामक्षिणी बाष्पैर्जलसिक्ते अभवताम् । गुरुवरैस्तदैव निश्चितम् 'अत:परं पादलिप्तपुरमहातीर्थे मया श्रमणीवर्याभ्य एकमाराधनास्थानं स्वतन्त्रं कारयितव्यमि'ति।

तत:परं तृतीये दिने विशालप्रवचनसभायां गुरुवरा इमं दु:खदं वृत्तान्तं वर्णयित्वा शितधारया गिरा कथितवन्त:– ''यत्र त्यागि–तपस्वि–श्रमणै: श्रमणीभिश्च निवासो न लभ्यते, तत्स्थानाय 'धर्मशाला' इति शब्दोऽनर्ह:, प्रत्युत 'कर्मशाला' इत्येव शब्दोऽर्ह:। अधुना पादलिप्तपुरे श्रमणीनां स्वतन्त्राराधनार्थमेकमाश्रयस्थानमावश्यकमस्ति, यत्र शतश: श्रमण्य: सुखेन साधना कुर्वीरन्निति मम स्वप्न:। सुपात्रभक्तेरस्मिन् कार्ये केचनापि श्रावका: श्राविकाश्च लाभवञ्चिता न भवन्तु।'' गुरुवराणामियमचिन्त्यप्रभावसम्पन्ना हृदयस्पर्शिप्रेरणा सफला सञ्जाता।







तस्यां सभायामेवास्मिन्नायोजने सपादलक्षरूप्यकाणां वृष्टिः सञ्जाता। एतदायोजनेन युगदिवाकरगुरुवराणां संवेदना–शासनानुराग–समदर्शितानां प्रतीकरूपं श्रमणीविहारस्य भव्यभवनं निर्मितम्। यत्र सार्धशतद्वयावधिश्रमणीवर्या अद्यापि निवसन्ति, प्रशस्यतमां च साधनां कुर्वन्ति।

श्रमणीविहारस्याऽस्याः समुज्ज्वलोद्भवकथायाः सन्धाने श्लोकोऽसौ नूनमुदाहरणीयोऽस्ति–

'मनसि वचसि काये पुण्यपीयूषपूर्णा,–
स्त्रिभुवनमुपकारश्रेणीभिः प्रीणयन्तः।
परगुणपरमाणून्पर्वतीकृत्य नित्यं,
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः॥'

भावार्थोऽयम्–संसारेऽस्मिन् मनसा वचसा वपुषा चेति योगत्रयेण निर्मलहृदयिनः, उपकारश्रेणीभिः त्रिभुवनवर्ति–सत्त्वेभ्यः प्रसन्नता–प्रदायकाः, अन्येषां च परमाणुसदृशानपि गुणविशेषान् शैलीकृत्य नित्यमुररीकुर्वन्तो महापुरुषा अतिविरलाः सन्ति। पूज्ययुगदिवाकरगुरुवरा नितरामीदृशा अतिविरला महापुरुषा आसन्।

उक्तवृत्तान्तस्य विशेषा प्रतीतिः पूर्वोक्तप्रसङ्गस्यान्तरिकौदार्यपूरिते पराकाष्ठानिचिते चरमे चरणेऽधिगम्यते। यदा श्रमणीविहारस्य निर्माणं पूर्णतामधिगतं, तदा कैश्चित् हितकाङ्क्षिभिर्गुरुवरा उक्ताः – ''श्रमणीविहारे भवन्तः कतिपयखण्डान् भवदीयसमुदायवर्तिश्रमणीनां कृते पृथक्स्थापयन्तु।''

गुरुवराः सद्यस्तत्प्रस्तावं प्रतिषिद्धवान् – ''ईदृशं किमप्यन्तरं नोचितम्। परमार्थतः शासनस्य गुणनिष्पन्नाः सर्वा अपि आर्या मदीया एव सन्ति।''

आन्तरिकौदार्यनिचितायां प्रस्तुतप्रत्युक्त्यां पूर्वप्रसङ्गोक्ताया अमुष्या गुर्जरत्रिपद्या द्वितीयोंऽशः ('होंश' = शासनपरत्वे तीव्रानुराग इति) निष्यन्दते। यस्मादाविर्भूतयोर्निष्ठापूर्णशासनभक्ति – प्रज्वलितशासन–रागयोरान्तरध्वनिरद्यापि जाने प्रतिध्वनयतीति अनुभूयते।

स्वार्थशीलेऽस्मिन् विश्वे निरीहत्वमीदृशमनुत्तरम्?

ममत्वभृतेऽस्मिन् युगे निर्ममत्वमीदृक्षमनन्यम्?

भो गुरुवराः! भवतु नैककोटिवन्दना भवतां तस्यै सन्निष्ठशासन–भक्त्यै, तस्मै प्रज्वलिततीव्रशासनानुरागाय च।





दानं वित्तादृतं वाचः,

कीर्तिधर्मौ तथायुषः।

परोपकरणं काया-

दसारात्सारमुद्धरेत्।।

## २२ 'प्रयोगमति' सम्पत्स्वामिनः

''मित्र ! धर्मगुरोरस्य करतलरेखा नितरां विस्मयप्रदाः सन्ति । अनुमन्येऽहं ध्रुवं यत् कोट्यधिपस्येमा हस्तरेखाः सन्ति ।''

''अनुभवबलेनाऽहं त्वदनुमानं समर्थये । गुरुवराः स्वयं कामं निष्किञ्चनाः सन्ति, निष्परिग्रहाः सन्ति। किन्तु, तेषां प्रकृष्टप्रेरणया सत्कार्येषु नैककोटिप्रमाणरूप्यकाणां दानानि त्ववश्यमद्यापि भवन्ति। अस्मात् कारणादेतेऽपि कोट्यधीशदानेश्वरसदृशा एव सन्ति।'' – 'गिरीशभाई' इति नामकः श्रमणोपासकः स्वमित्रं सस्मितं प्रत्युक्तवान्।

वार्तामूलमिदम्–उक्तः सुश्रावकस्तदानीं गोडीजी–पायधुनीमध्ये चतुर्मासार्थं संस्थितानां पूज्यपादारविन्द–युगदिवाकरगुरुवराणां दर्शनार्थमागतवान्, नैजं यवनमित्रमपि आत्मना सहानीतवान् । स यवनसुहृत् – कल्याणनिवासि – हसनअलीनूरमहम्मद आसीत् । तेन संवादोऽयमारब्धः।

अनुसंवादं यदा गुरुवरैस्तयोः पुरः 'धर्मलाभः' इत्याशासितुं वामेतरो हस्तः प्रसारितस्तदानीमसौ नूरमहम्मदोऽतितरां विस्मितवान्। यतो हस्तरेखाशास्त्रे स पारमित आसीत्। निमेषमात्रं निरीक्षितुमुपलब्धाभिरमूभिर्हस्तरेखाभिः सोऽतिप्रभावितो जातवान्। ततो बहिर्गत्वा मित्रेण सहोक्तं वार्तालापं कृतवान्।

श्रुतोत्तरः साकाङ्क्षो हसनअलीनूरमहम्मदो मित्रं प्रति उक्तवान् – ''त्वं मदर्थं गुरुममूं हस्तरेखां दर्शयितुं प्रार्थयस्व। श्रावकमित्रेण सम्मतिर्दत्ता। ततस्तौ पुनर्गुरुवरदर्शनार्थं प्रत्यागतौ। गुरुवरांश्च प्रणम्याभ्यासविशेषाय हस्तरेखामुपलक्षयितुं श्रावकः सम्मतिं ययाच । एतस्मिन् विषये गुरुवरा सर्वथा औत्सुक्यहीना आसन् । तथाऽपि, 'जैनेतरजनः कश्चिदनेन हेतुनाऽपि जिनेश्वरधर्मसंस्कारैर्भावितो भवेत्ततः शोभनतरं किम् ?' इति सम्यक्चिन्तनेन सविनोदं समृदुहासं च तेऽमुं







यवनजिज्ञासुमुक्तवन्तः-''हस्तरेखां निरीक्षितुं नूनं दास्यामि । किन्तु, तदर्थं पूर्वपणस्वरूपा त्वयैका प्रतिज्ञा ग्रहणीया।''

अहोभावपूर्वं नूरमहम्मदेन सद्यः कथितम्-''अवश्यं गुरुवराः ! अहं भवद्भिर्दत्ता प्रतिज्ञा नूनं ग्रहीष्यामि।''

''एवं चेद् यावज्जीवमामिषत्यागनियमं स्वीकुरु।'' - गुरुवराः प्राहुः।

चमत्कृतिश्च सञ्जाता। शय्यम्भवविप्र इव एष यवनजिज्ञासुरपि शीघ्रं गुरुवराणां पुण्यवतीं प्रेरणामगृहणात्, जीवनं यावत् पिशिताहार-त्यागस्य नियमार्थमुभौ हस्तौ समयोजयत् । तदानीं तस्य वदनस्योपरि केवलं हर्षानुभूतिरेव प्रवर्तमानाऽऽसीत्। अत्र पुनरवधेयम्-स्वकृते मांसाहारत्यागस्य दुर्वहप्रतिज्ञाया धारकः स जिज्ञासुर्धर्मेण जिनानुगामी न, किन्तु सुदृढयवन आसीत्।

कथितप्रसङ्गे पूज्यपादारविन्दयुगदिवाकरगुरुवराणामतिप्रभावकं शरीरैश्वर्यं सौभाग्यैश्वर्यं प्रकटमेव दृश्यते, परमाधिक्ये गततृतीये प्रसङ्गलेखे वर्णितगुर्जरत्रिपद्यास्तृतीयांशोऽपि दृश्यमानो भवति। त्रिपद्यास्तृतीयांश-रूपेण तत्र सम्यग्बुद्धिर्निर्दिष्टाऽऽसीत्।

ननु केवलं करतलरेखादर्शनाशयादुपस्थितमेकं यवनजनमपि **'अरुन्धतीप्रदर्शनन्यायेन'** सद्धर्मपथे योजयन्तीं विरलविचारधारां वयं सम्यग्बुद्धिमेव कथयिष्यामः, अन्यद् वा किञ्चित् ?

अवधेयम् - शास्त्रेषु जिनशासननायकानामाचार्यप्रवराणामेकस्यां गुणषट्त्रिंशिकायां **'प्रयोगमतिसम्पद्'** उल्लिखिताऽस्ति । तस्या भावार्थोऽयम् - 'ते जिनशासनोन्नतिकरा आचार्याः शिष्यान् भाविकांश्च धर्मवर्त्मनि प्रवर्तयितुं निपुणा भवन्ति।' उक्तप्रसङ्गे पूज्यपादगुरुवराणां सा प्रयोगमतिसम्पदेव स्फुटा दृश्यते नितराम्।





महानुभावसम्पर्कः,
कस्य नोन्नतिकारकः।
रथ्याम्बु जाह्नवीसङ्गात्,
त्रिदशैरपि वन्द्यते।।

## वचनसिद्धिस्वामिनः २३

मेघस्य विहारः। अपिनाम वृत्तमिदमशक्यप्रायं प्रतिभास्यति तच्च स्वाभाविकमपि अस्ति। परं, गुरुवरजीवन एतदपि वृत्तं वस्तुतो जातम्।

मुम्बईमहानगरे दादररोपनगरत उपनगरं घाटकोपरं प्रति आवश्यककार्यार्थं गुरुवरा विहरमाणा आसन्। घाटकोपरवासी कश्चिदग्रणीः सुश्रावकोऽपि गुरुवरैः सह विहरति स्म। अर्धकिलोमीटरमितं विहृताः, तावन्मात्रे दादरप्रदेशे वारिधरो वृष्टिमारब्धवान्। गुरुवराणां जलधराणां चाऽन्तरं 500/600 पदमात्रमासीत् । अनुगुरुवरं जाने मेघोऽपि विहरति स्म। अतः 'अथ किं कर्तव्यमि'ति मुग्धेन सुश्रावकेण गुरुवराः पृष्टा - ''पर्जन्योऽयमधुना अत्राऽपि वर्षिष्यति ततः कथं विहरिष्यामो गुरुदेव!?''

गुरुवरैः प्रत्युक्तम् - ''मा चिन्तय। पर्जन्योऽस्मभ्यं मनागपि कष्टं न दास्यती'' ति।

असौ सुश्रावको गुरुवचनान्मौनी जातः। परं, मानसेऽवगच्छति स्म, यदियमस्ति केवला कतिपयक्षणीया क्रीडा। पर्जन्याद् रक्षणमशक्यप्रायम्।

परं महदाश्चर्यम्। गुरुवरा अग्रे विहरन्ति स्म, पर्जन्यस्तु गुरुवरेभ्योऽनतिदूरे पश्चात् स्थित्वाऽविरामेण वृष्टिं कुर्वन् वर्धते स्म। जाने अग्रे गुरुवराणां विहारः, पृष्ठे च मेघस्य विहारः। निरन्तरं पञ्चघटिकां यावदिदमचलत्। सुरक्षिता गुरुवरा विघ्नं विना घाटकोपरनगरं समासादितवन्तः।







'उत्कृष्टचारित्रधराणां - ब्रह्मचारिणां चिन्तितमुक्तं च सहजं सफलीभवेत्' इति वचनमत्र सार्थकं दृश्यते । यतो गुरुवरा उच्चचारित्रवन्तः - नैष्ठिकब्रह्मगुणधारका आसन्।

तदा गुरुवरैः सह विहरन् सुश्रावको नाम घाटकोपर-तपागच्छसङ्घस्याऽग्रिमः सङ्घसेवकः 'संघवी श्रीमनसुखलाल-हेमचन्द्रः' इति। वृत्तमिदं घाटकोपरस्य प्रवचनसभासु तेन नैकशश्चमत्कारस्वरूपेण वर्णितमासीत्।

इदं वृत्तं न कश्चिच्चमत्कारः, न च कश्चित् काकतालीयन्यायः, परमेकं वचनसिद्धिरूपमासीत्। गुरुवराणां साधनाप्रचुरस्योच्चश्रामण्यस्य साक्षात्प्रभावस्वरूपमासीत् तत्।

एतस्मिन् विशेषः - चमत्कारवार्तासु गुरुवराः सर्वदा पराङ्गमुखाः, परं तत्रभवतां पुण्यमेव - उच्चजीवनसामर्थ्यमेव तादृगासीद् येनैतादृशाः प्रसङ्गाः सहजा भवन्ति स्म। इमं सन्दर्भमङ्गीकृत्य स्मरामि रघुवंशकाव्यगतोऽयं श्लोको यथा -

लौकिकानां हि साधूना-मर्थं वागनुधावति।
ऋषीणां पुनराद्यानां, वाचमर्थोऽनुधावति।।

भावार्थोऽयम् - लौकिक-सामान्यसाधूनां जनानां च वाणी प्रस्तुतपदार्थाननुसरति। सम्मुखे यादृशः पदार्थो भवेत्तादृशं ते वदन्ति। परं, पूर्वऋषीणां महापुरुषाणां वार्त्ता विशिष्टाऽस्ति। ते महापुरुषा यथापदार्थं-यथाद्रव्यं वा न वदन्ति। किन्तु, तेषां वचनानुरूपमेव पदार्थोऽनुधावति। पूज्यपादगुरुवरा अपि एतत्तुल्या सिद्धवचना महापुरुषा आसन्निति सुगम्यतेऽनेन प्रसङ्गेन।



वने रणे शत्रुजलाग्निमध्ये,
महार्णवे पर्वतमस्तके वा।
सुप्तं प्रमत्तं विषमस्थितं वा,
रक्षन्ति पुण्यानि पुराकृतानि।।



## २४ उदारचरितानां तु वसुधैव कुटुम्बकम्

महापुरुषाणां ह्रदयं स्यात् कीदृशम्? विश्वसदृशं विशालं मेघसदृशं चोदारम्। तच्च स्याद् 'मामकं-तावकमि'ति भेदरेखापरम्। तद् ह्रदयं सर्वजीवानात्मीयान् गणयेत्। गुरुवरा अप्यासन् महापुरुषाः, तस्माच्चैवोक्तविधविशालोदारह्रदयेश्वरा अपि। अत एवान्यगच्छीयसङ्घानां श्रमण-श्रमणीनां च कार्याणि आत्मीयतापुरस्सरं ते कुर्वन्ति स्म।

मुम्बईस्थितचेम्बुरनगरे प्रवृत्तैषा तेषां ह्रदयविशालतादर्शिका घटना-

अस्मिन् क्षेत्रे तपोऽञ्चलपार्श्वचन्द्रेति गच्छत्रय्या अनुयायिनः साहचर्येण गुरुवराणां यथामार्गदर्शनं सर्वधार्मिकप्रसङ्गेषु सम्मील्योत्सवान् कुर्वन्ति स्म। क्वचित् सामाचारीभेदात् तपोगच्छीयपर्युषणापर्वणोऽञ्चलगच्छीय-पर्युषणापर्व पूर्वमागच्छति स्म।

एकदा गुरुवराणां चतुर्मासं निकटस्थे सङ्घेऽभवत्, तदा ईदृशः प्रसङ्गश्चेम्बुरमध्ये समुपस्थितवान्। अञ्चलगच्छीयः सङ्घो गुरुवराणां समीपमागतवान्, बारसासूत्रादिवाचनार्थं च श्रमणाय विज्ञप्तवान्। विशालह्रदयेशगुरुवरा दीर्घदृष्ट्या प्रणालिकाभेदेऽपि त्वरितमेव तदर्थं स्वश्रमणयोर्बारसासूत्रपठनार्थमनुमतिं दत्त्वाऽञ्चलसमुदायस्याराधनायामनुग्रहवन्तोऽभवन्। ततःपरमीदृशं न सकृत्, परं नैकशो भूतम्। गुरुवराणामभिप्रायस्तेषु सर्वेषु प्रसङ्गेषु एवमासीत् - "गच्छ-मान्यता-परम्पराभेदा अस्मिन् काले विशेषेण सम्भवन्ति। यतो वयं सर्वे छद्मस्थाः स्मः। ततो वयमस्मदीयसुगृहीताराधनां श्रद्धापूर्वमाराध्नुयाम। इतश्चाऽऽन्येषां परम्पराविषये सर्वथा विमुखा अपि न भवेम। प्रत्युत शक्यसहकारवन्तो भवेम। वयं परस्परसहयोगेन संवसेम, तदेव सङ्घशासनहितार्थमस्तीति।" चिन्तनमिदं गुरुवराणामान्तरिकविशालतां सुचारु व्यनक्ति।

* * *




સંવત્સરી પર્વ



अथ गुरुवराणां हार्दिकौदार्यस्यैकतमः प्रसङ्गः।

पार्श्वचन्द्रगच्छीय-श्रीवसन्तप्रभाख्यसाध्वीवर्यया विषयेऽस्मिन् स्वानुभवो गुर्जरभाषायां प्रकाशितः स च संस्कृत इत्थम् - ''मुम्बईमहानगरेऽस्मदीयपार्श्वचन्द्रगच्छीयेषु दीक्षादिधर्मप्रसङ्गेष्विमे गुरुवरा नित्यमात्मीयगुरुजनवद् विज्ञप्तिं स्वीकृत्य स्वयमुपस्थिता भवन्ति स्म, शिष्यपरिवारं वा प्रेषयित्वा प्रसङ्गशोभावृद्धिं कुर्वन्ति स्म। अस्माकं दृष्टिपटलेऽद्याऽपि एतादृशानि मधुराणि नैकानि प्रसङ्ग-स्मरणाण्युपस्थितानि सन्ति।''

श्रमणीवर्ययाऽनया परमतारक-परमात्मश्रीमहावीरप्रभूणां 25तमीं निर्वाणशताब्दीमनुलक्ष्य 'मङ्गलं भगवान् वीरो याने श्री महावीर जीवनज्योति' इत्याख्यं पुस्तकमालिखितम्। पुस्तकसम्मार्जनं गुरुवरैः क्रियेतेति तस्या हृदयेच्छा। तया लज्जानतास्यसाध्वीवर्यया बहुविचारान्ते स्वमनोभावा गुरूणामग्रे व्यक्तीकृताः। परिणामः कीदृश आगत? इति विषये सा श्रमणीवर्यया गुर्जरभाषायां लिखितं तदत्र संस्कृते दर्श्यते।

''अस्माभिः पुस्तकसम्मार्जनाय गुरुवरा विज्ञप्ताः । वयं सर्वाः साऽशङ्का आस्म। परं महान् विस्मयः। गुरुवरैः पुस्तकस्य प्रत्येकान्यक्षराणि दृष्ट्वा यथायोग्यं सर्वं सम्मृष्टम्, शुभाशीर्वादयुतं चोद्बोधनमपि मिष्टं लिखित्वा पुस्तकप्रतिरस्मभ्यं प्रदत्ता। तदानीमस्माकं प्रसन्नता कल्पनातीता सञ्जाता। अन्यगच्छीया इमे शासनधुरीणा आचार्यवराः शासनधर्मयोः कार्यशृङ्खलायां सम्बद्धा भवेयुरिति सहजम्। तथाऽपि अन्यगच्छीयलघुश्रमण्या लिखितपुस्तकस्य सम्मार्जनं कृत्वा प्रसादपरा आचार्यप्रवरा आन्तरिकौदार्यं दर्शयेयुस्तदस्ति विरलं सत्यम्। नूनं जिनशासनमेतादृशैर्गुरुवरैरेव विजयतेतराम्।...'' इमानि हार्दिकपदानि गुरुहृदयोपले लाञ्छिताममूं सूक्तिं दर्शयन्ति -

**'अयं निजः परो वेति, गणना लघुचेतसाम्।**

**उदारचरितानां तु, वसुधैव कुटुम्बकम्।।'**





भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्भूरि विलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः,
स्वभाव एवैष परोपकारिणाम्॥

## आकाशविजेत्री हार्दिकी विशालता २५

''जिनालयस्य मुख्यगर्भगृहस्यादेशहेतोर्युष्माभिर्मुम्बई–वालकेश्वर–तीनबत्तीजिनमन्दिरस्य ट्रस्टीमहोदयानां पार्श्वे गन्तव्यम्। आदेशग्रहणाय च तेऽनुनेतव्याः।'' शङ्खेश्वर–आगममन्दिरप्रेरकः पूज्यपन्न्यासश्रीअभ्युदयसागरगणिवरः संस्थाया ट्रस्टीवर्यान् व्याचष्टे स्म–''एतर्हि तत्र वालकेश्वरे पूज्याचार्यवर्यश्रीधर्मसूरीश्वरा विराजन्ते। युष्माभिरयं वार्त्ताव्यतिकरः पूर्वं तेभ्यो ज्ञापनीयः ।यतस्तेऽपि तत्रस्थट्रस्टीमहोदयान् प्रेरयिष्यन्ती''ति।

तदानीं शङ्खेश्वर –आगममन्दिरनिर्माणे धनस्यावश्यकता बहुतराऽऽसीत्, अत्रान्तरे संस्थाप्रेरकगुरुणा कृतमिदं सूचनं शिरसि धृत्वा श्रीरमणलालगान्धीप्रमुखसंस्थासञ्चालका वालकेश्वरं (मुम्बईमहानगरं) गतवन्तः। मुम्बईगमनपश्चाद् युष्माभिः प्रथमं पूज्यपादाचार्यप्रवरश्रीमद्धर्मसूरीश्वराणां समीपं गन्तव्यमि'ति कथितमासीत् संस्थाप्रेरकपूज्यवर्येण। किन्तु कुशाग्रैः (?) ट्रस्टीवर्यैरन्यदेव चिन्तितम्–'अस्माद्धेतोः श्रीधर्मसूरीश्वरसमीपगमनेन कृतम्। वयं ट्रस्टीमहोदयानामेव सम्पर्कं कुर्महे' इति। यतोऽपरसमुदायस्थाः श्रमणाः अन्यसमुदायस्थश्रमणानां कार्याणि प्रधानतो न कुर्यादिति तन्मन्तव्यमासीत्। अतः ट्रस्टीवर्याः स्वयं वालकेश्वरस्य प्रमुखट्रस्टीमहोदयस्य निवेशमयुः। तेषां जिनालय–मुख्यगर्भगृहयोजनाया धनाङ्कः ८१,००० रूप्यकाणि आसीत्। अनुवार्तालापं प्रमुखट्रस्टीमहोदय आदेशग्रहणाय उत्सुको जातः। परमेतस्मै कार्याय तस्य ५१,००० रूप्यकाणामेव धनाङ्कोऽभिप्रेत आसीत् । आगममन्दिरट्रस्टीमण्डलस्य धनावश्यकता बहुतरा आसीत् । इतः ३०,००० रूप्यकाणां क्षतिरपि असहनीयाऽऽसीत्। ते किङ्कर्तव्यमूढाः सञ्जाताः 'अथ किं कर्तव्यमि'ति।

अन्ततस्ते प्रतिश्रये पूज्यधर्मसूरीश्वराणां पार्श्वमागतवन्तः। पूर्वापरं च सर्ववृत्तान्तं तेभ्यः कथितवन्तः। 'आदाविमे नाऽऽगताः' इति किञ्चिदप्यविचार्य गुरुवरा एकं लघु पत्रखण्डं गृहीतवन्तः। तस्योपरि मुख्यं ट्रस्टवाहकं श्रीसितापचन्दवर्यमुद्दिश्य पङ्क्तिद्वयमितं लघुसन्देशमालिखितवन्तः शङ्खेश्वरकार्यवाहकांश्च पुनस्तत्र प्रेषितवन्तः। सन्देश एवमासीद् –''श्रावकबन्धवो जैनसंस्थायाः कार्यार्थं युष्मद्गृहाङ्गणमागच्छे–युस्तदानीं युष्माकं







**कर्तव्यमिदमेव स्याद्, यत्तेषामितस्ततो भ्रमणं न भवेत्।''** अस्य भावार्थः स्पष्ट एवासीत्।

गुरुवरहस्ताक्षराणामचिन्त्यः प्रभावः सञ्जातः। अत एव असौ ट्रस्टीवर्यः ८१,००० रूप्यकाणां दानमचिरेणैव स्वीकृतवान्। पश्चात् स शङ्खेश्वरस्य ट्रस्टीवर्याश्च मिलित्वा पूज्यश्रीधर्मसूरीश्वरानुपसर्प्य सुखोदन्तमिमं ज्ञापितवन्तः। तदा तत्र परमोत्कृष्टं वृत्तं जातम्। औदार्ये- शैर्धर्मसूरीश्वरैरुक्तम्-''इयं तु युष्माभिस्तेषामावश्यकता पूर्णीकृता। मत्समीपं हर्षाभिव्यक्तये यूयं चेदागताः स्थ, तर्हि ९१,००० रूप्यकाणां दानं कर्तव्यम्।'' त्वरितमेव पूज्यगुरुवराणामिमानि वचनान्यपि अमुना ट्रस्टीमहोदयेन श्रीसितापचन्दवर्येण शीघ्रं शिरोधृतानि।

अस्य वृत्तस्य शब्दशः साक्षात्कर्ता शङ्खेश्वर-आगममन्दिर-प्रमुखवर्यश्रीरमणलालश्रेष्ठी महतीसु सभासु प्रसङ्गमिमनुलक्ष्य बहुशः कथयति-

''वयं गुरुवरप्रभावं साक्षात्कृतवन्तः,अन्येषां कार्याणि प्रति तत्रभवतां गुरुवराणामौदार्यमार्जवं च दृष्ट्वा वयं विस्मयाऽन्विता अपि सञ्जाताः। एतस्मिन्नपि आश्चर्यजननी महती वार्त्ता त्वियम्, यदुक्तकार्य-सिद्धेः पश्चादपि तत्रभवद्भिर्गुरुवरैः स्वनामाङ्कनार्थं प्रत्यक्षः परोक्षो वा सङ्केतोऽपि न कृतः। एतादृशा निरीहचित्तास्ते गुरुवरा आसन्...।''

यस्य हृदयमन्दिरे जिनशासनं विराजमानं स्यात्, ते शासनधौरेया आचार्या एतादृशा औदार्यशीलाः स्युः। ते **'मम तव'** इति विचारकर्तारो न स्युः। परं केनाऽपि प्रकारेण नभोमण्डले जिनशासनपताका स्फुरायमाणा भवेदिति चिन्तकाः स्युः। अत एवोक्तम्-**'आचार्या जिनशासनोन्नतिकराः'** इति।

स्पर्शमणेःप्रभावः श्रूयते-'तत्संयोगिलोहं काञ्चनमयं भवति' इति। मणेः स्पर्शस्याऽयं प्रभावः। गुरुवरा आसन्नस्मात् स्पर्शमणेरपि विशेषाः। गुरुवराणां प्रभावः स्पर्शमणेः प्रभावाद् नूनमधिकोऽनुभूतः। यतः स्पर्शमणिसंयोगेन लोहं लोहलक्षणानि विमुच्य सुवर्णगुणानङ्गीकरोति, परं स्वयं स्पर्शमणिस्तु न भवति। इह तु गुरुवरसुसङ्गेन जनाश्चिन्तामुक्ता-श्चिन्तनयुक्ताः, संशयमुक्ताः शातायुक्ताः, कषायमुक्ताः करुणायुक्ताः, वैरमुक्ताः प्रेमयुक्ताः, दुर्गुणमुक्ताः सद्गुणयुक्ताश्च भवन्ति। अन्ततो गुरुवरसदृशा एव भवन्ति।

अत एवोक्तं गुरुवराः स्पर्शमणेरपि अधिका इति। तेषां साक्षात् पवित्रसंस्पर्शलाभः कामं न प्राप्तो मया। परं, प्रसङ्गमाध्यमतस्तेषां पवित्रजीवनस्पर्शलाभस्तु प्राप्यतेऽद्य, सोऽपि हर्षावलेर्महत्कारणमस्ति।





यथा यथा निरीहत्वं,
महत्त्वं हि तथा तथा

## परोपकाराय सतां प्रवृत्तयः २६

सौराष्ट्रप्रान्तस्य पोताशयपुरं 'धोलेरा'इत्याख्यम्। तदानीं वैभवशालिनगरेषु अन्यतमं तन्नाम। तत्र विशालजिनालयोपाश्रयादिधर्मस्थानान्यपि आसन्। परं, समयान्तरे वैभवः पराङ्मुखोऽभवत्। जिनालयादिस्थानान्यपि जीर्ण-शीर्णान्यभवन्। समग्रजिनालयः जीर्णोद्धारार्हः सञ्जातः। किन्तु तत्कृते स्थानिकसङ्घोऽक्षम आसीत्। तस्मिन् संवत्सरे तत्र पूज्याचार्यश्रीमद्विजयसद्गुणसूरीश्वराः (तदानीं मुनिपदधारकाः) विराजन्ते स्म। ते धैर्यमुत्साहं च प्रदाय श्रीसङ्घं प्रेरितवन्तः-''भोः! मुम्बापुर्यां पूज्यपादयुगदिवाकराचार्यदेवश्रीमद्विजयधर्मसूरीश्वरसमीपं गन्तव्यम्। यद्यपि, अहमपि तेभ्योऽपरिचितोऽस्मि। परं, तेषां ख्यातिपरिचयोऽस्ति। अहं तेषामुपरि विज्ञप्तिपत्रं लिखामि। सर्वं सुष्ठु भविष्यति।''

कार्यकर्तारो गमनार्थमुद्यता जाताः। ते मुम्बईमहानगरं गताः। स्तोकदिनैश्च कार्यसिद्धिं प्राप्य पुनरागता अपि। तत्रान्तरे कार्यकर्तृभिरनुभूतं वृत्तं सद्गुणसूरीश्वरैः शब्दस्थं कृतम्। ते लिखितवन्तः - ''कार्यकर्तारो मुम्बईमहानगरमगच्छन्। आदौ द्वित्राणि विपक्षीयस्थानानि गताः। परं, तत्र कार्यसिद्धिर्न जाता। अन्ततस्ते वालकेश्वरमुपगुरु याताः। सादरं सत्कृतास्ते पञ्चषेषु च दिनेषु बहुधनं प्राप्य प्रत्यावृत्ताः। नैतावद्, अपि तु पूज्यप्रवराणामाचार्यश्रीमद्विजयधर्मसूरीश्वराणां महानुभावत्व-औदार्य-प्रभावादिगुणानपि अनुभूयाऽऽगताः। तेषामाचार्यवर्याणां महती शासनप्रीतिरपि दृष्टा। अन्यत्र कटुप्रतिभावा अनुभूतास्तेऽपि तैः कथिताः। इतो गुरुवरे तु प्रत्याकाङ्क्षाऽपि न दृष्टा। **'सर्वे सङ्घा अस्मदीया एव सन्ती'ति स्नेहेन तत्रभवद्भिः कार्यं कृतं, ततो मानसं गुरुवरान् प्रति विशिष्टबहुमानभावयुतमवनतं च जातम्।**







अद्य केचित् सङ्घस्य स्वल्पं कार्यं कृत्वाऽपि शिला-लेखाँश्चित्रपटाँश्चाऽपेक्षन्ते। इयं प्रथा नूनमनर्हा नाऽऽवकार्या। प्रतिपक्षे पूज्यवरा आसन्नादर्शमहापुरुषाः। तत्रभवन्तः कदाऽपि न कृतवन्तः स्वनामादिचिन्ताम्। यद्यपि, कृतज्ञसङ्घैस्तत्सर्वं स्वत एव क्रियेत तर्हि न बाधः। परं, पूज्यवरैस्तादृशो दुराग्रहः कदाऽपि न सेवितः। तेषां जीवनयात्रा प्रधानत इममेवाऽऽदर्शं शिक्षतेऽस्माकमिति मम मन्तव्यम्। निःस्वार्थदयादृष्टीनां तेषां कार्याणि जिनशासनगगने चामीकरवर्णेषु 'यावच्चन्द्रदिवाकरौ' प्रकाशमानानि भविष्यन्ति....''

सहृदया इमे शब्दाः पूज्यपादाऽऽचार्यदेवश्रीमद्विजय-सद्गुणसूरीश्वरैर्लिखिता आसन्। **एवमनुभूयते यत् कदाचित्ते गुरुवराः 'परोपकाराय सतां प्रवृत्तयः' इति जीवनमन्त्रधारका आसन्।** तेषां जीवनमौल्यानि नूनं विरलान्यासन् अत एव औदार्यपूर्णानि महाकार्याणि तस्मिन् काले नैकेषु स्थलेषु सञ्जातानि। एकस्मिन्नाङ्ग्लसुवाक्ये कथितमेवम् - **A Self-evident truth or good need not to be advertised...** भावार्थोऽयम् - स्वतः स्वभावत उत्तमद्रव्याणामुत्तम-जनानां च कृते प्रचार आवश्यको न। तयोः प्रसिद्धिः स्वयमेव भवति। अत एव तेषां निःस्पृहगुरुवराणां नाम सर्वजनैरद्यापि भावतो गृह्यते।

तेषां पूज्यपादाब्जगुरुवराणां सर्वेषां हृदयेषु निवसन्त्यै नित्यं मधुरं हसन्त्यै प्रतिकृतये नमनं तु नैकशः करोमि। परमद्य भवति तान् चित्रपटस्थगुरुवरान् प्रार्थयितुं मनः - ''अयि गुरुवराः! हृदयस्थाः! अहमपीच्छामि मज्जीवनमौल्यविकासं, मज्जीवने सौजन्यविकासम्। भवतामिव सौजन्यम्। विनयपूर्णं - विवेकपूर्णं - अनाकाङ्क्षापूर्णं - उदारतापूर्णं - प्रभावनापूर्णं - मधुरतापूर्णं - करुणापूर्णं - सौम्यतापूर्णं च सौजन्यम्...।

अयि गुरुवराः! प्रसादपराः! अयमस्ति मदन्तरनादः। विश्वासोऽप्यस्ति यद् भवतामनर्गलोऽस्ति मयि आशीर्वादः... इति।''




वदनं प्रसादसदनं,
सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं,
येषां केषां न ते वन्द्याः।।

## विषादपरेषु प्रसादपरा: २७

''गुरुदेव! आशीर्वादो देय:, यतो मरणं समाधियुतं भवेत्।'' शान्ताक्रुझ–मुम्बईनिवासिन: करसनभाईनामकस्य जैनश्रावकस्येमे शब्दा:। तस्य दीनस्वरं श्रुत्वा पूज्यपादयुगदिवाकरगुरुवरा: करुणार्द्रा अभवन्नितराम्।

वस्तुत: परमार्थोऽयम्–'हरितकुष्ठ:' इति रोग: (गुर्जरे 'रक्तपित्त' इति) अशुभकर्मोदयेन 'करसनभाई' इत्याख्यश्रावकतनुं व्याप्तवान्। तस्य आजीविकासाधनं समर्यादमासीत्। अतस्तेन 'K.E.M.' इत्याख्ये रुग्णालये दीनचिकित्साविभागे चिकित्साऽऽरब्धा। किन्तु, तस्मिन्नातुरालये तस्य व्याधिरल्पसमयेन वृद्धिं गतवान्, यतो दीनचिकित्साविभागे व्याधिग्रस्ता बहव आसन्। किञ्च, नि:शुल्कोपचारत्वाद् वैद्यका उपचारकारकाश्चापि स्वैरवृत्तय: (=स्वेच्छाचारिण:) आसन्।

अन्तत आमयेन पराभूत: स सस्वजनो गृहं गच्छति स्म रुग्णालयाद्। मध्येमार्गं स जनश्रद्धातीर्थ–चेम्बुरनगरस्थयुगादिदेवपरमात्मश्रीआदीश्वरभगवतामन्तिमदर्शनं चिकीर्षु: सञ्जात:। अत: सर्वे चेम्बुरतीर्थमागता आदीश्वरप्रभुंश्च प्रणम्य सफलनेत्रा बभूवु:। पूज्यपदकजा गुरुवरा अपि तदानीं तत्रैव विराजमाना आसन्। अतो गुरुवन्दनाय सर्वे प्रतिश्रयं गता:। निकषा गुरुवरं वासक्चूर्णं गृह्णता तेन श्रावकेन पूर्वोक्तो दु:खदो व्यतिकर: कथित:।

करुणामयं गुरुवरहृदयं श्रुत्वेदमतिकरुणार्द्रं जातम्। परार्तिं दृष्ट्वाऽपि महापुरुषाणां हृदये कारुण्यं न स्यादिति वार्ताऽपि कुत: शक्या ? यत उक्तं सूक्तौ **'परदु:खं कृपावन्त:, सन्तो नोद्वीक्षितुं क्षमा:'** इति।

''तत्रभवद्भि: सवात्सल्यं पृष्टम्–''कथमेवमशुभं वदसि ?''

''गुरुदेव ! चरमकक्षो हरितकुष्ठस्तनुं व्याप्तोऽस्ति। चिकित्सका अपि प्रक्षालितहस्ता: सन्ति।''







गुरुवरा आहुः–''चिकित्सकैः कामं हस्तौ प्रक्षालितौ। परं, अनेन चेम्बुरनगरीयप्रथमतीर्थपतिना करौ न प्रक्षालितौ। जगद्गुरुं श्रद्धेहि। तद्भक्त्याऽशुभान्यपि कर्माण्युपशान्तानि भवन्ति । त्वं तावद् मरणाय मनसा सज्जोऽसि। तर्हि अन्तिमतरणोपायस्वरूपं धर्मफलकं कथं न ग्रहणीयम्? ज्ञानिनाऽपि शास्त्रेऽभिहितम्– **'अबन्धूनामसौ बन्धु–, रसखीनामसौ सखा। अनाथानामसौ नाथो, धर्मो विश्वैकवत्सलः।।'** इति। ततस्त्वया मत्कथनमनुसृत्य शुभोपायः कर्तव्यः। तस्य साधु फलं स्यादित्यस्ति शक्यम्।''

निरुत्साहः स श्रावको गुरुवराणामुपरि तेषां च सवात्सल्यानि वचनान्युपरि श्रद्दधानोऽभवत्। गुरुवरप्रेरणामनुसृत्य स प्रथम–तीर्थाधिपतीनां जापमारब्धवान्। अलवणाऽऽचाम्लपूर्वस्य वर्धमानतपसः प्राथमिकसाधनामपि स प्रक्रान्तवान् । विंशतिदिनानि यावत् साधना कृता। श्रद्धायुतसाधनाया विरामे जाते श्रीपालकुमारस्य जीवनघटनापुनरावृत्ता जाता। हरितकुष्ठः प्रायेण तिरोभूतवान्। क्रमेण च स श्रावकः सम्पूर्णतया नीरोगीभूतः।

स्वजीवने साक्षादनुभूतचमत्कारस्य तस्य श्रावकस्य चेतसि स्वजीवनतारकेषु गुरुवरेषु एतादृशी श्रद्धा घनीभूता, यद् गृहगमनपश्चादपि स तत्प्रेरणां न विस्मृतवान्। साधनारतः सोऽधुनाऽपि जीवति। एतर्हि वैक्रमीये २०६९ तमे संवत्सरे वैशाखकृष्णायां द्वितीयायां, रविवासरे ७५ वर्षीयः स सुश्रावकः श्रीधर्मधामनागेश्वरपार्श्वनाथतीर्थेऽस्मदीयपूज्यपादगुरुवरान् वन्दितुमागतस्तदानीं तस्य वर्धमानतपसश्चतुःसप्ततितमालिः–७४ तमी श्रेणी पूर्णतां प्राप्ताऽऽसीत्। हरितकुष्ठेन पराजयं प्रति गच्छतः स्वात्मनो विजयवरदानस्य दातॄणां परमतारकचेम्बुरतीर्थपतीनां वर्धमानतपसां, युगदिवाकरगुरुवराणां चोपकारं नवजीवनदातृत्वेन स नित्यं मन्यते। अद्यापि नूतनाचाम्लालेः प्रारम्भात् प्राक् स स्वस्योपकारिणां गुरुवराणामष्टोत्तर–शतकृत्वो नामस्मरणं करोति सनियमम् ।

प्रस्तुतघटनायां प्रथमतीर्थेश्वरऋषभदेवपरमात्मनां निःसीमा कृपा वर्धमानतपसश्च प्रभावोऽपि निःसंशयं दृश्यते । परं, अमूं घटनां यदा वयं गुरुदेवजीवनप्रसङ्गत्वेनाऽऽलिखामः, तदानीं तेषां परमोपकारिणां स्तवनाय नूनं कथयिष्यामः–(१) कल्पवृक्षः (२) कामधेनुः (३) चिन्तामणिः, एते त्रयोऽपि सत्तमा याचितमेव यच्छन्ति। परं, सतां तु सङ्ग विनैव याञ्चां सर्वं प्रदत्ते। यतः सन्तो विषादपरेषु जनेषु भवन्ति प्रसादपराः – करुणापरा नित्यं नितान्तम्।





सूरिस्तीर्थं जङ्गमं मर्त्यलोके,
सूरिस्तत्त्वालोकने हस्तदीपः।
सूरिर्मोक्षश्रीसमायोगदूतः,
सूरिः साक्षाद् धर्मबन्धुर्बुधानाम्।।

# आर्जवस्वामिनः पूज्यवराः २८

जगति जनानां त्रयो विभागाः सन्ति। अन्येषां पदानि विलुप्य निजपादन्यासको मानव उच्यते 'दुर्जनः' इति। परेषां पदानि अनतिक्रम्य निजपादस्थापक उत्तममनुष्योऽवबुध्यते 'सज्जनः' इति। स्वस्य च पदानि विलुप्तानि विलुप्यन्ते वेति चिन्ताऽपि येन न क्रियते, स निष्कामः सर्वोत्तमो महापुरुषः कथ्यते नितरां 'विरक्तजनः' इति।

विरक्तजना विश्वेऽत्यल्पा दृश्यन्ते। तेषु विरक्तजनेषु अन्यतमा आसन्नस्मद्गुरुवराः पूज्ययुगदिवाकराचार्य-श्रीधर्मसूरीश्वराः। स्वगौरवोपरि यदि कोऽपि जनो विना कारणं चिकिलमुच्छालयेत्तदा समता सुदुर्लभा भवति। गुरुवरा एतादृशे कठिनसमयेऽपि विरक्ताः समतामयाः स्थिता आसन्। तेषामविच्छिन्नप्रसन्नताया ज्ञापकोऽस्ति विशिष्टप्रसङ्गोऽयम् -

तस्मिन् समये गुरुवरनिश्राप्रेरणाभिश्च मुम्बईमहानगरीयानि नैकान्युपनगराणि जिनालयोपाश्रयादिभिः समलङ्कृतानि भवन्ति स्म। अतः शासनहितायैव पूज्यगुरुवर्याणां मुम्बईमहानगरेषूपनगरेषु चाऽनवरतं षोडश चतुर्मासानि अभवन्।

यद्यपि, प्रत्येकं चतुर्मासं भवति स्म विविधसङ्घेषु विभिन्नोपनगरेषु च। किञ्च, शेषकाले तु गुरुवरा गुजरात-महाराष्ट्रादिषु दूरं-सुदूरं यावद् विहृत्य तत्रत्यशासनकार्याण्यपि कारयन्ति स्म। तथाऽपि गुरुवरैर्निरन्तरं षोडश चतुर्मासानि (विक्रमसं. २०१६ तः २०३२) मुम्बईमहानगरोपनगरेषु कृतानीति निमित्तं पुरस्कृत्य कश्चिद्बुधजनः 'मुम्बईसमाचार' इति वृत्तपत्रे गुरुवराणां मुम्बईमहानगरे जातानि चतुर्मासानि टीकाप्राधान्येन समीक्षितवान्।







इमं वार्ताव्यतिकरमधीत्य गुरुवराणां गुणानुरागी भक्तवर्गस्तस्य प्रबलप्रतीकाराय प्रत्युत्तराय च सज्जीभूय सद्य प्रतिश्रये गुरुसमीपमागतः स्वाऽऽशयं च ज्ञापितवान् । तदा पूर्णस्वस्थैर्गुरुवरैः सस्मितमेकः संस्कृतश्लोक उदितस्तथाहि–

**'अरुन्तुदैः वचःशस्त्रैस्तुद्यमानो विचिन्तयेत् ।**
**चेत्तथ्यमत्र कः कोपः, अथवोन्मत्तभाषितम्।।'**

पश्चाद् गुरुवरैः श्लोको विशदीकृतः – ''**यदा यदा वयमित्थं निराकृता भवेम, तदा तदा द्वौ विचारौ कर्तव्यौ – एतस्मिन् किञ्चित् तथ्यमस्ति न वा ? (१) यदि तथ्यं भवेत्तर्हि स्वदोषान् प्रति जागृतिरावहनीया, (२) यदि च तथ्यं न भवेत्तर्हि सा टीकोपेक्षणीया ।** आभ्यां विनाऽन्ये सर्वे विकल्पा अपसार्याः। प्रत्युत्तरं तु सर्वथाऽनावश्यकम्। सुज्ञा जना मत्कार्याणां मूल्याङ्कनं सुष्ठु करिष्यन्त्येव।'' भक्तवर्गस्त्ववनतो बभूव शिरसा गुरुवराणामिमामद्भुतसहिष्णुतां सरलतां च विलोक्य।

अस्य प्रतिभावस्य शोभनं फलमपि लब्धम् ।

उपरोक्तं वृत्तं यथास्थितं कर्णपरम्परयाऽमुष्य टीकाकृतो जनस्य कर्णविषयमभवत्। गुरुवराणामिमां महानुभावतां ज्ञात्वा सोऽपि साऽऽश्चर्यः सञ्जातः । स चाऽऽगत्य गुरुपार्श्वे क्षमायाचनां कृतवान्। तदानीमपि तेन सह सवात्सल्यं सार्जवं च मिष्टमालापं कृत्वा गुरुवरैः स आत्मीकृतः । अमीषां प्रेममूर्ति–सरलतामूर्तिगुरूणामेकमुत्तमं प्रसादचिह्नं निजहृदये स्थापित्वा गतवान् सः।

तुल्यनिन्दास्तुतीनां गुरुवराणामिमां हृदयग्राहिणीं साधुवृत्तिं सहिष्णुतां सरलतां च दृष्ट्वा आङ्ग्लभाषीयसुवाक्यस्य स्मरणं भवति – **'It is simple to become rich, but it is difficult to become simple'** इति। अस्य भावार्थोऽयं – यद् 'समृद्धिप्राप्तिरद्यापि सुकराऽस्ति, परं सरलताप्राप्तिस्त्वतिदुष्कराऽस्ति।'

आगम्यताम्, एतादृशी आर्जवताऽस्माभिरपि स्वजीवन आविष्क्रियताम्। जीवने सारल्यस्य प्राप्त्यै वयमार्जवस्वामिगुरुदेवेभ्यः सान्तःकरणं वन्देमहि प्रार्थयेमहि च।







घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धम्,
छिन्नश्छिन्नः पुनरपि पुनः स्वादुरेवेक्षुदण्डः।
तप्तं तप्तं पुनरपि पुनः काञ्चनं कान्तवर्णम्,
न प्राणान्ते प्रकृतिविकृतिर्जायते ह्युत्तमानाम्॥



## परमभक्तिवन्तो गुरुभगवन्तः २१

'आसन् गुरुवराः कीदृशाः ?' इति प्रश्नो यदि उपस्थितो भवेत्तर्हि संक्षिप्तमुत्तरं मया काममनया रीत्या दीयेत 'गुरुवरा आसन् (१) शासनाधीशसमर्पितजीवनाः (२) शास्त्रसमर्पितजीवनाः (३) साध्वाचारसमर्पितजीवनाश्च।' भावार्थोऽयम् 'गुरुवरैर्दर्शन-ज्ञान-चारित्ररूपरत्नत्रय्यै स्वजीवनं समर्पितमासीत्।'

यद्यपि, गुणाकरगुरुवरानेतान् समाख्यातुं ७०० दलीय-विशालकाय- युगदिवाकराख्य आकरग्रन्थोऽपि अपूर्णः स्यात्, तत उक्ता वाक्यत्रयी तु गुरुवरसंस्तवाय सर्वथा एवाऽसमर्था भवेत्। तथाऽपि वो समासतः संस्तवार्थमिमानि त्रीणि वाक्यानि नूनमुचितानि भविष्यन्ति। वयं यथाप्रस्तुतं प्रत्येकं वाक्यं प्रसङ्गत्रयेन निरीक्षामहे।

शास्त्रेषु प्रभुप्रेम त्रिविधं दर्शितम् - (१) प्रियम् (२) प्रियतरम् (३) प्रियतमं चेति। विवक्षितं पात्रं प्रति यदाऽन्तस्तले विशेषप्रेमानुभूयेत, तदा तत् प्रेम **'प्रियम्'** इति नाम्ना निगद्येत्। विवक्षितं पात्रं प्रति यदा परेभ्यो विशेषतरं प्रेम सञ्जायेत, तदा तन्नाम भवेत् **'प्रियतरम्'** इति। यदा च विवक्षितं पात्रं प्रति सर्वेभ्यो विशेषतमं प्रेम स्फुटीभवेद् हृदये, तदा तन्नाम स्यात् **'प्रियतमम्'** इति। प्रीतेरयं चरमः सर्वोत्तमश्चाऽस्ति प्रकारः।

चिन्तकाः कथयन्ति 'विश्वेऽस्मदीयानि प्रियाणि प्रियतराणि वा पात्राणि कामं कानिचिदपि स्युः। किन्तु प्रियतमं पात्रं तु परमतारकतीर्थकृद्भगवतो विना कोऽपि न भवितव्यः।' अस्मिन् जगति लोकनाथ एव प्रियतमो भवितुमर्ह इति तात्पर्यम्। अत एव योगिपुरुषेणानन्दघनमहोदयेन स्वकृतयुगादिदेवस्तवनान्तः पङ्क्त्याऽनया ज्ञापितं ननु **'ऋषभजिनेश्वर प्रीतम माहरो, और न चाहु रे कंत'** इति।







'प्रभुरेव मत्प्रियतमः' इति बुद्ध्या क्रियमाणा ईदृशी भक्तिर्भक्तजनस्य हृदये कञ्चिद् विशिष्टमनुभवं कारयेत्तर्हि नास्त्याश्चर्यम्। पूज्यपादगुरुवराणां कृते विश्वेशो न प्रियः, न प्रियतरः, परं त्वासीत् प्रियतमः। अत एवेदृशी विरलानुभूतिर्दैवात् तत्रभवद्भिरपि कृतासीत् । पायधुनीमण्डनगोडीपार्श्वनाथप्रतिष्ठासार्धशताब्दीमहोत्सवप्रसङ्गे प्रकाशितसार्धशताब्दीग्रन्थान्तः 'श्री गोडीजी महाराजनी गौरवगाथा' इति शीर्षकीयलेखमध्ये गुरुवराः स्वयं स्वानुभवं ज्ञापयति – ''केचनार्था आस्थाप्रधाना भवन्ति XXX पायधुनी–विजयदेवसूरिजैनसङ्घोपाश्रये चतुर्मासे शेषकाले च कृतस्थैर्योऽहं सायाह्ने प्रभाते च दर्शन–चैत्यवन्दनादि–प्रभुभक्तिं नित्यं करोमि । तत्राऽपि सायाह्ने भक्तिप्रसङ्गे दर्शन–चैत्यवन्दन–जपसमये श्रीगोडीपार्श्वनाथभगवन्तो जाने भावनिक्षेपेण समवसरणे सम्मुखासीना राजन्त इत्यनुभवो मम बहुशः सञ्जातोऽस्ति, स शब्दैर्नितरामकथ्योऽस्ति।

सायाह्नेऽस्मिन् जिनमन्दिरे प्रभुं प्रति दृष्टिं स्थिरीकृत्य पादघटिकापर्यन्तमपि शान्तमनसोपविश्येत चेन्मदनुभवः सुतरां सत्यः प्रतिभासेत।...''

अयं प्रभुसमर्पितस्यैकस्य भक्तात्मनः प्रभुभक्त्याऽनुभूतः श्रद्धाया रणत्कारोऽस्ति। नाऽयं कदाऽपि प्रश्नार्हः।

न्यायविशारद–न्यायाचार्य–महोपाध्यायश्रीमद्यशोविजय–महाराजवर्यैरेकस्मिन् स्थलेऽभिहितमस्ति यद्–

'सारमेतन्मया लब्धं, श्रुताब्धेरवगाहनात्।
भक्तिर्भागवती बीजं, परमानन्दसम्पदाम्।।'

अनुमानं भवति यदिमे शब्दा जिनेश्वरपर्युपासनायां तन्मयचित्तानां पूज्यवरसदृशानां भक्तजनानां परमभक्त्याः कृत एव जाने लिखिताः सन्ति ।





अद्य मे सफलं जन्म,
अद्य मे सफला क्रिया ।
अद्य मे सफलं गात्रं,
जिनेन्द्र! तव दर्शनात्।।

## प्रथमं चरणम् ३

वैक्रमीयं १९६९ तमं वर्षम्।

'लखतर'इत्याख्यो ग्रामः।

पर्वाधिराजपर्युषणमहापर्वणः शुभदिनानि।

मुनीनामयोगः, अभ्यस्तश्रावकाणां चाऽपि परोक्षता।

प्रारम्भिकदिवसाः केन प्रकारेणाऽपि व्यतीताः। नवरं, चतुर्दश्या विस्तृतप्रतिक्रमणक्रियायां महती विपत्तिः सृष्टाः। अतः सर्वैरपि चिन्तितम् – 'सांवत्सरिकप्रतिक्रमणसदृशी महती क्रिया वर्षमध्ये सकृदेव भवति। तत इयमाराधना भवितव्या शोभनैव। तदर्थं किञ्चिदपि कार्यम्' इति।

फलतः सङ्घनायका निकटस्थे वर्धमान(वढवाण)ग्रामीयसङ्घे सांवत्सरिकप्रतिक्रमणं कारयितुं विज्ञप्तिं प्रेषितवन्तः।

वर्धमानग्रामस्य सङ्घनायकैश्चिन्तितम् – 'सांवत्सरिकं गुरुतमं प्रतिक्रमणमन्यस्मिन् ग्रामे साधु कारयितव्यम्।' अतस्तैः शीघ्रमभ्यासवतः क्रियाकारस्याऽन्वेषणं प्रारब्धम्। उपक्रमोऽयं भाईचन्दकुमारेण ज्ञातः। मातुरनुज्ञां प्राप्य स स्वतः सङ्घाग्रण्यां पुर उपस्थितवान्, प्रतिक्रमणार्थं च गन्तुं स्वस्यानन्यचित्ततां दर्शितवान्। सङ्घनायका भाईचन्दकुमारेण सुपरिचिता आसन्। 'छबलबेन' इति तन्माता पाठशालाया अध्यापिकाऽऽसीत्। चतुर्दश्यां तेन विहितानि पाक्षिकातिचारादिसूत्राणि सर्वाभिः स्पष्टानि श्रुतान्यासन्। तथाऽपि केवलं नववर्षीयं लघुबालं दृष्ट्वा ते सहजं शङ्कितवन्तः। ते पृष्टवन्तस्तम् – ''अन्यस्मिन् ग्रामे सांवत्सरिकप्रतिक्रमणार्थं गन्तव्यम्, ननु सूत्रादयस्तु नितरां मुखस्थाः सन्ति न वा? अस्मद्ग्रामख्यातिर्मनागपि ह्रस्वा न भवितव्या।''

भाईचन्दकुमारः श्रद्धया सह प्राह – ''सर्वाणि सूत्राणि मत्कण्ठगतानि सन्ति। ग्रामख्यातिर्ह्रस्वा न भविष्यति, अपि तु वर्धिष्यते ध्रुवम्।''







तस्य प्रबलात्मश्रद्धां दृष्ट्वा सङ्घनायका उत्साहवन्तो जाताः। सर्वेषामनुमतिं मातुश्चाशिषं गृहीत्वा सांवत्सरिकदिनस्य पूर्वसन्ध्यायां भाईचन्दकुमारो लखतरग्रामं प्राप्तवान्।

क्षमापनादिने त्यक्तनिद्रः स वार्षिकनियमानुसारं पौषधव्रतं गृहीतवान्। ग्रामस्याऽपि पञ्चाराधकाः पौषधव्रतं गृहीतवन्तः। देववन्दनादिसर्वविधिं समाप्य सर्वे प्रतिश्रयमागतवन्तः । तत्र भाईचन्दकुमारो लघुप्रवचनमपि कृतवान्। प्रवचने च मातृमुखेन श्रुतां गजसुकुमालमुनिकथां सुष्ठु कथितवान्। लखतरग्रामीया आराधका अस्य बालस्य निर्भीकतां दृष्ट्वाऽतिप्रीतवन्तः।

मध्याह्नात् पश्चात् प्रतिक्रमणं प्रारब्धवत्। स्वजीवने स्वतन्त्राराधना प्रथमैव, तथाऽपि निर्भयो बालभाईचन्दकुमारः प्रतिक्रमणं नितरां स्खलनारहितमकारयत्। तस्य कण्ठं मधुरमासीत्। उच्चारशुद्धिरपि सूत्रेषु सम्मीलिता, आरोहावरोहक्रमेण प्रत्येकसूत्राणि तेन प्रोक्तानि। अक्षतसांवत्सरिकातिचारसूत्रं नैकरागादियुक्त-मजितशान्तिस्तवनमित्यादिसूत्राणि सुन्दराणि प्रोक्तानि, यत उपस्थितभाविकैरेवमनुभूतम्–'इदं प्रतिक्रमणं कोऽपि बालो न, अपि तु विद्वान्मुनिवर्यः कारयती'ति।

सर्वे जना हर्षाढ्याः सञ्जाताः। भाईचन्दकुमारेण च वर्धमानपुरसङ्घनायकानामुक्तं 'ग्रामख्यातिर्वर्धिष्यते ध्रुवमि'ति वचनं सुचरितं जातम्।



प्रतिक्रमणमतिशोभनं जातम्। अतः प्रमुदिताः सङ्घजना बालानुमोदनकामनया पारितोषिकं प्रदत्तवन्तः। तदा भाईचन्दकुमारो महापुरुषोचितां निःस्पृहवृत्तिमदर्शयत्।

स कथितवान् – ''आराधनां कारयितुमेवाहमत्रागतोऽस्मि, सा सुष्ठु जाता, एतत्तु मदीयं कर्तव्यमेव, न कोऽप्यत्र विशेषः। अतस्तदर्थं प्रतिफलरूपं पारितोषिकं मया कदाऽपि न ग्रहीष्यते।''

अतिप्रशंसां प्राप्य द्वितीयदिने स निजगृहमागतवांस्तदा ग्रामीयाः सर्वजना हर्षमाप्नुवन्। द्वितीयस्मिन् वर्षेऽपि स देदादराग्रामसङ्घे सांवत्सरिकप्रतिक्रमणाराधनां कारितवान्।

बाल्यवयसि जीवनस्य प्रथमाऽऽराधनाऽपि तत्रभवद्भि-रतिशोभना कृता, अतः कथयामि गुरुवरान् – ''भो गुरुवराः! पट्टगेन्दुकनामिकायां ('क्रिकेट' इति आङ्ग्लभाषायाम्) ख्यातिप्राप्तक्रीडायां शतकाधिराजरूपेण प्रसिद्धः स्फोटकक्रीडावीरः सचिनतेण्डुलकरोऽपि स्वस्य प्रथमं शतकं निष्पत्तुं ७९ क्रीडा अरमत। इतस्तु आध्यात्मिकजगति साधनाऽऽराधनाशासनप्रभावनाधिराजरूपेण प्राप्तख्यातिनां भवतां राजमानकार्यशृङ्खलायाः प्रथमं चरणमपि पट्टगेन्दुकशतकमिव विस्मयदं सञ्जातम्। जाने भवन्तः शतकमिव शौर्यमदर्शयन्। साधनाऽऽराधनाक्षेत्रेऽधुना यावत् क्षुद्रबालादृशामस्माकं कृते तु भवतां दीप्तिमज्जीवनस्य प्रारम्भिकसमयोऽपि प्रणम्योऽस्ति नूनम्।''



बाला अपि रवेः पादाः,
पतन्त्युपरि भूभृताम्।
तेजसा सह जातानां,
वयः कुत्रोपयुज्यते ।।

## जिणुत्तसिद्धंतगहियपरमट्ठा ३०

विश्वे विजयमानस्य जिनशासनस्य चतुर्णामपि सम्प्रदायानामनुगामिन एकस्य शास्त्रग्रन्थस्य नाम सादरं गृहणन्ति । **'श्रीतत्त्वार्थाधिगमः'** इति तन्नाम । अस्मिन् शास्त्रे पूर्वधरेण भगवता श्रीमदुमास्वातिना सूत्रशैल्या नवमेऽध्याये पञ्चविंशतितमे सूत्रे स्वाध्यायः पञ्चप्रकारो दर्श्यते –

**'वाचना–प्रच्छनाऽनुप्रेक्षाऽऽम्नाय–धर्मोपदेशाः' इति।**

सूत्रस्य भावार्थोऽयम्–साधनानिमग्नैः श्रमणैरयं पञ्चप्रकारः स्वाध्यायो नित्यं समाचरणीयः (१) **वाचना**–शिष्यादिजिज्ञासव आगमादिश्रुतैः पाठनीयाः (२) **प्रच्छना**–सूत्रार्थसम्बन्धिप्रश्नोत्तराणि कर्तव्यानि। (३) **अनुप्रेक्षा**–अधीतं श्रुतं मनसा चिन्तनीयं–परावर्तनीयम् । (४) **आम्नायः** – नूतनः श्रुताभ्यासः कर्तव्यः, कण्ठीकृतस्य वा श्रुतस्य मुखोच्चारपूर्विका पुनरावृत्तिः कर्तव्या । (५) **धर्मोपदेशः** – सूत्रार्थयोः प्रवचनं कर्तव्यम्। श्रमणेभ्यः श्रमणोपासकेभ्यो वा धर्मस्योपदेशो दातव्यः।

अस्य सूत्रस्य प्रत्येकवचनानि गुरुवरजीवने सार्थानि ज्ञायन्ते । अत एव पूर्वस्मिन् प्रसङ्गे गुरुवरजीवनं शास्त्रसमर्पितमासीदिति दर्शितम्।

स्थलस्य सङ्कीर्णत्वाद् वयं केवलमत्र प्रस्तुतसूत्रोक्तेषु स्वाध्यायप्रकारेष्वन्तिमस्य धर्मोपदेशस्यैव चिन्तनं कुर्याम।

गुरुवरप्रवचनानि बहुशो द्विस्त्रिरपि भवन्ति स्म । अनेके ज्ञानपिपासवो जनाः सुदूरं यावदागत्य गुरुदेववचनसुधापानं कुर्वन्ति स्म। माध्याह्निके वाचनाकाले 'कम्मपयडि' सदृशस्य नितान्तकठिनस्याऽभ्यासग्रन्थस्याऽध्ययनाय सूरचन्द्र पी. बदामी इत्याख्यः निवृत्तन्यायाधीशः (B.A.L.L.B. Retired small causes Justice) अपि आगच्छति स्म। अन्यविदुषां







कृते 'गुणस्थान-क्रमारोह' ग्रन्थाऽवलम्बिनी रात्रिवाचनाऽपि गुरुवरैर्दीयते।

तासु वाचनासु गुरुविद्वत्ताया दर्शनमपि जीवनस्यैकं महामूल्यं स्मरणरूपं भवति स्म । एतासु वाचनास्वन्यतमस्य रात्रिवर्गस्य लाभमनायासेनाऽधिगन्तारो विद्वद्वर्याः केचन *आचार्यप्रवरा गुरुदेव-विद्वत्तामर्थपूर्णैः शब्दैः स्तुतवन्तः ''बहुवर्षेभ्यः प्राग् मुम्बईमहापुर्यामुप-नगरीये कस्मिंश्चिदुपाश्रये दैवसिकप्रतिक्रमणानन्तरं तत्रभवतां सान्निध्यं सद्भाग्येन मयाऽपि लब्धम्। यद्यपि, तत्र गुणस्थानकसम्बन्धिनी श्राद्धवर्गीया प्रश्नोत्तरावलिरारब्धा आसीत् । अतोऽहं तु तत्र केवलं श्रोतृत्वेनैवोपविष्ट आसीत्। किन्तु, अद्याप्यहं तद्वृत्तं स्मरामि। 'आयुर्बन्धस्तृतीयगुण-स्थानके कथं न भवति' इति श्रोत्रा पृष्टस्य प्रश्नस्योत्तरं पूज्यवरा अनभिभवनीयाभिर्युक्तिभिर्यत् प्रतिभाषित-वन्तस्ततोऽहं पूज्यवरान्प्रति नितरामहोभावान्वितः सञ्जातः। द्रव्यानुयोगविषयकं प्रभुत्वं पूज्यप्रवराणामनुत्तरमस्तीति कर्णोपकर्णिका वार्त्ता पूर्वं मया श्रुताऽऽसीत् । परं तस्यां रात्र्यामनुसम्भाषणं मे प्रतीतिर्जाता-यत् श्रुतं तत्सर्वथा यथार्थमेवेति।''

आगमविशारद-पन्न्यासप्रवरश्रीअभयसागरगणिवरैरपि द्रव्यानु-योगस्य विरलप्रवक्तारः पूज्यपादयुगदिवाकरगुरुवराः पत्रमाध्यमत उक्ता आसन् -''अहं भगवतीसूत्रं भवादृशानां पार्श्वे सकृज्जिघृक्षुरस्मि। किन्तु, श्रामण्ये नदी-नौसंयोगः कुतो भवेत् ?'' इति।

* * *

अयि गुरुवराः! सज्ज्ञानग्रहणदानपराः! अनुमन्येऽहमेवं-यानि जीवनक्षणानि रिक्तानि प्राप्तानि आसन्, अत्रभवद्भिस्तानि शास्त्रस्वाध्यायादिभिर्ध्रुवं परिमण्डितानि कृतानि सन्तीति। अतः कथितम्-तीव्रशास्त्रानुप्रेक्षायुतं भवज्जीवनमासीन्नितरां शास्त्रसमर्पितम्, अधुनैव च ज्ञापिता विद्वत्श्रमणानां शब्दास्तस्य सुतरामुदाहरणम्...।

प्रसङ्गसमापने भवद्भ्य एतावदेव प्रार्थये यद् कलकलालापं कुर्वतो निर्झरस्येव भवज्जीवने प्रसृतां शास्त्रसमर्पिततामस्मज्जीवनेऽपि वाहयन्तु गुरुवराः!, यतोऽस्मज्जीवनयात्रा केवलं जीवनयात्रा एव न भवेद्, अपि तु स्वपरकल्याणकार्यैः कल्याणयात्राऽपि भवेन्नितराम्...।

*ते लब्धवर्णा आचार्यप्रवराः श्रीमद्विजयरत्नसुन्दरसूरीश्वराः । तल्लिखिता उक्तभावोपेताः शब्दाः सप्तशतपत्रीय - विशालकाय - 'युगदिवाकर'ग्रन्थान्तः 'शुभेच्छासन्देश' इत्याख्ये विभागे गुर्जरभाषायां मुद्रिताः सन्ति ।।





पडिरूवो तेयस्सी,
जुग्गपहाणागमो
महुरवक्को।
गंभीरो धीईमंतो,
उवएसपरो य
आयरिओ।।

# ३१ साध्वाचारसन्निष्ठा : सूरिवरा:

आत्मनिन्दाद्वात्रिंशिकायां साधकजनस्य कृते चत्वार: पदार्था उक्तास्ते नूनमनुप्रेक्षणीया: सन्ति–

**हित्वा स्वदेहेऽपि ममत्वबुद्धिं,**
**श्रद्धापवित्रीकृतसद्विवेक: ।**
**मुक्तान्यसङ्ग: समशत्रुमित्र:;**
**स्वामिन्! कदा संयममातनिष्ये ।।**

भावार्थोऽयम् – साधकजनैरेभिश्चतुर्भि: पदार्थै: स्वजीवनं नूनमलङ्कर्तव्यम् – (१) देहं प्रति ममत्वबुद्धित्याग: (२) श्रद्धानिर्मलो विवेक: (३) विभावसङ्गानां विसर्जनम् (४) शत्रुमित्रयो: समभाव:।

पूज्यपादगुरुवरा अपि महान्त: साधकपुरुषा आसन्। अतस्तेषु इमे चत्वारोऽपि पदार्था आत्मसात् भवेयुरिति सहजम् । प्रस्तुतप्रसङ्गे चतुर्षु पदार्थेषु तेषां जीवने सुचरितं विवेकं वयमवलोकयाम: ।

वैक्रमं २००३ तमं वर्षम् । सच्चरितपूज्यपादगुरुवराणां प्रभावकं चतुर्मासं तदानीं मोरबीनगर आसीत् । तत्रत्य–जिनालयस्य प्रतिमापूजाकारको (पलासवा – कच्छ – वागडग्रामीय:) 'डाह्याभाई' इत्याख्यो वैतनिक: श्रावकगृहस्थ आसीत्। तस्य धर्मचारिण्या देहे पादरदेवीवासो भवतीति बह्वी लोकश्रुतिस्तदानीं ग्रामे प्रसृता। दु:खभाज: कुतूहलिनश्च जनास्तस्य समीपं गत्वा नैकविधप्रश्नान् पृच्छन्ति स्म। असौ गृहिणी पादरदेवीवत् तेषां प्रश्नानामुत्तराण्यपि यथाकथञ्चिद् यच्छति स्म। जनप्रवादोऽयं समग्रनगरे प्रसृत:।

अत्रान्तरे कतिपया उत्साहिन: (?) जना एकदा उपाश्रये गुरुवरसमीपमागत्य कथितवन्त: – ''गुरुदेव ! दर्शनीयं वृत्तमेतद् । सकृद् भवताऽपि तत्राऽगन्तव्यम्'' इति।







गुरुदेवैः शास्त्रस्पर्शि प्रतिवचः प्रदत्तम् – ''अस्माकं श्रमणधर्मोऽस्मिन् विषये प्रतिषेधको भवति । स कथयति 'एतादृशेषु विभावेषु कुतूहलमकर्तव्यम् , प्रत्युत दर्शन–ज्ञान–चारित्रादिसाधनास्वेव रन्तव्यमि'ति । अतोऽहं तत्र जिगमिषुर्नाऽस्मि ।''

अमीभिरुत्साहिभिर्गुरुवरा मुहुर्मुहुर्विज्ञप्ताः – ''गुरुदेव । भवान् सकृदागच्छतु । नेत्रपटलाग्रे तां घटनामानयतु । कदाचिन्मिथ्यावार्ता भविष्यति चेत्तन्निराकरणमपि प्राप्स्यते ।''

अत्याग्रहवशाद् गुरुवरा उक्तवन्तः – ''अशेषवार्तां ज्ञात्वा प्रत्यागन्तव्यम्'' इति ।

अमी श्रावकाः सर्वं पर्यालोच्य विज्ञापितवन्तः – ''गुरुदेव! तस्या देहे पादरदेवी दिनोद्गते कदाऽपि नाऽऽयाति, केवलं निशायामेवाऽऽयाति। तन्निरीक्षणाय परीक्षणाय च भवता तद्गृहे यामिकायामेवाऽऽगन्तव्यम्'' इति।

उपाश्रयात् तद्गृहं केवलं द्विशतानि पदान्येव दूरमासीत्। परं, शास्त्राचारसमर्पितगुरुदेवकृते यामवत्यां तत्र गमनं सर्वथाऽशक्यमासीत् । अतस्तत्रभवन्तः स्पष्टं प्रतिषेधं कृतवन्तः – ''श्रमणधर्मानुसारम्–स्माभी रात्र्यां सामान्यतः शतेभ्यः क्रमणेभ्यो बहिर्गमनं नोचितम्। अत इमां घटनां निरीक्षितुं परीक्षितुं वा वयं तत्र कथमपि नाऽऽगमिष्यामः।।''

इदं श्रुत्वाऽमी उत्साहशीला जना किञ्चिदपि अनुक्त्वा ततोऽपलायन्त। परं, ते प्राग्गमनादेभ्यः शास्त्राचारप्रतिबद्धेभ्यो महापुरुषेभ्योऽन्तःकरणेन शतशोऽवन्दत।

अधुना स्तोकसमयपूर्वं मम दृष्टिपथि सुष्ठु विचार आगतः, स प्रेरयति स्म– **'जीवनयात्रायां मनो नित्यं दृढं रक्षितव्यं, हृदयं च श्लक्ष्णम्...'।**

अन्तःकरणं कारुण्यविकासेन कोमलीकर्तव्यमिति वार्ता तु मया सुविचारदर्शनादेव ज्ञाता । परं, मनः कथं दृढीकर्तव्यमिति त्वनेन प्रसङ्गस्मरणेन ज्ञायते । प्रसङ्गोऽयं ज्ञापयति – 'मनो दृढीकर्तव्यमा–चारपालने'इति।

गुरुवराणामेतादृशान् जीवनप्रसङ्गान् स्मरामि, तदानीं कविश्रीभवभूतिना (श्रीकण्ठेन) उक्ताया अस्याः श्लोकपङ्क्तेः स्मरणं भवति सहजं यद्–

**वज्रादपि कठोराणि, मृदूनि कुसुमादपि।**
**महापुरुषचेतांसि, को नु विज्ञातुमर्हति।।**




अस्मादृशां प्रमाद-,
ग्रस्तानां चरणकरणहीनानाम्।
अब्धौ पोत इवेह,
प्रवचनरागः शुभोपायः।।
प्रवचनरागः
संसारसागरः

# ३२ प्रत्युत्पन्नमतयः

पूज्ययुगदिवाकरगुरुवराः प्रत्युत्पन्नमतित्वस्य तलस्पर्शिपाण्डित्यस्य च धारका आसन्। तेषां पार्श्वे शास्त्रीयविषयेषु संशयिनः स्थानकवासि-श्वेताम्बर-दिगम्बरादिनानाविधसम्प्रदायानां विद्वद्वर्याः केवलं निरुत्तरा एव न, प्रत्युत निःशङ्का अपि भवन्ति स्म। वयं द्वाभ्यां प्रसङ्गाभ्यां तेषां विद्वत्तापरिचयं कुर्याम।

(१)

पञ्चदशाधिकद्विसहस्रे (२०१५) वैक्रमे संवत्सरे पूनानगर्यां गुरुवराणां चतुर्मासम्। गुरुवरैस्तत्र भगवतीआगमग्रन्थानुगं व्याख्यानं प्रभाते मध्याह्ने च द्विः क्रियते स्म। रात्र्यां च तात्त्विकवर्गः सम्बुध्यते स्म। एतस्मिन् श्वेताम्बरा इव दिगम्बराः श्रावका अप्यागच्छन्ति स्म। वाचनान्तरे च रोचकप्रश्नोत्तरावलिरपि भवति स्म। एकदा ते दिगम्बरश्रावकाः स्वसङ्घमध्ये गुरुवरज्ञानप्रशंसां कृतवन्तः। अतो दिगम्बरविद्वद्भिर्गुरुवराः कथिताः-''गुरुवराः! भवता सह पृथगुपविश्य वयं कतिपयसन्देहान् निराकर्तुमिच्छामः।''

गुरुवरैरनुज्ञाऽदीयत।

विद्वद्वर्तुलेन प्रश्नावलिः प्रारब्धा। सर्वा जिज्ञासा गहनशास्त्रीयविषयसम्बन्धिन्य आसन्। गुरुवरैस्तत्क्षणं तासां प्रत्युत्तराणि दत्तानि। सर्वे प्रश्ना लेश्याविषयका उपयोगविषयकाश्चाऽऽसन्।

एतस्मिन्नेकप्रश्नोऽतिदुर्गम आगतः। निकटस्थाः श्रमणा अपि प्रश्नं श्रुत्वा स्तब्धाःसञ्जाताः। गुरुवरास्तु क्षणार्धं विचारसरसि निमग्नाः। किन्तु तत्क्षणमेव देवगुरुकृपया तादृशः क्षयोपशमः स्फुटितवान्, येन कदाऽपि न चिन्तितस्य तत्प्रश्नस्य ते शास्त्रमण्डितं तत्कर्तॄणां च पूर्णसन्तोषदमुत्तरमयच्छन् । प्रश्नकारका अपि प्रीणितवन्तः। प्रश्नोत्तरविरामे गुरुवरप्रशस्तिं कृत्वा दिगम्बरविद्वद्भिर्मुक्तमनसा कथितम् - ''नैकेभ्यो वर्षेभ्योऽस्माभिरयं प्रश्नोऽनेकेषां श्वेताम्बर-दिगम्बरविदुषां पृष्टः। किन्तु केनाऽपि सन्तोषदायकमुत्तरं न प्राप्तम्। अत्रभवताऽद्य पूर्णसन्तोष-प्रदमुत्तरं प्रदत्तम्।







विशेषेण तु वयं 'यथार्थमुत्तरं प्राप्स्यते' इति धारणापूर्वं न, अपि तु भवतः प्राज्ञता-परीक्षणार्थमेव प्रश्नमिमं कृतवन्तः।''

इमं प्रसङ्गं ज्ञात्वा लघुचिन्तनं भवति - 'किं केवलकाचपरीक्षका मणिपरीक्षका भवन्ति खलु? अपि तु न, परन्तु अत्र तदपि शक्यमभूद् गुरुवराणां प्रसादात्।'

(२)

वैक्रमीये पञ्चाधिकद्विसहस्रे वर्षे (२००५) वटपद्र(वडोदरा)नगरे गुरुवराणां चतुर्मासम्। एतत्तुल्यो द्वितीयः प्रसङ्गस्तत्र सञ्जातः।

जैनशासनं मन्यत आत्मद्रव्यमखण्डमस्तीति। प्रत्येकात्मनोऽसंख्येयात्मप्रदेशाः सन्तिः, ते च परस्परं संलग्नाः सन्ति, विभक्ता न। इमं शास्त्रार्थमनुसृत्य प्रवचनसभायां केनचिज्जिज्ञासुना पृष्टम् - ''गुरुवराः! श्रीतीर्थङ्करपरमात्मनां कल्याणकप्रसङ्गेषु सौधर्मेन्द्रः पृथ्वीलोके समागत्य पञ्चोत्तरवैक्रियदेहान् विरचयति, एते सर्वे कायाः प्रत्यक्षमेव पृथगनुभूयन्ते। ततः किं तेषामात्मप्रदेशेषु विभागो न भवति खलु?''

प्रश्नस्यास्य लौकिकोदाहरणपूर्वं सविस्तरं प्रत्युत्तरं गुरुवरैः सद्य एव कृतम् - ''महानुभाव! त्वदीया जिज्ञासा युक्तिपूर्णाऽस्ति। तदा आत्मप्रदेशानां पञ्चविभागा नूनमनुभूयन्ते, परं ते स्थूलदृष्ट्यैव। तत्त्वदृष्ट्या तु वास्तविकता पृथग् भवति। परमार्थतः सौधर्मेन्द्रः स्वकीयमूलशरीरेण तदा स्वर्लोके विद्यमान एवाऽस्ति। स्वमूलकायेनाऽऽत्मप्रदेशपङ्क्तयस्तन्निर्मितैः पञ्चभिः कायैस्सह संलग्नाः सन्ति। कामं ताः पङ्क्तीर्द्रष्टुं वयमक्षमाः स्याम, तथाऽपि परमार्थोऽयमेव ज्ञेयः।''

तत्पश्चाद् गुरुवरैरुदाहरणमपि दत्तम् - ''कस्मिंश्चिद् विशालनगरे पर्यटनं कुर्मः, तदा मार्गमध्ये नैके विद्युत्स्तम्भा दृश्यन्ते। एते प्रत्येकस्तम्भा अस्माभिः परस्परसंयोगविहीना अवगम्यन्ते। अथ तु तेषामपि भूम्यन्तर्निहितैर्विद्युत्वाहकैः (Underground wire) पारस्परिकसंयोगो भवत्येव। सर्वेषां च विद्युत्वाहकानां सम्पर्को विद्युद्गृहेण (Power House) सह भवति। अत्र यथा तडित्वाहका न दृश्यन्ते, तथाऽपि ते प्रत्येकस्तम्भैस्सह संयुक्ताः सन्ति, तथा शक्रस्य मूलकायस्था अदृश्यमाना अप्यात्मप्रदेशपङ्क्तयः सौधर्मेन्द्रस्य प्रत्येकोत्तरवैक्रियकायैः सहापि सम्बद्धा भवन्ति। अतः 'आत्मप्रदेशेषु विभागो भवति न वा?' इति शङ्कया अलम्। सङ्घातभेदप्रक्रिया तु शास्त्रैः पुद्गलद्रव्ये दर्शिता, आत्मद्रव्ये सङ्घातभेदसम्भावना नाऽस्ति।

**रूपकेऽस्मिन्नात्मनो मूलशरीरं विद्युद्गृहतुल्यं वेदितव्यम्, उत्तरवैक्रियदेहा विद्युत्स्तम्भसमाना वेद्याः, आत्मप्रदेशपङ्क्तयश्च भूम्यन्तर्गतानां विद्युत्वाहकानां स्थाने ज्ञेया इत्युपनयः।''**
कीदृशमानन्दप्रदं बोधप्रदं चोत्तरमस्तीदम्?

एतादृशा आसंस्ते प्रत्युत्पन्नमतिगुरुवराः। वयं तेभ्यो भावतोऽञ्जलिं समर्पयेम यथा -

'प्रत्युत्पन्नमतिं वन्दे, भवतां भवदुत्तरम्।
भवतां प्रकृतिं वन्दे, वन्दे गुरुवरं परम्।।'







आहार-निद्रा-भय-मैथुनानि,
सामान्यमेतत् पशुभिर्नराणाम् ।
ज्ञानं विशेषं खलु मानुषानां,
ज्ञानेन हीनाः पशुभिः समानाः।।

## ३३

एषा घटना २०६० तमे वैक्रमीये वर्षे प्रवृत्ता। वि.सं. १९६० तमे वर्षे गुरुवराणां जन्म वढवाणग्रामे श्रावणमासे शुक्लपक्षीय एकादशीदिने सञ्जातम् । तत इदं गुरुवराणां जन्मशतकवर्षमासीत्। अत: प्राप्तपुण्यावसरैर्गुरुवराणां श्रमण–श्रमणीवृन्दै: प्रस्तुतवर्षमनुलक्ष्य नैकेषु सङ्घेषु विशिष्टा उत्सवा आयोजिता:। तेषु अन्यतममायोजनमस्मदीयै: परमगुरुदेवै: श्रीमद्विजयसूर्योदयसूरीश्वरै: कृतम्। पूज्यपादारविन्दयुगदिवाकरगुरुदेवविरचितानेकग्रन्थावलम्बि तदायोजनम्। तन्नाम **'अनावृतपुस्तकपरीक्षा'** (= open book exam इति आङ्ग्ले)।

वर्षारम्भे युगदिवाकरगुरुवराणामस्मदीयपरमगुरुदेवै: सम्पादितस्य **'श्रीभगवतीसूत्रनां प्रवचनो'** इत्याख्य–लोकप्रियप्रवचनग्रन्थस्योपरि 'अनावृतपुस्तकपरीक्षा' आयोजिता। पर:शतै: परीक्षार्थिभिरियं परीक्षा प्रदत्ता। अनेन ग्रन्थेन नैके परीक्षार्थिन: प्रमुदिता: सञ्जाता:। पत्रैश्च स्वप्रमोदोऽस्मदीयगुरुवरपार्श्वे तै: प्रेषितोऽपि। ग्रन्थवाचनप्रेरिता: कतिपये परीक्षार्थिनस्तु तपस्त्यागादिप्रतिज्ञाभि: स्वजीवनं समलङ्कृतवन्त:।

एतेषु पत्रेषु अन्यतमं प्रेरणाप्रदं मननीयं च पत्रं केनचिद् विप्रपण्डितेन प्रेषितम्। 'भगवतीसूत्रनां प्रवचनो' इति ग्रन्थगतां विशिष्टतां विद्वानयं प्रस्तुतवान् यथा – ''अस्य ग्रन्थस्याध्ययनं मया कृतम्, पश्चात् तन्महापुरुषाणां साक्षात्प्रवचनं श्रुतमित्यनुभूतम्। तत्राऽपि ग्रन्थेऽवगता: 'आलु अनन्तकायिकम्' इति प्रमाणिता अद्यतनीयास्तर्कबद्धाश्च युक्ती: पठित्वा 'आलु न भक्षयितव्यमि'त्यङ्गीकरोमि।''

संस्कारनगरीय: (वडोदरानगरीय:) संस्कारशीलो विद्वद्वर्य–ब्राह्मणोऽयम् । तन्नाम 'सीताराम डोंगरे' इति...।







पूर्वोक्तप्रवचनग्रन्थीया पञ्चमाऽऽवृत्तिः प्रकाश्यमानाऽऽसीत्, तदानीमस्मदीयैर्गुणग्रामालङ्कृतगुरुवरैः पूज्यपादाचार्यदेवश्रीविजयराज–रत्नसूरीश्वरैस्तस्य ग्रन्थस्य प्रस्तावनाशीर्षमनया पङ्क्त्या प्रस्तुतम् – 'वन्देऽहं गुणसागरं गुरुवरं श्रीधर्मसूरीश्वरम्' इति।

जीवनपरिवर्तकमिमं ग्रन्थं पठित्वा स द्विजोत्तम उक्तप्रस्तावना–पङ्क्तिमङ्गीकृत्य श्लोकपूर्तिं कृतवान्। स्वरचितसंस्कृतपङ्क्तित्रयीं प्राक्कथिते च पत्रे प्रेषितवानपि तथाहि–

'व्याख्यातं दशपञ्चभिः प्रवचनैः, प्रास्ताविकं येन सत्,
सुस्पष्टं सरलं नु श्रीभगवती–सूत्रस्य ज्ञानाञ्जनम् ।
बालानां प्रतिबोधनेऽतिनिपुणं, पोतं भवाब्धेश्च तम्,
वन्देऽहं गुणसागरं गुरुवरं, श्रीधर्मसूरीश्वरम् ।।





ज्ञानाद् विदन्ति खलु कृत्यमकृत्यजातं,
ज्ञानाच्चरित्रममलं च समाचरन्ति।
ज्ञानाच्च भव्यभविनः शिवमाप्नुवन्ति,
ज्ञानं हि मूलमतुलं सफलश्रियां तत्॥

# मधुराधिपतेरखिलं मधुरम् ३४

'संस्कारनगरी' इति स्वरूपेण विख्यातस्य वटपद्र(वडोदरा)नगरीयस्य रावपुरा-कोठीपोळ-जैनसङ्घस्य जैनाचार्यश्रीमोहनसूरीश्वराख्यपौषधशालाया उद्घाटनप्रसङ्गः। तदानीं पूज्यपादयुगदिवाकरगुरुवराणां वाग्रसास्वादकाभ्यां *द्वाभ्यामाचार्यभगवद्भ्यां ततः सप्तविंशतितमे वर्षेऽस्मत्पूज्यगुरुदेवेभ्यो लिखितमेवम् - ''तेषां वाणी नूनं सङ्गीतमयाऽऽसीत्। एतादृशी मनोहारिणी कल्याणकारिणी च वाणी स्मृत्यां सदैवाभिनवा हरिता च स्यादेतस्मिन्नाश्चर्यं किम् ?'' इति।

गुरुवराणां प्रवचनमासीदेतादृग् विस्मयदम्। लेखनञ्चाऽऽसीत् माधुर्यपूर्णम्। तदा 'सुघोषा' 'जैनयुग' इति ख्यातनाम्नोर्जैनसामयिकपत्रयोर्गुरुवराणां **'श्रमणभगवानमहावीर'** इति लेखमाला प्रकाशितवती। चातकनेत्राः परःसहस्रा जिज्ञासवस्तां प्रतीक्षन्ते स्म। पृष्ठतः पुस्तकं रूपं प्राप्य लेखावलिरियं नैकावृत्तीः प्राप्तवती। वर्षेभ्यः पश्चादपि तया लेखावल्या लोकहृदयेष्वनन्यं स्थानं लब्धम्। मुम्बईमहानगरसमीपस्थे भाईन्दरनगरे सञ्जात एकः प्रसङ्ग एतदर्थं स्मर्यते।

युगदिवाकरगुरुवरजन्मशताब्दीवर्षम् (वि.सं. 2060)। भाईन्दरनगरे बावनजिनालयतीर्थेऽस्मच्चतुर्मासम्। एकदा तत्र हसमुखभाईनामकः कश्चिद् गृहस्थ आगतः। मम गुरुवरान् स पृष्टवान् - ''गुरुदेव! भवता श्रीधर्मसूरीश्वरैरालिखितं 'श्रमणभगवानमहावीर' इति पुस्तकं पठितम् ?''

गुरुवरैः सविनोदमुक्तम् - ''पठितमेव न, अस्मिन् वर्षे अस्माभिस्तस्य पुनः प्रकाशनमपि कारितम्। परं

*पूज्यपादयुगदिवाकरगुरुवरजन्मशताब्दीप्रसङ्गे भाईन्दर-बावनजिनालयतीर्थान्तः प्रकाशितशतसप्तकपत्रीय-भव्यपृथुलकाय-श्री'युगदिवाकर'महाग्रन्थीये शुभेच्छासन्देशविभागे शब्दा इमे लिखिताः सन्ति। शब्दलेखका आचार्यदेवा आस्तां सागरसमुदायवर्तिनौ पूज्यपादाचार्यभगवन्तौ श्रीमज्जिनचन्द्रहेमचन्द्रसागरसूरीश्वरौ।











युष्माभिरेतत्पुस्तकमेव कथं निर्दिष्टम्? यतः गुरुदेवश्रीधर्मसूरीश्वराणां स्मरणीयानि नैकानि पुस्तकानि सन्ति।''

''गुरुवर! किं कथयेम्?'' स श्रावक उक्तवान् - ''अहं पुस्तकमिदं सर्वप्रथममपठम्, ततोऽद्य यावदहमत्यन्ताकृष्टोऽस्मि तत्प्रति । सप्तदशकृत्व इदं पुस्तकं मया पठितम्। मुहुर्मुहुः पुनःपठनेऽपि मया तस्मान्नित्यं किञ्चिन्नवं नवं प्राप्तम्।''

एकमेव पुस्तकम्.... सप्तदशकृत्वस्तत्पठनम्, तथाऽपि न लेशोऽलसः, अपि तु प्रभूतो हर्षः । कथं भवेदेवम्? एतदर्थं किञ्चिदपि वक्तुमक्षमं जानामि स्वम् । परं, लेखारम्भे कथितयोराचार्यदेवयोः शब्दानामुपरि पतितदृष्टेर्मम मनोभूम्यामपि स्फुरति लघु शब्दपुष्पम् - 'गुरुवराणां लेखनशैली मधुरतमाऽऽसीत् । जिज्ञासुजनास्तन्मधुरताया आस्वादने भ्रमरायमाणा भवेयुरित्येतस्मिन्नाश्चर्यं किम्?'

* * *

गुरुवराणां मधुरलेखिन्या अन्यदपि विपुलं साहित्यं लिखितम्। इतो लघुक्षेत्रसमास - पञ्चमशतककर्मग्रन्थ - षट्त्रिंशिकाचतुष्कप्रकरणादयः कठिना अभ्यासग्रन्था अपि तत्रभवद्भिः सम्पादिताः।

सर्जनक्षेत्रे मङ्गलाचरणं रत्नप्रभाव्याख्यान्वितश्रीअभिधान-चिन्तामणिकोशग्रन्थसम्पादनेन गुरुवरैः श्रामण्यस्य पञ्चमे वर्षे कृतम् । स्वीया च सर्वोत्तमा कृतिः 6000 श्लोकमिता संस्कृतभाषामयी 'सुमङ्गलाटीका' इति नाम्नी रचना तत्रभवद्भिर्दीक्षायाः केवले चतुर्दशे वर्षे कृता।

यथा वर्षायां प्रतिदिनं नद्यां जलं वर्धते, तथा गुरुवराणामध्ययनं दिनं दिनं वर्धते स्म, किन्तु ज्ञानेन सह तेषां नम्रताऽपि वर्धते स्म।

स्वनिर्मितसुमङ्गलामहाटीकाया अग्रिमश्लोकेषु गुरुवरैर्नम्रता-द्योतकाः प्राज्याः शब्दाः प्रयुक्ताः सन्ति। यथा -

**'क्व बुद्धिलेशो मम बिन्दुतुल्यः, क्वेदं च शास्त्रं जलधीशमानम् ।**
**तथाऽपि गीतार्थगुरुप्रतापात्, सुमङ्गलानावि सुसंस्थितोऽहम् ।।'**

* * *

हृदयमिच्छति गुरुवरान्तर्गतविनम्रतया स्वजीवनमपि समलङ्कर्तुम्, मनोऽपि भवति मधुरायै तेषां लेखिन्यै भावपूर्णवन्दनाञ्जलिं समर्पयितुम्....।

गुरुवराणां च मधुरं जीवनं, मधुरं प्रवचनं, मधुरं गमनं, मधुरं नमनं, मधुरं हसनं, मधुरं लेखनं, मधुरमक्षरं, मधुरं समत्वं, मधुरं स्वरूपं, मधुरमौदार्यमित्यादि सर्वं मधुरं मधुरमनुभूय चान्तःकरण एकं मधुरं स्तुतिचरणस्मरणमपि प्रभवति '**मधुराधिपतेरखिलं मधुरम्**' इति।





अम्हारिसा वि मुक्खा,
पंतीए पंडिआणं पविसंति।
अण्णं गुरुभत्तीए,
किं विलसिअमब्भुअं इत्तो ?



## जीवनारम्भस्य कुशलोद्यानपालका: ३५

चिन्तकैरुच्यते यदेकस्यापि सुकृतस्यानुमोदना यदि न कृता तदाऽपराणि नैकानि क्रियमाणानि सुकृतानि प्रागेवोदयादस्तङ्गतानि भवन्ति। ततः सुकृतानि स्वल्पान्यनल्पानि वा कीदृशान्यपि भवेयुस्तानि नूनमऽनुमोदनपयसाऽऽर्द्रीकर्तव्यानि। पूज्ययुगदिवाकरगुरुवरजीवनमासीदनेन गुणपुष्पेण सुवासितम्। लघ्वपि सुकृतं दृष्टं श्रुतं वा चेत्, तेऽनुमोदनां न कुर्यादिति वार्ताऽपि तत्कृतेऽशक्यप्राया। ततःपरं कथं न स्याद् बिन्दुतुल्यमपि तत् सुकृतम्?

वैक्रमे वर्षे २०३० तमे प्रवृत्तमेतद् वृत्तम् –

तदानीमासीन् मुम्बई–वालकेश्वरनगरे गुरुवरस्थैर्यम्। अत्रान्तरे कश्चिद् बालो वन्दनार्थमुपाश्रयमागतः। गुरुवरैस्सह तस्याऽयं प्रथमः परिचयः। तथापि तस्मै तेषां प्रसन्नतामयं वदनमत्यरोचत्।

अनुवन्दनमुल्लसितहृदयो बालः सुखशातां पृष्टवान्। गुरुवरैरपि सस्नेहं सस्मितं पृष्टम् – ''धर्माभ्यासः कतिपयोऽभूत्?''

''नवस्मरणं यावत्।'' बालः प्राह।

श्रुत्वेदं गुरुदेवैः कल्याणमन्दिरादिस्तोत्राणां कतिपयाः श्लोका अङ्कसंख्यया पृष्टाः। बालः श्लोकान् यथास्थितमुक्तवान्।

अतो गुरुवरा अतिप्रीणितवन्तः। पौषधशालामागतैः कतिपयैः श्रमणोपासकैर्बालस्य सन्मानं कारितमनुमोदनेन चाऽतिप्रोत्साहनमपि दत्तम्।







प्रसन्नचित्तो बालो गतवान्। तदनु त्वयमुपक्रम: कानिचिद् दिनानि यावद् निरन्तरमचलत्। बालो गुरुवराणां पार्श्वे प्रत्यहं वन्दनार्थमागच्छेत्, तत्प्रेरितो बालो प्रेम्णा श्लोकान् वदेत्। क्वचिच्चागतै: श्रमणोपासकैस्तस्मै पुरस्कारं दापयित्वा गुरुवरास्तस्याध्ययनमभिवादयेत्। कथन–मनावश्यकमस्ति लघोरपि सुकृतस्यानुमोदनस्वभावाद् गुरुवरा बालहृदये न्यवसन्। तत बालस्यान्त:करणेऽधिकाध्ययनेच्छापि आविर्भूतेति।

* * *

तस्यैव बालस्य गुरुवरै: सह द्वितीयोऽनुभव:।

वैक्रमीयं २०३३ तमं वर्षम्। फाल्गुनशुक्लचर्तुदश्या दिनम्। मुम्बईमहानगरतो निर्गतेन शत्रुञ्जयमहातीर्थपदयात्रासङ्घेन सह पूज्यगुरुवरा वटपद्र (वडोदरा) नगरमागता:। सायाह्ने बहुशतैराराधकै: सह सामूहिकचातुमार्सिकप्रतिक्रमणार्थं गुरुवरा विराजमाना आसन्। अस्मिन् प्रतिक्रमण उपस्थितेन तेन बालेनोच्चारशुद्धिसहितमतिचारसूत्रं कथितम्। सुकृतानुमोदननिधितुल्यै: पूज्यगुरुवरैरनुमोदना कृता – ''पितरौ यदि सावधानौ भवेताम्, तर्हि लघवोऽपि बाला उत्तमैर्धार्मिकसंस्कारैरभ्यासैश्च विकासं प्राप्नुवन्ति। बालोऽयं तस्य प्रशस्यतममुदाहरणमस्ति। अत: स्वीयबाला: पाठशालायामध्ययनार्थं नूनं प्रेषणीया:। अस्य बालस्य च बहुमानेन ज्ञानभक्तिरपि कर्तव्या।'' गुरुवराणां लघुप्रेरणया बालस्य कृते पारितोषिकाणां वृष्टिरेवाऽभवत्।

इत्थं युगदिवाकरगुरुवरा गुणपुष्पैरेतादृशै: सर्वेषां कृते सुवासयुक्त–जीवनारामस्य सर्जका: कुशलोद्यानपाला आसन्। एतान् गुरुवरानद्य सानुनयं प्रार्थये – ''भो गुरुवरा:। अस्मज्जीवनोद्यानमपि सुन्दरगुणपुष्पै: समलङ्कुरुत्तामिति''।

*अयं 'राजु' इति नामक: षड्वर्षीयबालकुमार: पूज्यपादयुगदिवाकरगुरुदेवानामाजीवनमन्तेवासिनां पूज्यपादप्रगुरुदेवाचार्यवर्यश्रीमद्विजयसूर्योदयसूरीश्वराणां सांसारिकभागिनेयस्तेषां दर्शनवन्दनार्थं दर्भावतीनगरतो वालकेश्वरमागत आसीत्। संप्रति स बालो नाम युगदिवाकरगुरुदेवान् प्रतिस्वान्तेऽद्भुतभक्ति – प्रीत्योर्धारका युगदिवाकरगुरूणां विषये सप्तशतपत्रीयविशाल 'युगदिवाकर' इत्याख्यग्रन्थसर्जकाश्चानन्तोपकारिणोऽस्मद्पूज्यपाद्गुरुवरा आचार्यप्रवरश्रीमद्विजयराजरत्नसूरीश्वरमहाराजा:।





सम्मत्तदायगाणं,
दुप्पडियारं भवेसु बहुएसु।
सव्वगुणमेलियाहि वि,
उवयारसहस्सकोडिहिं।।

## गुरुमाता वरदात्री, भवाम्बुधौ करदात्री ३६

गुरुवराणां कश्चित् शिष्यो दीक्षाग्रहणपश्चात् कायिकव्याधिग्रस्तो जातः। स्तोकं विहरेत् स संवेगं च प्राप्यात्। अन्ये श्रमणा यस्मिन् वयसि त्वरया विहरेयुः, तस्मिन् वयसि तस्य एतां स्थितिं निरीक्ष्य गुरुवरैर्योग्या उपचाराः प्रारब्धाः। किन्तु यथार्हं फलं न प्राप्तम्।

चिकित्सकैर्हृदयान्तः काचित् क्षतिर्निर्णीता। सर्वे चिकित्सका एवमुक्तवन्तः – 'अस्य मुनेः शस्त्रक्रियां कृत्वा क्षतिग्रस्तस्याऽङ्गस्य परिवर्तनं कर्तव्यम्, यतः सुदीर्घजीवनं तस्य समस्यामुक्तं भवेदि'ति । यद्यपि, एषा शस्त्रक्रिया महाभयदा आसीत्। सा चिकित्सा तदानीं मुम्बईमहानगरेऽपि क्वचिदेव भवति स्म। मुनिवरस्य कायोऽपि निर्बल इति भयस्याऽन्यत् कारणम्।

लाभाऽलाभं विमृश्य गुरुवरैर्मुनेः शस्त्रक्रियां कारयितुं निश्चितम्। आश्विनमासे मुम्बईमहानगरस्य ख्यातिप्राप्ते 'बोम्बे होस्पिटल' इत्याख्यचिकित्सालये विघ्नप्रचुरेयं शस्त्रक्रिया कृता। मुनेः शुश्रूषायै गुरुवरैर्द्वौशुश्रूषकौ श्रमणौ नियुक्तावास्ताम्। तथाऽपि शस्त्रक्रियादिने गुरुवरा निरन्तरं पञ्चदशघटिका यावत्तत्रोपस्थिता अभवन्। तदानीं वालकेश्वरनगरे महत्सु शासनप्रभावककार्येषु सत्सु तेषां निःसीमवात्सल्यनिधिगुरुवराणां हृदये शिष्याणां 'बाह्याऽभ्यन्तर'चिन्तायाः स्थानमग्रिमतरमासीत्, अत एव अन्यकार्याणि गौणीकृत्यैषा कार्यप्रधानता जाता। शस्त्रक्रियाप्रकोष्ठतो मुनिः स्वस्थरूपेण बहिरानीतः, पश्चादेव गुरुवरा वालकेश्वरं प्रति विहृतवन्तः।

शस्त्रक्रियापश्चात् मुनेः ५५ दिनानि यावत् चिकित्सालयवासोऽभवत्। तदन्तराले प्रत्येकतृतीये तुरीये वा दिनेऽतिकार्यव्यस्ततायां सत्यामपि गुरुवरा वालकेश्वरतः स्वयमागत्य रोगार्तशिष्यस्य शातापृच्छां कुर्वन्ति स्म। नैतावद्,







मुनिः पद्मानन्दविजयाख्यः स शिष्य आमयेऽपि समाधिं प्राप्नुयादिति शुभाऽऽशयात् शुभविचारभोजन–प्रदात्रीं हितशिक्षामपि प्रयच्छन्ति स्म।

शिष्याणां पुत्रवत् पालयित्रीमिमां गुरुमातरं दृष्ट्वा मत्स्मरणविषया भवन्ति पञ्चमगणधराः श्रीसुधर्मस्वामिनः। राजगृहीनगर्यां महाशासन–प्रभावककार्याणां सम्भवः, तथाऽपि तां शासनप्रभावनां त्यक्त्वा निजनूतनशिष्यस्य चित्तसमाधिकृते समुदायेन सह विहर्तुं सज्जता यैर्दर्शिताऽऽसीत्।

अहो! एतादृश्या गुरुमातुर्योगोऽपि दुर्लभः, यन्मनसि शिष्याणामुभ–यथा चिन्ता भवेत्। अद्भुतत्रयोदशप्रार्थनागुम्फित 'श्रीजयवीयराय' सूत्रे प्रार्थनाऽन्यतमा दर्शिताऽऽस्ति 'सुहगुरुजोगो' इति। मज्जीवने सद्गुरुयोगो भवतु इति तद्भावार्थः।

महागुणा गुरवस्तन्नाम **'सद्गुरवः'**। स्व–परहिताऽकाङ्क्षिणो गुरवस्तन्नाम **'सद्गुरवः'**। शिष्याणामुभयथा चिन्ताकर्तारो गुरवस्तन्नाम **'सद्गुरवः'**। एतादृशेषु नैकेष्वर्थेषु गुरुवरा आसन् **'सद्गुरवः'**।

समाप्तौ सुगमस्य शोभनतरस्यैकसंस्कृतश्लोकस्य वार्ता – स कथयति गुरुमन्तरेण मोक्षं को यच्छेत्?, गुरुमन्तरेण सन्मार्गं को यच्छेत्?, गुरुमन्तरेण मूर्खत्वं कोऽपहरेत्? गुरुं चान्तरेण सुखं को यच्छेत्? इति। अयं स श्लोकः–

**गुरुं विना को नहि मुक्तिदाता, गुरुं विना को न पथप्रदाता।**
**गुरुं विना को नहि जाड्यहर्ता, गुरुं विना को नहि सौख्यकर्ता॥**

सद्गुरोर्माहात्म्यं कीदृशमनन्यद् दर्शयति श्लोकोऽयम्? वयमेतेषां सद्गुरूणां चरणकमले कोटिशो वन्दनपुष्पाणि समर्पयेम।






अवद्यमुक्ते पथि यः प्रवर्तते,
प्रवर्तयत्यन्यजनं च निस्पृहः।
स एव सेव्यः स्वहितैषिणा गुरुः,
स्वयं तरंस्तारयितुं क्षमः परम्।।

अस्ति महापुरुषाणां जीवनं 'स्' वर्णादारभ्यमानैस्त्रिभिर्दुर्लभैर्गुणैः समलङ्कृतम् । अमी सन्ति सादयस्ते त्रयो गुणाः– (१) सत्त्वशीलता (२) सहनशीलता (३) संवेदनशीलता चेति ।

अनाविलचित्तानां पूज्यपादगुरुवराणां जीवनमपि आसीदनया गुणत्रय्या समलङ्कृतम् । तेषां त्रिभिर्जीवनप्रसङ्गैः क्रमशोऽवलोकयामो वयं तां ललितां गुणत्रयीम् ।

सत्त्वशीलता नाम स्थितिर्यदा कष्टदायिनी भवेत्तदानीमपि निजगृहीताऽऽराधनापथे – साधनापथे निश्चलं स्थातव्यम् ।

वैक्रमीयस्य २०३८ तमस्य संवत्सरस्येयं घटना पूज्यपादस्थिताया अद्भुतसत्त्वशीलताया दर्शनं कारयति ।

फाल्गुनश्वेतैकादश्या दिनम्। प्रतिष्ठाहेतोरासीन्मझगाँवजैनसङ्घमध्ये चतुर्भूमिके 'प्रेमसागर'भवने सपरिवारं गुरुवरस्थैर्यम् । रात्रौ नववादनवेला जाता । गुरुवरस्वास्थ्यं चाऽकस्माद् विकारापन्नं सञ्जातम् । शीघ्रं चिकित्सका आहूताः। निशायां ११.०० वादने सति वैद्यकैर्गुरुवरशिष्यवृन्दमुक्तम् – ''गुरुवराणां स्वास्थ्यं चारु नास्ति, चिन्ताजनकमस्ति । अतस्ते सत्वरं चिकित्सालयं नेतव्याः ।

किन्तु.... अहो गुरुवराणां साधुत्वम् । तत्रभवन्तश्चिकित्सकानां श्रमणानां सङ्घनायकश्रावकानां चाऽऽग्रहं दृढतयाऽवरुध्य कीदृशेष्वपि संयोगेषु उपाश्रयाद् रुग्णालयगमनं प्रतिषिद्धवन्त : । सत्त्वशीलताया जीवद्दृष्टान्त–तुल्यगुरुवराणां चेतसि विचारोऽयं रममाण आसीद् यद् 'आयुषः क्षण एकोऽपि, वर्धते न कदाचन।' अर्थाज्जीवनदीप–पात्रादायुषस्तैलं रिक्तीभवेच्चेन्मरणं तदाऽनिवार्यम्। तर्हि यत्र मृत्युः समाधिमयो भवेत् तत्प्रतिश्रयस्थानं कथं त्यक्तव्यम् ?







यदि प्रतिश्रयेऽन्तिमा घटिका व्यत्येष्यति तर्हि आराधनाकारकैः श्रमणैः समाधिस्तु नूनं प्राप्स्यते। पूज्यवराणामिमाचलतां दृष्ट्वा चिकित्सकाः श्रमणाश्चावनताः सञ्जाताः।

यद्यपि, तत्रभवतामप्रतिमसत्त्वशीलतायाश्चरमसीमा तदाऽऽगता यदा निशीथे द्वादशवादने सति गुरुवरं रुग्णालयं नेतुं वैद्यका सूचिकया पूज्यवरेभ्यो भैषजं प्रदत्तम्। गुरुवरा निद्राधीना जाता । तत्कालमेव **'stretcher'** इति साधनं चतुर्थ्यां भूमिकायामुपाश्रयान्तरानीतम् । परं, अमुष्य चतुश्चक्रीयसाधनस्यान्त्यभागः कुड्येन सह समघट्टत। ईषत् शब्दे सञ्जाते गुरुवराः पुनर्जागृता अभवन्। तैर्वास्तविकता ज्ञाता। तत्क्षणमेव तत्रभवन्तः पूर्णशक्त्या रुग्णालयगमनं प्रतिषिद्धवन्तः सर्वेषां च शीर्षमवनतं भवेत् तादृशमुक्तवन्तः। गुरुवराणां आराधनाजलेनाऽऽर्द्रीभूताः सत्त्वशीलाः स्खलिताः शब्दा आसन्– ''अत्रैव...अत्रैव...अत्रैव...'' इति । मरणं काममद्यागच्छेत् समयान्तरे वा, परमाराधनाभावयुतेऽस्मिन् स्थान एव तदागच्छतु इति तेषां भावः । तदानीं गुरुवरा ईषदवरुद्धवचना आसन् । तथाऽपि महता बलेन तैरेवमुक्तमासीत्।

गुरुवरा यथा प्रकृष्टप्रभावका आसन्, तथा ततोऽधिका अनन्याराधका आचार्यप्रवरा आसन् । तदन्तरेण मरणे सन्मुखे सति सर्वेषां चाऽतिनिर्बन्धे सत्यपि मरणसमाधिरेव तेषां मनसि सर्वेभ्योऽधिका प्रतिष्ठिता कुतो भवेत् ?

अस्य प्रसङ्गस्य प्रतिरूपसमः पयन्नासूत्रगतः प्राकृतश्लोक एतर्हि स्मरणविषयो भवति –

**धीरेण वि मरियव्वं, कापुरिसेण वि अवस्स मरियव्वं ।**
**दुण्हंपि हु मरियव्वे, वरं खु धीरत्तणे मरिउं ।।**

* * *

अहो गुरुवराः! ७८ वर्षीयप्रौढवयस्कैर्भवद्भिर्निसीमायां वेदनायां सत्यामपि नूनं महती सत्त्वशीलता दर्शिता। अत्रभवन्तः कृपामेतावतीं वर्षयन्तु– तस्याः सत्त्वशीलताया दीपोऽस्मज्जीवनेऽपि प्रकटीभवेत्, ततोऽस्मज्जीवनसन्ध्याऽपि भवादृश्या भावनया ज्योतिर्मयी भवेदिति।







सम्पत्सु महतां चित्तं,
भवेदुत्पलकोमलम्।
आपत्सु च महाशैल,-
शिलासङ्घातकर्कशम्।।

## सहनशीला: सूरीश्वरा: ३८

महापुरुष: स्यादाहोस्वित् खलपुरुष:। प्राक्कृतानि कर्माणि सर्वजीवान् ध्रुवं पीडयन्ति। अत: 'हीरविजयसूरिरास' इति कृतौ गुर्जरभाषायामेतादृशं स्पष्टं कथितमस्ति- 'हीर कहे नर सुणो परम, भोगव्या विण नव छूटे करम...' इति । गुर्जरविरक्तिसज्झायमध्ये श्रीदानमुनिनाऽपि कथितम्-'सुर-नर जस सेवा करे रे, त्रिभुवनपति विख्यात; ते पण कर्मे विडम्बीया रे, तो माणस केई मात...' इति । इत: कलिकालसर्वज्ञा: श्रीमद्हेमचन्द्राचार्या अपि त्रिषष्टिशलाकापुरुषचरित्रे ज्ञापयन्ति-**'प्राच्यं कर्माऽन्यथा कर्तुं, यद्वाऽर्हन्तोऽपि नेशते'** इति ।

यद्यपि तस्मिन् पीडासमये सामान्यसंसारिभ्य: साधनानिष्ठविरक्तजनानां मन:स्थितिर्नूनं सुन्दरतरा चोत्तमा च भवति । रुग्णावस्थामपि ते समाधिदायिनीं कर्मनिर्जराकारिणीं च कर्तुं निपुणा: सन्ति।

स्वजीवितस्य प्रत्येकं समयं स्व-परकल्याणार्थं विनियोक्तॄणां परमपुरुषार्थशालिनां पूज्यपादाब्जयुगदिवाकर-गुरुवराणां जीवनेऽपि सकृदेष प्रसङ्ग आगत: । वैक्रमीये २०३४ तमे वर्षे कर्माणि तत्रभवत्सु घातकप्रहारं कृतवन्ति । पक्षाघातरूप: स प्रहार: । यद्यपि, एते त्वासन् प्राग्वर्णितप्रसङ्गस्यारम्भे निर्दिष्टगुणत्रय्यामभिहितस्य सहनशीलतानामकस्य द्वितीयगुणस्यात्मसात्कारका गुरुवरा: । अत: **'शक्तौ सहनम्'** इत्युक्तिं दृष्टिपथेऽन्तरात्मनि च स्थिरीकृत्य तत्रभवन्त: प्रभुभक्तिप्रभृतिषु सदनुष्ठानेषु काहलं (अतीव) सुसमाहिता: बभूवु: ।

गुरुवराणां समस्तं दक्षिणाङ्गं पक्षाघातग्रस्तं जातम्, तदनु दशमे दिने महत्त्वपूर्णं वृत्तं सञ्जातम् ।

एषु दिवसेषु तत्रभवतां सायन्तनं प्रतिक्रमणं प्रत्यहं पूज्यमुनिप्रवरश्रीसूर्योदयविजयेन कार्यते स्म । गुरुवराणां







जिह्वाऽवरुद्धाऽऽसीत्। अतो वक्तुमक्षमास्ते तन्मनीभूताः सप्रणिधानाश्चे-मामावश्यकक्रियां कुर्वन्ति स्म। तयोस्तन्मयताप्रणिधानयोः परिचायकोऽयं प्रसङ्गः-

एकदिवसस्य वार्त्तेयम् । प्रतिवासरमिव सान्ध्यं प्रतिक्रमणं क्रियमाणमासीत् । दैवसिकप्रायश्चित्तिककायोत्सर्गस्य पश्चात् स्वाध्यायः ('सज्झाय' इति पारिभाषिके) आजग्मिवान् । नमस्कारमहामन्त्रमुक्त्वा पूज्यमुनिश्रीसूर्योदयविजयेन स्वाध्यायरूपेण योगदृष्टिगतायाः पञ्चम्याः स्थिरादृष्टेः पूज्यमहोपाध्यायश्रीमद्यशोविजयैर्विऽरचितः **'दृष्टि थिरामांहे दर्शन नित्ये...'** इति स्वाध्यायो गीतिपूर्वक आरब्धः । चतस्रो गाथा यथातथं गीताः। परं, पञ्चमी गाथा स्मृतिभ्रंशाद् मुनिवरेण विस्मृता । स नेत्रे निमील्य गाथां स्मर्तुं प्रयतते स्म। अत्रान्तरे विस्मयपदं सृष्टम्।

तन्मयभावेन स्वाध्यायश्रवणनिमग्नाः युगदिवाकरगुरुवरा स्वीयां प्रवर्तमानां पक्षाघातहतां शारीरिकमर्यादामपि विस्मृत्य वक्तुं प्रायतन्त । अलन्तरां मन्देन स्खलितेन च स्वरेण ते वर्णत्रिकं वक्तुमशक्नुवन् 'शी...त...ल...' इति। (शीतल चन्दनथी पण उपन्यो०' इति पङ्क्तेराद्याक्षरत्रयी) तदानीं तस्मिन् प्रकोष्ठे मुनिवरं गुरुवरांश्च विनाऽन्ये केऽपि जनाः साधवो वा नाऽऽसन्।

नैकेषु दिनेषु गतेषु सत्सु तथावस्थगुरुवरानित्थं वदतो निरीक्ष्य मुनिवरस्य हर्षो निरवधिर्जात एव । परं, ततोऽपि विशेषो दुस्साध्यव्याधि-मध्येऽपि सप्रणिधानमाऽऽवश्यकक्रियाकारकेषु गुरुदेवेष्वपार आदरभाव आविर्भूतः ।

नूनम्, व्याधेरपि विस्मारकमेतत् प्रणिधानं वन्दनीयम्, ईदृशी च विलक्षणतन्मयताऽपि नितरां नमस्करणीया।

अहं हृदयस्यामेयबहुमानभावेन गुरुदेवानां प्रणिधानयुतावश्यक-क्रियामभिवन्दे, तेषां चाऽद्भुतसहनशीलतामपि शिरसा प्रणमामि। एकस्मादेवाऽऽशयाद्-एतत्तुल्यप्रणिधानेन सहनशीलतया च मज्जीवनमपि त्वरयाऽलङ्कृतं स्याद्।





आत्मप्रवृत्तावतिजागरूकः,
परप्रवृत्तौ बधिरान्धमूकः।
सदा चिदानन्दपदोपयोगी,
लोकोत्तरं साम्यमुपैति योगी॥



## गुरुवराः करुणानिर्झराः ३१

संवेदनशीलत्वम्। 'स्'वर्णेनारब्धाया गुणत्रय्या एष तृतीयगुणः । हृदयस्यार्द्रता नाम संवेदनशीलत्वम् । जिनशासनेऽस्ति करुणाया माहात्म्यं विशिष्टम्, करुणायाश्च मूलमिदं संवेदनशीलत्वम्।

वैक्रमसंवत्सरे २०३३ तमे प्रवृत्तमेतद् वृत्तम् । पुण्यप्रभावशालिगुरुवरसान्निध्ये मुम्बईमहानगरात् पादलिप्तपुरं (पालीताणानगरं) प्रति ७२ दिवसीयः छ'री'पालकमहापदयात्रासङ्घः प्रयाणमारब्धवान्। तदानीमर्णवतटे (मुम्बईनगरस्य 'न्यू चौपाटी' इत्याख्ये प्रसिद्धसमुद्रतीरे) तं प्रस्थापयितुं जनार्णव आगतः। आगतेभ्य ५० सहस्राधिकेभ्यस्तेभ्यो मुम्बईनिवासिभ्यः कारुणिकैर्गुरुवर्यैर्यत् प्रस्थानप्रवचनं प्रदत्तम्, तद् गुरुवरान्तःस्थस्य करुणागुणस्य सहजं परिचायकं भवितुमर्हति । परमार्थतस्तत् प्रवचनं न, किन्तु गुरुवराणां संवेदनशीलेऽन्तःकरणे दीन–दुःखिसत्त्वान् प्रत्युच्छलत्याः सहानुभूतेः साधर्मिकबान्धवाँश्च प्रति हार्दिकचिन्तायाः शब्दस्वरूपमासीदिति कथनमधिकतरं सान्वर्थं भविष्यति ।

पूज्यपन्न्यासप्रवरश्रीपूर्णानन्दविजयगणिवर(कुमारश्रमण)प्रभृतिविचारकैस्तत्प्रवचनस्य कृते सानन्दं ज्ञापितम्– ''नूनं तत्प्रवचनं जिनशासनपथदर्शि क्रान्तिकारि हृदयवेधि संशयछेदि चाऽऽसीत् । विरोधिन उपेक्ष्य पूज्यवर्यैर्निर्भीकतया स्वाभिप्रायाः प्रतिपादिताः।''

गुरुवरैर्गुर्जरभाषायामुक्तस्यैतस्य मार्गदर्शकप्रवचनस्य कतिपयसंवेदनशीलानामंशानां भाषान्तरमत्र प्रस्तुतमस्ति– ''अहमद्य मुम्बईनगरस्य जैनसङ्घान् सेवाभाविसंस्थासञ्चालकान् दानेश्वरश्रावकान् युष्मांश्च सर्वान् सावधानं कर्तुकामोऽस्मि । एतदर्थं किञ्चिद् वक्तुकामोऽस्मि । सावधानं श्रुणुत । यूयं प्रातरुत्थायाऽऽवश्यकक्रियानन्तरं स्नात्वा







पूजावस्त्राणि परिधाय पूजामञ्जूषां च गृहीत्वा जिनपूजार्थं जिनमन्दिरं गच्छथ, गच्छद्भिश्च युष्माभिः पथि द्वाभ्यां दिनाभ्यां क्षुधातृषाभ्यां पीड्यमानो दीनो दुःखी कश्चन जीवो दृश्यते। तदानीं मुहूर्तमात्रं पूजापेटिकामन्यत्र मुक्त्वा यथाशक्ति तस्य दुःखिनो दुःखनिवारणस्योपाय–करणं वः प्रथमो धर्मो भवति । यद्यपि, जिनार्चना निःशङ्का गरिष्ठा भवति । तथाऽपि तत्रत्यां परिस्थित्यां प्राथमिकता दुःखिनः दुःखनिवारणोपायकरणस्यास्ति । एवमक्रियमाणे सति चेद् युष्माभिस्तमनादृत्य पूजामञ्जूषां गृहीत्वा चलिष्यते, तर्हि वो धर्मो निन्दापात्रं भविष्यति – 'एषां जैनानां धर्मः कीदृशः कारुण्यशून्यो दयाशून्यश्चाऽस्ति' इति। यदि च युष्माभिस्तस्याऽऽहाराद्यावश्यकता पूर्णीक्रियेत, तदा वो धर्मः श्लाघिष्यते–'इमे जैनाः कीदृशाः सानुकम्पा दयाशीलाश्च सन्ति' इति । अस्माभिस्तु 'सवि जीव करुं शासनरसी' इति भावना घनीकर्तव्या। ततः प्रस्तावे सति औचित्यं कथं विस्मार्यम् ?

अथेयं मदीया द्वितीया प्रेरणा – मुम्बईसदृशेषु महानगरेषु समीचीनस्थानेषु यावन्तो जैनजना निवसन्ति, तेभ्योऽधिका जैनजनाः कुटिरश्रेण्यां निवसन्ति । अयं मे स्वानुभवः। एतानि दृश्यानि मयाऽपरोक्षं निरीक्षितानि। तदा च मम नेत्रे अपि सजले जाते स्तः।... यूयं धनाढ्या प्रासादेषु इव महत्सु गृहेषु निवसथ, धर्मप्रभावनार्थं परोलक्षाणां रूप्यकाणां व्ययं कुरुथ, इत अस्माकं साधर्मिकभ्रातर ईदृशे भीषणमहार्घमये काले महता क्लेशेन जीवनं निर्वहन्ति । तस्मिंश्चावसरे यदि कश्चिदामय आगच्छेत्, तर्हि गृहसामग्रीविक्रयेऽपि निर्वाहो न भवेत् । एवं स्यात् तर्हि किं ज्ञेयम् ? एतादृशानां साधर्मिकभ्रातॄणां स्थिरीकरणेन रक्षणाय साहाय्यदानस्याऽपि युष्माकमुत्तरदायित्वं न विस्मर्तव्यम् ।''

संवेदनशीलताया वहतो निर्झरस्येव पूज्यगुरुवरप्रवचनस्य प्रतिशब्दं करुणा कीदृशी विलसन्ती दृश्यते नु ? चिरन्तनाचार्यकृत'पञ्चसूत्र' ग्रन्थान्तः कथितमस्ति–'**करुणा य धम्मप्पहाण जननी जणम्मि।**' इयं पञ्चसूत्रोक्तिर्गुरुवरजीवने सार्था सञ्जातेत्यनुभवामि ।

सत्त्वशीलता–सहनशीलता–संवेदनशीलतेति त्रयाणां गुणानां त्रिमूर्तिस्वरूपेभ्यो गुरुदेवेभ्यः किञ्चिदपि कथयितुमक्षमोऽहम्। अत एतावदेव कथयामीह नतशीर्षेण – '**गुरुवरं वन्दे गुणसदनम्**' इति ।





दीनं हीनं जनं दृष्ट्वा,
कृपा यस्य न जायते।
सर्वज्ञभाषितो धर्म-,
स्तस्य चित्ते न विद्यते।।

# ४ जितं जगत्केन ? मनो हि येन

एकस्मिन् रम्यसुभाषिते प्रश्नोत्तरस्वरूपं वरं कथनमपठम् – **'कः शूरः ? विजितेन्द्रियः'** इति। अर्थाल्लोके स हि जनो यथार्हः पराक्रमी भवेत्, यः करणानि वशीकुर्यात्।

यो जन इन्द्रियवशीकरणे विफलतामाप्नुयात्, स कदाचित् समराङ्गणे शत्रुन् विजयते, किन्तु कर्मरिपुना सह भीषणयुधि तस्य नूनं पराजयो भवति। अत आत्मसाधकजनानिन्द्रियविजयार्थं महापुरुषाः प्रेरयन्ति। पूज्यपादाब्ज–विद्वच्छिरोमणिमहोपाध्यायश्रीमद्यशोविजयगणिवराः स्वरचितज्ञानसारनामके ग्रन्थरत्ने कथयन्ति – **'इन्द्रियैर्न जितो योऽसौ, धीराणां धुरि गण्यते।'**

एवं वेदसम्प्रदायेऽपि शङ्कराचार्य उपदिशति – **'जितं जगत्केन ? मनो हि येन'** इति।

यदा कश्चिन् मुमुक्षुश्चारित्रमार्गमङ्गीकरोति, तदा जगतो जनास्तस्य मनोनीतानां सर्वासामभीप्सानां सन्तृप्त्यै परिश्राम्यन्ति। किन्तु यथार्थमुमुक्षुस्तु तस्मिन् समयेऽपीन्द्रियजयार्थं कश्चिदवसर उपस्थितो भवेत्, तर्हि सीमातीतं हर्षमाप्नोति। वयमुन्नतिशीलस्य मुमुक्षुभाईचन्दकुमारस्य जीवनं पश्येम। तज्जीवने निर्मितेनैवंविधेन प्रसङ्गेन परिज्ञाता भवामः, तेन चेन्द्रियजयार्थं प्रेरणां प्राप्नुयामः।

मातरमग्रजबन्धुं च विहाय भाईचन्दकुमारस्य परिवारजनास्तस्य संयमग्रहणे नितरां विघ्नकरा आसन्। ततोऽन्यदा 'सी.एन.' विद्यालयेऽध्ययनं कुर्वन् भाईचन्दकुमारो प्रव्रज्याप्रतिपत्त्यै निवृत्तिं गृहीत्वा विद्यालयान्निर्गत्य वटपद्र (वडोदरा) नगरे पूज्यपादारविन्दगुरुदेवश्रीविजयमोहनसूरीश्वराणां **'वीरचन्दभाई'** इत्याख्यपरमोपासकस्य गृहमागतवान्। दीक्षाग्रहणस्य शुभमुहूर्तप्रतीक्षायां मासं यावत् भाईचन्दकुमारस्य स्थैर्यं तत्राऽऽसीत्।







अत्रान्तर एकदिनस्य वार्तेयम् – तस्मिन् दिने संयोगवशाद् भाईचन्दकुमारो गृहजनेभ्यः पूर्वं भोजनार्थमुपविष्टवान्। तत्पश्चाद् गृहस्याऽन्ये सदस्या भोजनार्थमुपविष्टवन्तः। तदानीं तैर्ज्ञातं यदोदने सूपे च लवणोऽपयोगः सर्वथा विस्मृतः।

तैर्लवणं सद्यः प्रक्षिप्तम्। अशनमल्पसमयेन पूर्णतां प्राप्तम्। सर्वैरनुभूतम् – भाईचन्दकुमारो गृहेऽभिनवोऽस्ति, ततः स लवणं न याचितवान्।

तस्य लज्जां निराकर्तुं वीरचन्दश्रेष्ठिना भाईचन्दकुमारः प्रेम्णा सहोक्तः – ''पुत्र! इदं गृहं त्वदीयमस्तीत्यवगच्छ। कस्यचिदपि द्रव्यस्य यावल्लवणादीनामपि याचने न लज्जस्व।''

भाईचन्दकुमारः प्रत्युक्तवान् – ''पितृव्य! 'लज्जया मया लवणं न याचितं' एवं न। परमार्थतोऽहं मानसं सज्जीचिकीर्षुरासम्। यादृशं प्राप्येत तादृशमुपयोक्तव्यम्। एतादृशं तु संयमजीवने पदशो भवेत्तदा किं कर्तव्यम्? ततस्तस्य शिक्षां सम्प्रत्येव कथं न गृह्णामि?''

बुद्धिमतो गाम्भीर्यवतो धृतिवतश्च षोडशवर्षीयकिशोरभाईचन्दकुमारस्य विरलविचारप्रवाहस्पर्शात्तस्य सुश्रावकस्य प्रतिरोम प्रसन्नता प्रसृतवती।

विरलविचारप्रवाहोऽयं श्रिया संयुतेन पूज्यपादाम्बुजाचार्यप्रवर–सोमप्रभसूरीश्वरेण विरचितं श्रीसिन्दूरप्रकराख्यग्रन्थगतं श्लोकमिमं स्मारयति–

**आत्मानं कुपथेन निर्गमयितुं, यः सूक्लाश्वायते।**
**कृत्याऽकृत्य विवेकजीवितहृतौ, यः कृष्णसर्पायते।**
**यः पुण्यद्रुमखण्डखण्डनविधौ, स्फूर्जत्कुठारायते।**
**तं लुप्तव्रतमुद्रमिन्द्रियगणं जित्वा शुभंयुर्भव।।**





बन्धुरात्माऽऽत्मनस्तस्य,
येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे,
वर्तेतात्मैव शत्रुवत् ।।

## एकत्र जलपूरः अन्यत्र करुणापूरः ४०

पूज्ययुगदिवाकरगुरुवरा आसन् करुणाया नितरामीशाः । तत्रभवतां नेत्रहृदयान्येव दयानिचितानि आसन्नेवं न, तन्महापुरुषाणां त्वासन्नशेषरोमाणि करुणायुतानि । सांसिद्धिक(=स्वभावसिद्ध)करुणाधराणां तत्रभवतां रोम्णि रोम्णि करुणाऽऽसीत् । तां दृष्टवाऽनुयायिनोऽपि मिष्टमात्सर्येण ज्वलन्ति स्म ।

अधुनाऽत्र वयं २०३५ तमे वैक्रमीये वर्षे सञ्जातं वृत्तान्तं लेखिनीदीपेन प्रकाशमानं कुर्मः । पूज्यपादगुरुवराणां तद्वर्षीयं चतुर्मासं वढवाण (वर्धमान) नगरे स्वजन्मभूमावासीत् । ३७-३७ वर्षाणि व्यतीतानि, तदनु गुरुवराणां चतुर्मास-लाभाद् वढवाणग्रामीयसङ्घस्योल्लासः सहजमुल्ललित आसीत् । योगत एतस्मिन् वर्षे गुरुदेवजीवितस्य ७५ वर्षाणि परिपूर्णानि भवन्ति स्म । अतो गुरुवराणामुपकारैर्वासिता मुम्बईमहानगरीया झालावाडप्रदेशीयाश्च सङ्घा गुरुभक्त्यै विशालं 'अमृतमहोत्सवं' कर्तुं बद्धकक्षा उत्कण्ठाश्च सञ्जाताः ।

तदानीमस्मै अमृतमहोत्सवाय रतिलालदेसाईवर्येण 'जैन'पत्रस्याऽग्रलेखमध्ये हृदयङ्गमा अमी शब्दा आलिखिताः- ''तत्रभवद्भिर्मुम्बईमहानगरेष्वन्यस्थानेषु च शासनप्रभावकानि यानि कार्याणि कारितानि, करुणाभावप्रेरितैश्च तत्र-भवद्भिर्जैनसङ्घस्य (आर्थिकरीत्या) दुःखार्त्तभ्रातॄणां कष्टानां निवारकाणि यानि कार्याणि कृतानि, तानि धर्मसेवायाः समाजसेवायाश्चैकप्रेरककथारूपा भवितुमर्हन्ति।... ७५ वर्षीयाः श्रीमदाचार्यवर्या इदानीं वयोवृद्धाः सन्ति, अत्तलशास्त्रीयज्ञानवत्त्वात् ते ज्ञानवृद्धा अपि सन्ति, ६० वर्षाणि यावत् पृथुलसंयमपर्यायवत्त्वात् ते चारित्रवृद्धा अपि सन्ति । इत्यर्थं तत्रभवताममृतमहोत्सव उचित एव कर्तव्योऽस्ति, इतस्तु तत्रभवज्जीवनं कार्याणि च नित्यमुत्सवमयान्येव सन्ति... ।''







अमृतमहोत्सवस्य विविधाऽऽयोजनानि निश्चितानि जातानि। आकर्षकनिमन्त्रणपत्रिकाऽपि प्रकाशिता। किन्तु... गुर्जरे कथितम्– 'न जाण्युं जानकीनाथे सवारे शुं थवानुं छे.' संस्कृते चाऽप्युक्तं– **'को जानाति जनो जनार्दनमनोवृत्तिः कदा कीदृशी ?'** इति पङ्क्तिद्वयस्य स्मारिका महाविषादप्रदात्री शिवेतरा दुःखदा दुर्घटना महोत्सवारम्भदिनद्वयात्प्रागेव सौराष्ट्रेषु सञ्जाता। राष्ट्रीयविपद्रूपेण घोषिता प्रसारसाधनेषु च द्योतिता सा दुर्घटना नाम मोरबीनगरीया रौद्रा पूरस्यापत्तिः।

तस्मिन् दिने मोरबीनगरस्य मच्छुनदी चण्डरूपं धारितवती। सरिद्बन्धः कडकडशब्दैस्त्रुट्यत्, उच्छलन्तो जलप्रवाहाः सपदि समस्त–मोरबीनगरे प्रासरन्। शतशो गृहाणि ध्वस्तीभूतानि। सहस्रशो मानवा अवाक्पशवश्च कालकवलिताः सञ्जाताः, इतः परःसहस्रा मानवाः पशवश्चाऽऽधारहीना जाताः। एतद् दुःखदं वृत्तं गुरुवरैः प्राप्तम्। तेषां च सानुक्रोशं मानसं सद्योऽद्रवत्। शीघ्रं स्वशिष्यान् सङ्घनायकाँश्चाहूय तत्रभवद्भिः स्पष्टमादिष्टम् – ''यदा जनता विपद्ग्रस्ता भवेत्तर्हीदृशो महोत्सवोऽनर्होऽव्यवहारी च स्यात्। अतो महोत्सवस्यायोजनानि अवरुध्य महती सम्पद् मोरबीपूरपीडितेभ्यः समर्पयत'' इति। एतेन तत्पूज्यैः **'परहितनिरतानामादरो नात्मकार्ये'** इति मङ्क्तिः सान्वर्था कृता।

शिष्यवृन्दसङ्घाभ्यां गुरुदेवहृद्गता वाणी शिरसा वन्द्या कृता। अमृतमहोत्सवोऽत्यल्पधनव्ययेनौपचारिक एव कृतः, तस्मिन्नवसरे पूज्यप्रवरप्रेरितैः श्रावकैर्महद् धनं मोरबीपूरग्रस्तेभ्यः प्रदत्तम्। जाने गुरुवरैरमृतमहोत्सवात् प्रति करुणामहोत्सवः प्रवर्तितः। आयाति स्मरणे रघुवंशीयश्लोकार्द्धम्– **'आदानं हि विसर्गाय सतां वारिमुचामिव'** इति। पूज्यपादारविन्दशुद्धात्मगुरुवराणां सानुकम्पं हृदयं प्रस्तुतश्लोक–पङ्क्तेर्जीवत्स्वरूपमासीत्।

एतादृश्याः परोपकारवृत्तेर्धारकं गुरुवराणां करुणाशीलं हृदयमिदं सुभाषितं प्रमाणीकरोति–

**जलदो भास्करश्चन्द्र –, श्चतुर्थो धर्मदेशकः।**
**एतेषामुपकाराणां, सीमा नास्ति महीतले॥**

भावार्थोऽयम् – मेघः, रविः, सोमश्चतुर्थश्च धर्मस्योपदेष्टा गुरुः। एषां चतुर्णामपि उपकारो पृथ्वीतलेऽनन्योऽस्तीति।





परोपकाराय वहन्ति नद्यः,
परोपकाराय फलन्ति वृक्षाः।
परोपकाराय दुहन्ति  गावः,
परोपकाराय सतां विभूतयः।।

## करुणापूर्णं जीवनम् ४१

अथ पुण्यनामधेयगुरुदेवानां जीवनेऽस्थिमज्जावत् स्थितायाः करुणावृत्तेरन्यदेकं प्रशस्तमुदाहरणम्। तन्नाम वैक्रमीये २०३३-२०३४ तमवर्षयोर्निर्गतयोर्द्वयोर्महतोः ६'री'पालकपदयात्रासङ्घयोर्नित्यशः क्रियमाणमनुकम्पादानम्।

पूज्यवराणां प्रेरणया सानुकम्पं दानमिदं प्रत्यहं पदयात्रासङ्घस्य बहिर्निवेशं सायं घटिकाद्वयं यावद् दीयमानम्। निकटस्थग्रामादुपनगरादुपवनाच्चागता जनताः शिष्टाचारेणोपविश्यन्ते स्म। पश्चान्मुक्तमनसा वस्त्र-कम्बल-स्थाली-लघुपिठर-उपहस्तिका-जलधरी-जीवनोपयोगिगृहसामग्री-धान्याऽऽदीनि कार्यकर्तारस्तेभ्यः समर्पयन्ति स्म। निरन्तरं ७२-७२ दिनानि यावन् मुम्बई-शत्रुञ्जयमहातीर्थस्य पदयात्रासङ्घे, २४-२४ दिनानि यावत् श्रीशत्रुञ्जय-गिरनारमहातीर्थस्य पदयात्रासङ्घे प्रवृत्तिरियमस्खलिता निरन्तराया स्थिता। 'सुरेशभाई गुलाबचन्द झवेरी, भरतभाई अमरचन्द झवेरी' इति द्वाभ्यां कार्यकर्तृश्रावकाभ्यामेव दशसहस्राणि स्थाली-लघुपिठर-जलपात्रादीनि मुम्बई-पादलिप्तपुरमहातीर्थपदयात्रासङ्घमध्ये प्रदत्तानि आसन्।

अनर्गलद्रव्याणि दीयमानानि आसन्। नवानि द्रव्याणि कथमागमिष्यन्ति ? इति विचारोऽपि अकृत स्यात्। तथाऽपि गुरुकृपया तत्प्रवृत्तिः कदाऽपि सव्यवधाना न जाता।

अनुकम्पादानस्य ग्रहीतृभिर्जिनधर्मो मुक्तकण्ठेन श्लाघ्यते स्म। तद्दृष्ट्वैतादृशं नितरामनुभूयते स्म यदेतेन दानेन कदाचित् कश्चिज्जीवः प्राप्तसम्यक्त्वो भवेत् तर्हि न विस्मयः । अनुकम्पादानस्य महान् प्रभावो जैनेतरेष्वपि प्रसृतः। गुरुवराणां कालधर्मस्य पश्चादेतादृशा प्रसङ्गा अपि कर्णविषया अभवन्। वयं तेषु एकतमं प्रसङ्गं स्मरेम।




સાધુ મહારાજ
શ્રી શત્રુંજય મહાતીર્થ પદયાત્રા સંઘ



गुरुवराणां कालधर्मस्य सन्देशोऽस्मदीयसांसारिकजन्मभूमि-दर्भावती(डभोई)नगर्यां समासादितः। तदानीं विपण्यां जैनाः स्वाऽऽपणान् पिधातुं लग्नाः। एवं दृष्टवा यवनैरन्यजैनेतरैश्च पृष्टम्- ''युष्माकं केन गुरुणा देवत्वं प्राप्तम् ?''

उत्तरं दत्तम् - ''मुम्बईमहानगरतो भक्तान् (६'री'पालकसङ्घं) नीत्वा डभोईनगरे प्रतिष्ठामहोत्सवार्थमागत आसीत्, तेन गुरुणा देवत्वं प्राप्तम् (कालधर्मं प्राप्तमिति)।''

जैनेतरैः पुनरुक्तम् - ''निर्धनिकजनानां येन वस्त्राणि अन्नभाजनादीनि चादापयत् तेन गुरुणा देवत्वं प्राप्तम् ? तस्य मानार्थं तु वयमपि आपणान् स्थगितान् करिष्यामः।'' तस्मिन् दिने तैर्यवनैरन्यैश्च जैनेतरैरपि स्वाऽऽपणाः पिदधिरे। अयमासीत् तस्य पदयात्रासङ्घीय-स्यानुकम्पादानस्य प्रभावः।

गुरुवराणां हार्दिककरुणापरिचायका एतत्तुल्यास्तु नैके प्रसङ्गाः सन्ति। ये स्थललाघवादिह लिखिता न सन्ति।

★ ★ ★

एकस्मिन् संस्कृतसुभाषिते कथितम् यद् -

**न सा दीक्षा न सा भिक्षा, न तद्दानं न तत्तपः।**
**न तद् ध्यानं न तन्मौनं, दया यत्र न विद्यते ।।**

एतादृशाः करुणावृत्तिप्रेरकाः श्लोका गुरुवराणां दृष्टिपथ आगता न वा तस्मादज्ञोऽस्मि। परं, एतावत् नूनं जानामि-ते गुरुवरा आसन्नेतादृशानां श्लोकानां हार्दं यावज्जीवं हृदयस्थकारकाः। तत एव तु तत्रभवतां प्रत्येकप्रवृत्तिषु करुणावृत्तिर्विलसन्ती दृश्यते।





कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां,
छायां कर्तुं पथि विटपिनामञ्जलिः केन बद्धा ?
अभ्यर्थ्यन्ते जललवमुचः केन वा वृष्टिहेतो-
र्जात्यैवैते परहितविधौ साधवो बद्धकक्षाः ।।

# ४२ संवेदनयुतं हृदयम्

''हैयुं पीगळावे एवी एक धर्मप्रेमी भाईनी वात...'' विक्रमसंवत् २०१९ तमे वर्षे 'सेवासमाज' इति मासिकपत्रस्य दीपोत्सवाङ्के उक्तशीर्षकयुते हृदयवेधके लेखे पूज्यपादगुरुवराः स्वयमेकं हृदयस्पर्शिप्रसङ्गं प्रस्तुतवन्तः। साधर्मिकाणां मनोवेदनायाः पूज्यपादप्रवराणां च तत्प्रति संवेदनायाः शब्दशो दर्शक एष प्रसङ्गो गुरुवरेण गुर्जरभाषायां यादृशो व्यावर्णितस्तादृश एवाऽत्र संस्कृते दर्श्यते –

''अधुना कश्चिद् धर्मी जैनबान्धवो मत्समीपमागतवान्, निजगृहे च पादन्यासं कर्तुमनुनयं कृतवान् । मया पृष्टम् – 'क्व वससि ?'

तेन कथितम् – 'सेनेटेरियमगृहे वसामि' (सेनेटेरियमनाम संस्थाकीयं भाटकीयं वा लघुगृहम्)। आधिक्ये तेन कथितम् – 'गुरुदेव ! अधुना द्विचतुरैर्दिनैर्भवानागच्छेत्तर्हि साधु, यतः पञ्चषदिवसैर्मया स्थानं रिक्तीकर्तव्यम्।''

अहं पृष्टवान् – भ्रातः ! नास्ति तव स्वकीयं गृहम् ?

स उत्तरं दत्तवान् – 'गुरुदेव ! एकखण्डीयलघुगृहार्थेऽपि पञ्चसहस्राणां रूप्यकाणां मूल्यं प्रतिमासं च ४० रूप्यकाणां भाटकम् । सार्द्धद्विशतरूप्यकाणां मम वेतनम्, गृहे षण्णां सदस्यानां परिवारः, एकः पुत्रो महाविद्यालये पठति । अत एतावन्ति रूप्यकाणि दातुं कथं शक्नोमि ?,

एतस्य भ्रातुः कष्टमयं जीवनं श्रुत्वा मम हृदि बह्वी अर्तिरभवत्।

किञ्चिद् विश्रम्य मया पुनः पृष्टम् – 'स्थानं रिक्तीकृत्य क्व गमिष्यसि ?'

हस्तौ संयुज्य तेन सपीडमुक्तम् – 'अन्यस्मिन् कस्मिंश्चित् सेनेटेरियमे स्थानं प्राप्तुं प्रयत्नं करोमि । स्थानं प्राप्स्यते तर्हि मासद्वयं तत्र यापयिष्यामः। अन्तिमद्वादशमासा एवंविधा एव व्यतीताः। एषां कष्टानामवसानं कदा भविष्यति, तत्तु परमेश एव ज्ञातुं शक्नोति।'



इदं श्रुत्वाऽहं सबाष्पो जातो हृदयं च वेदनया भृतम् । एतादृश एक एव न, अपि त्वनेके परिवाराः सन्ति । ईदृशानां





साधर्मिकाणां सन्तापः समग्रजैनसङ्घेभ्यो लज्जाप्रदोऽस्ति।'' ईदृशाननेक- स्वानुभवान् प्रस्तुय साधर्मिकाणामुत्कर्षाय गुरुवरा उत्कटपरिश्रमाः सञ्जाताः।

साधर्मिककृते प्राथमिकशाला-व्यायामशाला-चिकित्सालयादिभिः संयुतायाः, जिनालय-प्रतिश्रय-पाठशालादिभिः परिमण्डितायाः, शतचतुष्ट्यमिताः शतपञ्चकमिता वा साधर्मिकपरिवारा अल्पभाटकेन निवासाय शक्नुयुरेतादृश्याः 'जैन कोलोनी' इति संस्थाया निर्माण-विचारणा अपि जाता । तत्कृते सम्पूर्णार्थिकप्रश्नस्य निराकरणं गुरुवरैः स्वयं दर्शितम्। तथा च विक्रमसंवत् २०१६ तमस्य वालकेश्वरचतुर्मासे तत्रभवतां प्रेरणयाऽऽश्विनमासीये धवलपक्षीये दशमीदिने संस्थापितेन वालकेश्वर-जैन-उद्योगगृहेण नैके मध्यमवर्गीयजैनसाधर्मिकजना उत्तममालम्बनं प्राप्तवन्त आसन्। सा संस्था अद्यापि नामान्तरेण प्रवर्तमानाऽस्ति।

तस्मिन् समये गुरुवरप्रेरणया प्रतिवर्षं नैकसहस्राणां (अन्त्यवर्षेषु तु लक्षाणां) रूप्यकाणां दानानि साधर्मिकेभ्यः प्रत्यक्षेण परोक्षेण वा दीयन्ते स्म।

यत्साधर्मिकभक्तेर्माहात्म्यं 'पर्युषणाऽष्टाह्निका'ग्रन्थमध्ये **'एगत्थ सव्वधम्मा, एगत्थ साहम्मिआण वच्छल्लं । बुद्धितुलाए तुलिआ, दो वि अ तुल्लाइं भणिआई।'** ईदृशेनाऽभिरामेण श्लोकेन गीतं, तत्साधर्मिकभक्तेरर्थः केवलं सङ्घसाधर्मिकवात्सल्यरूपेणैव समर्यादो भवेदिति गुरुवराणामीषदपि अभिप्रेतं नाऽऽसीत् । प्रत्युत, तद्व्याख्या पीडितसाधर्मिकाणां निवास-भोजन-शिक्षण-औषधोपचारा-दिव्यापकतया भवेदितीष्टमासीत्।

यद्यपि तत्रभवन्तो गीतार्थयुगदर्शिगुरुवरा आसन् । तत एतादृशकार्याभिमुखे नेत्रे निमील्य विरोधवाताल्याः स्रष्टृनुपेक्ष्य स्वस्थ-सन्तुलितविचारधारां चोररीकृत्य शासनमार्गं संरक्ष्य साधर्मिकभक्तेः पुरस्कर्ता ते गुरुवरा आसन् । अत एव तु तत्रभवद्भिः 'सेवासमाज' मासिकपत्र ईदृशं गीतार्थतापूतमालेखनं गुर्जरभाषायां कृतम्-''(१) सप्तसु क्षेत्रेषु येऽग्रिमा सन्ति तत्प्रति सदैवोच्चैस्तरां पूज्यभावो रक्षणीयः। अग्रगण्यक्षेत्रेषु समर्पितं द्रव्यमनग्रिमक्षेत्रेषूपयोक्तुं विचारोऽपि न कर्तव्यः । (२) अग्रिमक्षेत्राणि अनग्रिमक्षेत्राऽपेक्षयाऽनुत्तमानि, तथाऽपि प्रत्येकक्षेत्राणि स्वस्थानेषूत्तमानि सन्ति तन्नित्यं स्मर्तव्यम् (३) अवसरे पीडितक्षेत्राणां पोषणार्थं विवेको रक्षणीयः । (४) यूयं जिनभक्तिप्रभृतिषु रसिकतरा स्यात, तर्हि कामं युष्मदीयायां तस्यां मङ्गलमयप्रवृत्त्यामुद्यता भवेत । परं, यूयं यद्द्रव्यमुपयोक्तुमिच्छेत तस्मान्मनागपि पीडितक्षेत्रेभ्योऽवश्यं दातव्यम्।''

शासनप्रीतेः साधर्मिकप्रीतेश्चोभयोर्नादः कीदृशो गुञ्जायमानो भवति लेखेऽस्मिन्? यद्यपि, साधर्मिकप्रीतिरपि अन्ततस्तु शासनप्रीतेराविष्कारं करोति नूनम्।





स्वकर्मनिर्माणविधौ प्रयत्नं ,
कुर्वन्ति ये सन्ति गृहे गृहे ते।
परार्थनिर्माणपरायणा ये,
सन्त: कियन्तो भुवि तेऽत्र सन्ति ?

# साधर्मिकाणां समुद्धारका: ४३

**'परेषामुपकाराय महतां हि प्रवृत्तय:'** अर्थात्, महापुरुषाणां प्रवृत्तय: शश्वत् परोपकारायैव भवति। स्वसाधनाऽऽराधनासु लीना अपि ते जीवानामन्येषां दु:खानि दूरीकर्तुं कामं प्रवर्तनो।

येषां गुरूणां कृते **'मानवकायेनाऽपि देवतुल्यजीवनधारका: ...' 'अस्य युगस्याऽपरिमिताऽद्वितीय-पुण्येश्वरा:... 'शासनसमाजयोरभूतपूर्वोन्नते: कारका:'... 'प्रसन्नचित्ता:, ऋजुहृदया:, उदारमना:, गीतार्थप्रवरा:...'** इत्यादिहृदयोद्गारान् जिनशासनस्य विद्वांस: श्रमणवर्या मुक्तकण्ठेन विकिरन्ति स्म, ते पूज्यपदकजा युगदिवाकरगुरुवरा अप्यासन्नेतादृशा एव शासनसन्निष्ठ-परोपकारशीला महापुरुषा:। साधर्मिकाणां कृते तु तत्रभवन्त: पूर्णवत्सलहृदया आसन्।

तस्मिन् समये मुम्बईमहानगरे जैनधर्मिणामागमनं रोगचिकित्सा-व्यवसायादिहेतुना विशेषमासीत्। किन्तु मुम्बईमहानगरमागतास्ते धर्मिजना निवास: क्व कार्य इति मुह्यन्ति स्म। येषां केषाञ्चित् स्वजनानां गृहं मुम्बईमहापुरे न स्यात्, ते जनास्तु मुह्यन्त्येव । अपि तु येषां स्वजनगृहं मुम्बापुर्यां स्यात्, तेऽपि स्वजनानां लघुगृहत्वात्तत्र गमनाय सङ्कोचं प्राप्नुवन्ति स्म।

एतादृश्यां विकटस्थित्यां सर्वैरपि अनुभूयते स्म - मुम्बईसदृश्यां महानगर्यामेका जैनधर्मशाला नूनं भवितव्येति।

पूज्यपादप्रवराणां मानसेऽपीयं समस्या स्थानमाप्तवती। अतो वैक्रमीये २०१६ तमे वर्षे मुम्बई-वालकेश्वरस्य चतुर्मासे पर्वाधिराजपर्युषणामध्ये साधर्मिकभक्तिनामकं कर्तव्यं हृदयत उपदिश्य धर्मशालाप्रस्तावस्तत्रभवद्भि: प्रस्तुत:। गुरुवरा उक्तवन्तश्च हृदयस्पृक् - ''युष्मत्साधर्मिका: मुम्बापुर्यामागच्छेयुस्तदानीं ते, 'अथेह क्व वसनीयम्?







क्व भोक्तव्यम्? भीषणमहार्घतायुगेऽत्र शरीरोपचारः क्व कर्तव्यः?' इति पीडिता भवेयुस्तद् युष्मादृशेभ्यः सुखिभ्यः क्षोभदमस्ति। तत्प्रश्नस्य निराकरणार्थमहमद्य धर्मशालार्थं युष्मान् प्रेरयामि।''

पूज्य गुरुवराणामूर्जस्विनी ओजस्विनी प्रेरणा तदानीं प्रबलप्रतिश्रुतिमप्राप्नोत्। दानेश्वरा धनस्रोतोऽवाहयन्। चतुर्णां वर्षाणां समयावधौ २० लक्षाणां रूप्यकाणां व्यये सति वैभवशालिनी धर्मशाला निर्मापिता। इयमासीदेतत्समयखण्डीया वार्ता यदा रूप्यकं शकटचक्रवन्महद् गण्यते स्म।

वैक्रमीये २०२१ तमे वर्षे लालबाग-भूलेश्वरेत्याख्यस्थले निर्मितायाः पञ्चभूमिकधर्मशालाया अतिभव्य उद्घाटनसमारम्भ आयोजितः। धर्मशालाया विशालनिवासरचनायां ५६ खण्डा आसन्। आधिक्ये च भोजनशाला - जैनवाटिका - जैनपुस्तकालय - जैनोपचारकेन्द्रादिविभागा अपि अन्तर्गता आसन्।

विक्रमसंवत्सरे २०१८ तमे गुरुवराणां पुण्यप्रेरणया 'श्रीसाधर्मिकसेवासङ्घ-मुम्बई' इत्याख्या संस्था स्थापिता, यया ६० सहस्राणि रूप्यकाणि साधर्मिकेभ्यः प्रतिवर्षमुपयोज्यन्ते स्म। तथा चाऽस्मिन्नेव वर्षे २५० परिवाराणां जीवनाऽऽवश्यकसामग्री-समर्पणप्रबन्धोऽपि प्रारब्धः।

एतादृशैरनेककार्यैर्गुरुवरा 'साधर्मिकाणां समुद्धारकाः' इति जैनजगति यशोधरा जाताः। यद्यपि, लब्धविपुलकीर्तयोऽपि शासनसमर्पिता अमी महापुरुषाः स्वजीवनं नित्यं नम्रताशीलं यापितवन्तः। नम्रतापूर्णतज्जीवनाय विनम्रतापूर्णवन्दनेन सह, अत्र धर्मश्रद्धाशील-कविवरश्रीमावजीदामजीशाहविरचितस्य स्तुति-अष्टकस्य प्रस्तुतविषय-सम्बद्धश्लोकेन पूज्यपादगुरुवरेभ्यः प्रणतमस्तकोऽहं भावाऽञ्जलिं समर्पयामि-

'मुम्बापुरस्य जनता गृहवञ्चिताऽस्ति,
वृष्टं न चैकभवनं पदमोचनाय।
इत्थं विचार्य विहिता जिनधर्मशाला,
सूरिः स धर्मविजयो विजयं बिभर्तु।।'





साहंमियंमि संपत्ते,
घरंगणे जस्स होइ न हु नेहो।
जिणसासणे भणियमिणं,
सम्मत्ते तस्स संदेहो।।

## देशकालज्ञ-निष्णातचिकित्सकाः ४४

एकदा कस्यचिन्नृपस्य राजसभायामपराधिनः खलास्त्रय आरक्षकैरानीताः। त्रयो दोषभाजस्तुल्यदोषा आसन् । अतः संसज्जनैर्मनसि चिन्तितं सहजम् - 'राजा त्रीनपि आगस्कृतः समानमनुशासिष्यती'ति।'

परम्... आश्चर्यम्! नरपतिनैकोऽपराधी सभायां केवलं गर्हित्वा मुक्तः। द्वितीयः सन्ध्यापर्यन्तमवरुध्य कारागारे प्रक्षिप्तः पश्चाच्च विमुक्तः। तृतीयं चाऽसितवर्णैर्मुखलेपं कारयित्वा राजा रासभस्योपरि पृष्ठमुखमुपावेशयत्, स्वानुचरैश्च समस्तायां नगर्यां त्रपाजनयित्री तस्य गर्दभयात्रा कारितवान्।

राजसभासदो विस्मितवन्तः - 'एतादृशो न्यायप्रियो राजाऽपीदृशः पक्षपाती भवेत्? एतेषामपराधः समानस्तथाऽपि एकः क्षुद्रशिक्षाऽर्होऽपरौ तु कठोरशिक्षाऽर्हौ कथं सञ्जातौ? इति।' अतः कारणजिज्ञासुभिस्तै राजा पृष्टः-''नरपाल! को हेतुरस्ति विभिन्नशिक्षायामस्याम्? कृपया ज्ञापयतु।'' इति।

राजा प्रतिभाषितवान् - ''भोः! मया त्रयाणामपि समाचारमानेतुं महामात्यः प्रेषितोऽस्ति । ते त्रयोऽपि अपराधिनो सभाया गताः, तदनु किं सञ्जातमिति महामात्यसमाचारेणाऽवगमिष्यथ तदा निःसंशया भविष्यथ'' इति।

अन्येद्यू राजसभायां नृपस्याज्ञया मन्त्रिणा कथितम् - ''महाराज! अतिक्षुद्रां शिक्षां प्राप्तवान् पातकी








શત્રુંજય હોસ્પિટલ, પાલિતાણા



'मयोपक्रोशाऽर्हं गर्हणीयमयुक्तं च कार्यं कृतमि'ति अतितरां पश्चात्तापं कृतवान्। अन्ततश्च स प्रायश्चित्तरूपमुद्बन्धन्या स्वजीवनस्याऽन्तमानीतवान्।'' इदमुपकर्ण्य सभा स्तब्धमना जाता।

अमात्येन पुनरनुसन्धानं कृतम्-''मध्यमशिक्षाभाजा दोषिणाऽपि आत्मना लज्जाप्रदं कृत्यं कृतमिति तीव्रोऽनुसन्तापोऽनुभूतः। अतस्तेन देशत्यागः कृतः। अधिकतमां च शिक्षामापन्नः पालकी तु सर्वथा निर्लज्ज आसीत् । रासभयात्रा यदा सायाह्ने तद्गृहसमीपात् प्रसर्पति स्म, तदानीं गर्दभाऽऽसीनो मुक्तलज्जः स स्वपत्नीमाकारयत्, निःसङ्कोचं चाऽब्रवीत्-'अयि! उष्णोदकमुपसंस्कुरु देहशुद्धयै, अथाऽल्पा एव रथ्या अवशिष्टाः सन्ति। पश्चादचिरादाऽऽयामी' ति।'' आकर्ण्येदं राजसदस्या नूनं निःसन्देहाः सञ्जाताः। रुग्णाऽनुरूप उपचारो भवितव्यः। अतस्ते राज्ञा कृतां शिक्षां साधुमेनिरे।

* * *

उपकथया सहाऽनया गुरुवरजीवनकथां तोलयेम चेन्नितरामनु-भविष्यते-गुरुवरा अपि आसन्नेतादृशाः प्राज्ञाः। यथा प्राज्ञो राजा यथापराधि प्रावृतत् तथा तत्रभवन्तोऽपि यथाजनं प्रेरणाप्रदायकाः, यथादेशं यथाकालं च कार्यकारका आसन्। यतस्ते न केवलं प्राज्ञाः, अपि तु प्राज्ञोत्तमाः।

मुम्बापुर्यामन्येषु च नानाविधस्थलेषु गुरुवरैरमीभिर्यथायोग्यं शताधिकानि देवयानसदृशानि जिनमन्दिराणि अशीत्यधिकराज-प्रसादसदृशपौषधनिकेतनानि पञ्चविंशत्यधिकभव्याऽऽचाम्लगेहानि धर्मपाठगृहाणि धर्मभवनानि च (अन्तिमत्रयाणामपरप्रसिद्धनामानि क्रमशः 'आयम्बिलशाला-पाठशाला-धर्मशाला' इति) निर्मापितानि।

अपरत्र यथाकालमावश्यकतामनुलक्ष्य प्रत्येकमहोत्सवेषु पदयात्रा-सङ्घादिषु च हृदयमहोभावान्वितं कुर्वन्ति अनुकम्पादानानि, साधर्मिकोत्कर्षाय विविधसंस्थास्थापनानि, पादलिप्तपुरे 'श्रमणीविहार' 'शत्रुञ्जयहोस्पिटल'सदृशानि उदाहरणीयनिर्माणानि दैशज्ञैः कालज्ञैरिमैर्गुरुवरैः कारितानि।



# अभिनव नव अमृतकुंड




चेत: सार्द्रतरं वच: सुमधुरं, दृष्टि: प्रसन्नोज्ज्वला,
शक्ति: क्षान्तियुता मति: श्रितनया, श्रीर्दीनदैन्यापहा।
रूपं शीलयुतं श्रुतं गतमदं, स्वामित्वमुत्सेकता-
निर्मुक्तं प्रकटान्यहो नवसुधा - कुण्डानि सम्प्रत्यपि॥



प्रपञ्चभयाद् वयं केवलमेषु अन्यतमस्य शत्रुञ्जयचिकित्सालयस्य लघ्वीमुद्भवकथां ज्ञापयित्वा प्रस्तुतप्रसङ्गोपरामं दास्यामः-

प्रसङ्ग एवं प्रवृत्तः - वैक्रमाब्दे २०३३ तमे पादलिप्तपुरे चतुर्मासस्थितानां पूज्यपादयुगदिवाकरगुरुवराणामपि गुरुवराः पूज्यपादारविन्दाचार्यप्रवरश्रीमद्विजयप्रतापसूरीश्वराः सामान्यपाद-स्खलनवशाद् भुवि पतिताः । अस्थीनि च क्षतिग्रस्तानि जातानि। वयोवृद्धगुरुवराणामुपचाराय पादलिप्तपुरस्य रुग्णे तन्त्रे काचिदपि सुव्यवस्था नोपलब्धा। पूज्यप्रवराणां भक्तवर्गेण तत्क्षणं भावनगरतो मुम्बई-महानगरतश्च चिकित्सकाः समाहूताः। गुरुवराणां च प्रबल उपचारः कारितः।

किन्तु, अनेन प्रसङ्गेन गुरुवराणां पेशले हृदये ज्वलनकणिका प्रज्वलितवती-'गुरुवरास्तु सकलसङ्घनायका आचार्यप्रवरा सन्ति, अतो भक्तजनैः सर्वा व्यवस्था कृता। परं ये सामान्याः साधवः सन्ति तेषामुपचाराय किम्? पादलिप्तपुरे तु शतशः श्रमण-श्रमण्यो नित्यं विराजन्ते । सहस्राऽधिकाः श्रावक-श्राविका अपि वसन्ति। एषां सर्वेषां शारीरिकमानसिकयोगक्षेमचिन्ता गुरुवरमनसि प्रादुर्भूता । सा एव चिन्ता जाता शत्रुञ्जयचिकित्सालयस्य स्वप्नजननी।

एकः* ख्यातःश्रमणवरस्तदानीं गुरुदेवकृते विशेषणं प्रयुङ्क्ते स्म- **'नानाविधदानप्रवाहवारिवाह'** इति । यतो गुरुवरकृते किञ्चिदपि कार्यमशक्यं नाऽऽसीत् । तस्मिन्नेव वर्षे गुरुवरैः पर्युषणामहापर्वमध्ये शत्रुञ्जयरुग्णालयाय श्रमणोपासकाः प्रेरिताः। परिणामतो दानप्रवाहः प्रारब्धः । शत्रुञ्जयचिकित्सालयस्य च निर्माणं जातम्।

अस्मिन् समग्रप्रसङ्गे पूज्यपादगुरुवराणां करुणा-पुण्यप्रभावौ तु दृश्येत एव । परं ततोऽपि विशेषतः स्थल-कालयोरावश्यकतामनु-लक्ष्योपदेशदानस्य क्षमताऽपि दृश्यते ।

*स ख्यातःश्रमणो नाम पूज्यपादाचार्यदेवश्रीविजयधर्मसूरीश्वराणां (काशीवाला) विनेयः पूज्यपन्न्यासप्रवरपूर्णानन्दविजयगणिवरः 'कुमारश्रमण' इत्युपनामधारकः।



मुम्बईमहापुरे जनसङ्ख्या निरन्तरं वर्धते स्म। अतो गुरुवरास्तत्र तेषां कृते जिनमन्दिराणि प्रेरयाञ्चक्रुः, इतरत्र पादलिप्तपुरे जिनमन्दिराणां प्रचुरत्वात् तत्रत्याऽऽवश्यकतानुसारेण जिनमन्दिराणि न, किन्तु शत्रुञ्जयचिकित्सालयं प्रेरयाञ्चक्रुः। यतो गुरुवरा आसन् देशज्ञाः समयज्ञाश्च सूरिवराः। निष्णातचिकित्सकसदृशा गुरुवराः।



# बालतरोरुत्सेक्तारः पालयितारश्चोद्यानपालाः ४५

"गुरुदेव! श्वः प्रवचनमहं करिष्यामि। अत्रभवद्भिः श्वस्तनीये प्रवचने यथासमयमागन्तव्यमेव। अहं प्रवचनविवक्षुरस्मि भवदीयनिश्रायामेव।"-अयमासीदेकेन लघुना नवदीक्षितबालमुनिनाऽन्तरङ्गकल्लोलेन कृतोऽनुनयः।

उपासीनैः प्रसन्नैर्गुरुवरैर्हर्षपुरस्सरं 'साधु' इत्युक्त्वा प्रस्ताव उररीकृतः। अतिहर्षितः प्राप्ताऽनुमतिर्बालमुनिर्वन्दनं कृत्वा स्वस्थानमयात् । हृदयबहुमानपूर्वं तथाऽपि अधिकारपूर्वं ये विज्ञप्तास्ते गुरुवरा आसन्नाराध्यपादगुरुवराः श्रीमद्विजयधर्मसूरीश्वराः। वैक्रमसंवत्सरस्य २०३५ तमस्य चातुर्मासिकः समयः। पर्वाधिराजपर्युषणामहापर्वागमनं चाऽप्यभूत्। पर्वाधीशस्य प्राथमिकदिनानि व्यतीयमानानि आसन्। तत्रान्तरे पञ्चकर्तव्यानां विवरणेषु अन्यतमस्य क्षमापनाकर्तव्यस्य विवेचनप्रस्तावे गुरुणा स बालमुनिरेकलघुवक्तव्यार्थं सन्नेहे। अस्मिन् वक्तव्ये मिथ्या 'मिच्छा मि दुक्कडं'कारकयोः क्षुल्लकमुनिकुलालयोः शास्त्रीयमाख्यानकमपि आसीत्।

दीक्षाजीवनस्य प्रथमं वर्षम्। तत्रापि सर्वप्रथमं प्रवचनम्। अतो बालमुनिः प्रकृत्यैव काहलमुत्सहते स्म। परमोत्साहात् तेन प्राग्दिने सायाह्ने पूज्यपादगुरुवराः पूर्वोक्तरीत्या विज्ञप्ताः।

गुरुवरा अपि यथावेलं प्रवचने बालमुनेरुत्साहादाजग्मुः। तत्रभवद्भिस्तत्र सभायां बालश्रमणस्य तद्वक्तव्यं श्रुतम्, सायाह्ने बालमुनिः पुनः गुरुवरं वन्दितुमगच्छत्, तदा गुरुवराः सकृत् पुनस्तद् वक्तव्यं श्रुतवन्तः, कुम्भकारस्य च कथानकपश्चान् मुक्तहास्या अभूवन्। बालमुनेः प्रोत्साहनाय गुरुवरैरेतत्कृतम्।

* * *







अन्य एको प्रसङ्गो वैक्रमीये २०३६ तमेऽब्दे चेम्बुरतीर्थे चतुर्मासे जातः। पर्युषणामहापर्वणः सप्तमे दिवसे माध्याह्निकं स्थविरावलिविषयकं प्रवचनं तेनैव बालमुनिना दीयते स्म। तस्मिन्नह्नि अनायासेन गुरुवराः प्रवचनसभायां यथासमयमागताः। गुरुवरनिश्रां प्राप्य बालमुनिरति मोदितवान्।

गुरुवराणामाशिषं गृहीत्वा स कल्पसौत्रिकं गुर्जरपठनमारब्धवान्। प्रवचनपश्चात् सायाह्ने *बालमुनिर्गुरुवरपार्श्वेऽगच्छत्, तदा गुरुवरैः समासेन प्रवचनसारांशो ज्ञापितः - ''भोः! चरित्राणि त्वया सुष्ठु कथितानि। मह्यमतीवाऽरोचन्त। किन्तु, वेगाद् वदसि। वक्तव्ये मनाग् विश्रामशीलो भव, तर्हि अधिकं शोभनं वक्तुं शक्ष्यसि'' इति।

अद्य पृच्छ्यन्ते मया ते गुरुवराः - ''भोः गुरुवराः! शुचिस्मिताः! भवन्तो बालतरोरुत्सेक्तारः पालयितारश्चोद्यानपाला आसन् किम्? तदन्तरेण प्रशंसारूपेण जलसिञ्चनं मार्गदर्शनरूपेण च तत्संवर्धनं कर्तुं कुतः शक्नुयुर्भवन्तः?

*तद्बालमुनिर्नाम सम्प्रति मत्संयमरथप्राजितारः परमकृपावन्तो गुरुवराः पूज्यचरणकमलाः सिद्धहस्तसर्जकाचार्यदेवश्रीमद्विजयराजरत्नसूरीश्वराः।






विना गुरुभ्यो गुणनीरधिभ्यो,
जानाति धर्मं न विचक्षणोऽपि।
यथार्थसार्थं गुरुलोचनोऽपि,
दीपं विना पश्यति नान्धकारे।।



# गुरुतीर्थम् ४६

त्रिवेणीसङ्गमः।

यत्र तिसृणां सरितामैक्यं (मिलनं) भवति तत्स्थानमुच्यते लोके 'त्रिवेणीसङ्गमः' इति। ईदृक्स्थानस्य माहात्म्यं वैदिकपरम्परायामतीवास्ति। यत्र त्रिवेणीसङ्गमः सृज्यते, तत्स्थानं कोटिभिः श्रद्दधानैर्वैदिकधर्मिभिस्तीर्थरूपेण पूज्यते, तस्मिन् स्थाने स्नानादीनपि कृत्वा तैः स्वात्मा पवित्रीभूतो मन्यते। यथा प्रयागतीर्थम्। तत्र 'गङ्गा-यमुना-सरस्वती' इति तिस्रो नद्यः सङ्गच्छन्ते।

अद्य दृष्टिबिन्दुविशेषेण विलक्षमेकं तीर्थसंस्तवं कुर्याम। तन्नाम गुरुतीर्थम्। वयमत्र प्रसङ्गनायकगुरुवराणां संस्तवं तीर्थरूपेण करिष्यामः। यद्यपि तिसृणां सरितां सङ्गमेन न, अपि तु त्रयाणां सद्गुणानां सङ्गमेन। इमे ते त्रयो गुणाः - '(१) आराधकता (२) प्रभावकता (३) रक्षकता' चेति।

तेषु 'आराधकता' इति प्रथमो गुणः। गुणोऽयमतिमहान्। आ श्रामण्यशैशवाद् जीवनं यावत् साधूनां कृतेऽयं गुणो नितरामादरणीयः। यतः प्रभुशासने प्रभावकताहीना रक्षकताहीना वाऽऽराधकता नूनमावकार्या, परमाराधकताहीना प्रभावकता रक्षकता च न वरा।

गुरुवरा जिनशासनस्य प्रभावका रक्षका आसन्, परमाराधका अपि महान्त आसन्। वयमत्र तत्रभवतामाराधक-जीवनस्य स्थूलविहङ्गावलोकनं कुर्याम।

स्वश्रामण्यशैशवादारभ्य या नित्याराधनास्तत्रभवत्सु लक्ष्यमाणा आसँस्ता इमाः (१) अन्वहमष्टोत्तर-







शतनमस्कारमहामन्त्रस्य दश जपमालिकाः । (२) श्रीगौतमस्वामि-गणधरप्रभूनां सहस्राधिको जपः। (३) अन्यो नैकविधः पृथग् जपः (४) पञ्चस्याराधनातिथिषूपवासतपः (५) नैकानि वर्षाणि यावज्ज्ञानपञ्चमीतिथेराराधना। (६) श्री सिद्धचक्रनवपदमण्डलस्य दीर्घकालिकी आराधना (७) प्रत्येकमासारम्भदिन आचाम्लतपः।

श्रामण्यस्य शैशवकाले यदा प्रत्यहं १३-१३ घण्टावादनानि यावज्ज्ञानयज्ञ आरब्ध आसीत्तदापीमा आराधना नित्यमचला आसन्। श्रामण्यस्योत्तरावस्थायां यदा शासनप्रभावनायाः सुवर्णकालः प्रवर्तमान आसीत्तदापीमा आराधना निर्बाधा एवाऽऽसन् । इह तु केवलं स्थूलदैवसि-काराधनानामेव दिग्दर्शनं कारितम् । तदृऋते विविधतपो - जप-भक्ति-ज्ञान-ध्यानप्रभृतयोऽन्या अनेकविधा आराधनास्तु नाऽत्र सम्मीलिता सन्ति।

आराधनायुतं तेषां प्रेरणास्पदं जीवनं निरीक्ष्य कथनलालसो भवामि, 'इमे गुरुवरा आराधना-प्रभावना-रक्षात्मकास्त्रिमूर्तिस्वरूपा आसन्। तेषु तावत्ते प्रथमं आराधनामूर्तिरूपाः।'

अद्य, ईदृशस्य गुरुतीर्थस्य यात्रां कुर्वन्नहं विशिष्टरोम-विक्रियामनुभवामि।

कस्मिंश्चित् संस्कृतश्लोके चतुर्भिर्मानदण्डैर्गुरोर्व्याख्या शोभना कृताऽस्ति तथाहि-

**धर्मज्ञो धर्मकर्ता च, धर्ममार्गप्रवर्तकः।**
**सत्त्वेभ्यो धर्मशास्त्रार्थ-देशको गुरुरुच्यते।।**

श्लोकस्य भावार्थोऽयम् - यो धर्मं यथावज्जानाति, स्वयं धर्मं यथाज्ञानमाचरति, धर्ममार्गं प्रवर्तयति, भव्यजीवानां च धर्ममुपदेशयति तन्नाम गुरुः।

प्रसङ्गेऽस्मिन् श्लोकोक्तं धर्मकर्तृविशेषणं गुरुजीवने साधूपलक्षितं भवति।






सक्का वि णेव सक्का,
गुरुगुणगणकित्तणं करेउं जे।
भत्तीए पेलिआण वि,
अन्नेसिं तत्त्थ का सत्ती ?

तीर्थम् ।

तस्य विवरणं पृथग् पृथग्विवक्षया भवितुमर्हति । प्रत्येकविवक्षया सह गुरुवरसमन्वयोऽपि सौकर्येण भवितुमर्हति ।

'नौरिव भवादुद्धरेत् (तारकं भवेत्) तत्तीर्थम्'। अनया व्याख्यया गुरुवरा अपि तीर्थरूपा आसन् । अनेकेषां श्रमणानां श्रमणोपासकानां च ते तारका आसन्, प्रागुक्तजैनेतरमहानुभावहसनअलीनूरमहम्मदसदृशानामपि तारका आसन्। केषाञ्चिन्निस्तारस्तत्रभवद्भिर्भवाम्भोधेः कृतः संयमप्रदानेन। केचिच्च जनास्तत्रभवद्भिर्दुर्गुणकर्दमादुद्धृताः। समासेन तृणाऽरणिमणिन्यायेन सर्वेषां निस्तारकत्वाद् गुरुवरा आसंस्तीर्थतुल्याः।

शास्त्रेषु तीर्थं द्विविधं वर्णितम् - (१) जङ्गमतीर्थम् (२) स्थावरतीर्थमिति । अनयोस्तीर्थान्तशब्दयोर्विवरणं प्रसिद्धम्। श्रामण्यग्रहणानन्तरं गुरुवरा अपि प्रस्तुतव्याख्याऽन्तर्गता जङ्गमतीर्थरूपा आसन्।

'त्रिवेणीसङ्गमनाम तीर्थम्' चेति गतप्रसङ्गोक्तव्याख्यानुसारेण तत्रभवत्सु शासनाराधनारक्षाप्रभावनारूप-सद्गुणानां त्रयाणां सङ्गतत्वाद् गुरुवरा आसँस्तीर्थसमाः। अस्माभिराराधका गुरुवरा पूर्वप्रबन्धे दृष्टाः, अथ शासनप्रभावका गुरुवरा दृष्टव्याः। यद्यपि, अनेकप्रभावकशासनकार्यशृङ्खला नाम गुरुदेवजीवनम्। तेषां प्रभावकताया यथार्थं वर्णनमत्र नास्ति शक्यम् । अतो वयमिह केवलं द्वौ महाशासनप्रभावकप्रसङ्गौ स्मरेम।

एतयोर्महाप्रभावकप्रसङ्गयोः सर्वप्रथममस्ति विश्वशान्ति-आराधनापर्व । स प्रसङ्ग २०१८ तमे वैक्रमसंवत्सरे पौषमासे प्रवृत्तः। तदा गगनेऽष्टग्रहमहायुतिर्भवित्री आसीत्। तया युत्या सम्भाव्यदुष्टप्रभावविषये दैवज्ञैर्जनेषु महातङ्कः प्रसारितः । फलतो वृत्तपत्राणि प्रत्यहमष्टग्रहयुतेः सम्भाव्यमानघातकपरिणामवार्ताभिस्तन्निरोधकोपायवार्ताभिश्च







प्रपूर्यन्ते स्म। अतः सर्वत्र भीतेः साम्राज्यं प्रसृतम् । अस्मिन् समये भयार्तजैनजनता विप्रकोविदानां क्रियाकाण्डानामनुगन्त्री मा भूत्, भयमुक्ता च भवेदित्याशयात् पूज्ययुगदिवाकरगुरुवरा जैनशासनमान्यतपो-जपमयसाधनां विश्वशान्ति-आराधनापर्वरूपेण घोषितवन्तः।

आयोजनेऽस्मिन् तपःक्षेत्रे पञ्चविंशतिसहस्त्रमितानि आचाम्लतपांसि, नैकसंख्यक-अट्ठमतपांसि च निर्णीतानि । जपक्षेत्रे सपादकोटिमानमन्त्राधिराजनमस्कारमहामन्त्रजप-लक्षत्रयमान-लोगस्ससूत्रजप-लक्षैकमानोवसग्गहरसूत्रजपाश्च निर्धारिताः। अनुष्ठानेषु मुम्बादेव्या विशालशृङ्गाटके २५ सहस्त्रजनसमावेशक्षमे महति जनाश्रये (मण्डपे) श्रीअरिहन्तमहापूजन - श्रीशान्तिस्नात्रादिविधानानि, प्रतिदिनं पृथक् पृथक् वक्तृणां वक्तव्यानि, सङ्गीतमया रात्रिभावनाश्चैवंविधा नवनवाः कार्यक्रमा आयोजिताः। तस्मिँश्चैव स्थले शान्तिनगरमण्डप-महावीरमण्डपयोः श्रीपार्श्वप्रभोर्नवग्रहादीनां च विशिष्टरचना-भिर्जैनपुरावृत्तस्य सप्राणझल्लिकाप्रदर्शनमपि कृतम्।

एवंविधायोजनमध्यगता युगदिवाकरगुरुवरा आसन्। अतः सर्वे कार्यक्रमाः सीमातीतसफला जाताः। जपः सार्द्धद्वयकोटिमानो बभूव। दशसु स्थलेषु तत्कालं कृतेनाऽऽचाम्लप्रबन्धेन ४०सहस्त्रमाचाम्लतपांसि जातानि। ३०-३० सहस्त्राणि यावद् भाविकजनाः शान्तिनगरस्य भव्यपृथुलमण्डपेषु प्रत्यवसरेषु लाभार्थमागताः। नव दिवसीयविश्वशान्ति-आराधनासत्रस्य चाऽन्तिमं दिनम्। तस्मिन् दिने निर्गतायां विशालशान्तिधारारथयात्रायां भाविकजना जलपूरवत् प्रवृद्धाः। लक्षाधिकभाविकयुता सा रथयात्रा। वायुयानेन गगनतो रथयात्राया उपरि मुम्बईमहानगरस्य च विविधप्रदेशानामुपरि शान्तिजलबिन्दवो विक्षिप्ताः।

अस्याः सामूहिकधर्मक्रियायाः प्रभावं मन्यामहे, उताऽन्यत् किञ्चित्। परं, अष्टग्रहयुतेः कोऽपि दुष्टो घातको वा प्रभावः क्वाऽपि नाऽनुभूतः। स्वपरधर्मेषु च स्थिताः सरलहृदया जना जिनशासनस्याऽनुष्ठानानि प्रति सादरा अहोभावयुताश्च सञ्जाताः। विदुषाऽध्यापकेन श्रीमावजी-दामजीशाहवर्येणेदं वृत्तमेकस्मिन् श्लोके सुतरां गुम्फितम्-

'अष्टग्रहैर्भययुला जनता यदासीत्,
'किं किं भविष्यति' विचारविमूढचित्ता।
विश्वस्य शान्तिकरपर्वविधायको यः,
सूरिः स धर्मविजयो विजयं बिभर्तु।।'




आशा नाम नदी मनोरथजला, तृष्णा तरङ्गाकुला,
रागग्राहवती वितर्कविहगा, धैर्यद्रुमध्वंसिनी।
मोहावर्त-सुदुस्तरातिगहना, प्रोत्तुङ्गचिन्तातटी,
तस्या: पारगता विशुद्धमनसा, नन्दन्ति योगीश्वरा:।।
निस्पृहत्वं महासुखम्
आशा महानदी

## पञ्चविंशतितमः श्रीवीरनिर्वाण-शताब्दीमहामहोत्सवः ४८

चरमतीर्थपति–परमतारकपरमात्मश्रीमहावीरस्वामिनः पञ्चविंशतितम्यां निर्वाणशताब्द्यां तेषामासन्नोपकारिणां भगवतां निर्वाणशताब्दीमहामहोत्सवो भारतवर्षीयजैनसङ्घाङ्गणे समुपस्थितः। पूज्यगुरुवराणां जीवने तेषां पवित्रप्रेरणासान्निध्यबलेन सञ्जातेष्वनुत्तरेषु शासनप्रभावककार्येष्वन्यतमं महाप्रभावककार्यमेतद् निर्वाणशताब्दीमहोत्सवस्वरूपम्। अस्मिन् शताब्दीमहोत्सवप्रसङ्गे पूज्ययुगदिवाकराचार्यदेवश्रीमद्विजयधर्मसूरीश्वराणां सबलनेतृत्वपुण्यप्रभावादिगुणान् जैनजनता ज्ञातवती।

केन्द्रीयशासनायोजितस्यास्य महामहोत्सवस्य विरोधे कैश्चित् काल्पनिककारणैः कतिपयश्रमणादिवर्गेण विरोधमहावातः सृष्टः। अनेन महावातेनाऽकम्पिता गुरुवरा न भीताः। परं निश्चलतासमताभ्यां सस्मिताननाः सञ्जाताः। एतान् निर्भयगुरुवरान् दृष्ट्वा स्मरणस्य गगन एको रुचिरः सुभाषितविहग उड्डयते, तथाहि –

**विरम विरसायासादस्माद्दुरध्यवसायतो, विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे।**

**अयि जडमते! कल्पापाये व्यपेतनिजक्रमाः, कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः॥**

गुरुवरा अपि एतत्तुल्या महापुरुषा एवाऽऽसन्। अतो विरोधमहावातेनाऽपि किम्? विरोधमहावातस्तत्कृतेऽकिञ्चित्कर एव जातः।

अन्येषु नगरेषु विरोधकरैर्यत्किञ्चित् साफल्यमपि प्राप्तम्। किन्तु, मुम्बईमहानगरे तु विरोधेऽग्रेसरस्तेषामग्रिम आचार्यः स्वयमासीत्। तथाऽपि परोलक्षसंख्यका मुम्बईनिवासिजैना गुरुवरैः सार्द्धमेव स्थितवन्तः।

जिनशासनधर्मध्वजं दिगन्ते प्रस्फुरायमाणस्य भव्यमहामहोत्सवस्येमाः सन्ति कतिपयास्तत्त्वपूर्णा वार्त्ताः–

(१) २५ तमशताब्दीमहोत्सववर्षप्रारम्भदिनमासीत् आश्विनमासीयाऽमावस्या (दीपावलीपर्व)। अस्मिन् दिने गुरुवर-प्रेरणया प्रत्येकसङ्घेषु समूहलोगस्ससूत्रजप–समूहछट्ठतपः–समूहआचाम्लतपःप्रभृति साधनाऽऽराधना च गणनातीता जाता।

(२) कार्तिकशुक्लद्वितीयादिवसेऽभूतपूर्वा विशालतमा निर्वाण–कल्याणकमहारथयात्रा 'भातबझार' इति स्थलतः प्रारब्धा।







'जैन' सामयिकं (= इति नाम तत्कालिकं मासिकपत्रम्) कथयति– 'पञ्चविंशतिसहस्रमिता जना अस्यां रथयात्रायां पदयात्रया सम्मीलिता:। नैकेषु स्थलेषु च सम्मीलिता लक्षद्वयाधिका जैन–जैनेतरजनास्तद्दर्शनं कृतवन्त:।'

रथयात्रापश्चात् सभामण्डपे महोत्सवस्य विशेषकार्यक्रमार्थं महाराष्ट्रशासनेन तदानीं दशलक्षरूप्यकमितं स्वानुदानं घोषितं महाराष्ट्रराज्ये च वर्षावधि मृगयाप्रतिबन्धो घोषित: । श्रीवीरप्रभो: पञ्चसु कल्याणकदिनेषु अहिंसापरिपालनाय पशुवधगृहेषु पशुवधप्रतिबन्धोऽपि (= गुर्जरभाषायां 'कतलबन्धी' इति) घोषित: ।

(३) तदनु प्रभोर्दीक्षाकल्याणकदिने पूर्वोक्तरथयात्रासदृशी द्वितीयाऽतिभव्या रथयात्रा निर्गता । तस्यां किल द्वाविंशतिसहस्राधिका जनाश्चलन्तो दृश्यमाना आसन् । समवसरण–जलमन्दिरादयो विविधैर्द्रव्यैर्निर्मिता रचना रथयात्रायामस्यां विशेषा आसन् ।

(४) निर्वाणशताब्द्या: प्रधानमायोजनमासीद् मुम्बापुर्यां चैत्रमासे। तस्मिन्नायोजने चैत्रशुक्लनवमीत: पञ्चदिवसीयो महामहोत्सव: 'ओगष्ट–क्रान्तिमैदान' इत्याख्ये क्रीडाक्षेत्रे योजित आसीत् । चैत्रशुक्लत्रयोदश्यां महामहोत्सवमुख्यदिने निर्वाणशताब्द्या उत्कृष्टतमा विशालजन्मकल्याणक–रथयात्रा पूज्यगुरुदेवनिश्रायां प्रारब्धा । यस्यां लक्षाधिका जना: सम्मीलिता आसन् । मध्ये पूर्वप्रधानमन्त्रिमोरारजीदेसाईवर्यस्तां रथयात्रां सत्कृत्य वर्धापयामास । सार्द्धद्वयलक्षमिता लोकाश्च तां दृष्टवन्त: ।

सायाह्ने 'चौपाटी' प्रदेशीये समुद्रतीरे ५० सहस्रमितजनो–पेतधर्मसंसदि 'विधानसभाऽध्यक्षवानखेडे–जनकल्याणमन्त्रिवसन्त–रावपाटील–मुख्यमन्त्रिशङ्कररावचव्हाण–शिक्षणमन्त्रिप्रभाराव'इत्यादयो बहवो महानुभावा परमात्मने श्रीमहावीरजिनेन्द्राय हस्तौ संयोज्य भावाञ्जलिं समर्पितवन्त:।

(५) निर्वाणशताब्दीमहोत्सवसमापनं वालकेश्वरनगरे भव्य–महामहोत्सवरथयात्रा–धर्मसभादिभिर्युक्तपञ्चदिवसीय–महोत्सवपूर्वकं सञ्जातम्। अस्य महामहोत्सवस्य निष्कर्षो दैनिकसमाचारपत्रे तदानीमित्थं प्रस्तुत आसीत्– ''जैनधर्मस्य जैनसिद्धान्तस्य जैनसङ्घस्य चाऽनन्य–साधारणगौरववर्धको जातोऽयं महोत्सव:''.... इति ।

नैकेषामात्मनां सम्यग्दर्शनप्राप्ते:, नैकेषाञ्च सम्यग्दर्शनशुद्धेरा–लम्बनदायकोऽसौ महाप्रभावको महोत्सव आसीत् । जिनशासनस्य जयघोष: सर्वत्र प्रसृत:। यद्यपि तत्श्रेयोऽधिकारी क:? विरोधवातूलस्याऽग्रे निश्चलस्थिता गुरुवरा एव तु । अन्यथा शासनस्य श्रेयस्करी श्रेष्ठा च प्रभावना कथमभविष्यत्? गुरुवरा इदं कर्तुमशक्नुवन्, यत: केवलं स्वकल्याणस्यैव न, किन्तु जगत्कल्याणस्य विचारका आसन्नेते महागुरव: ।

एतेषां महागुरुवराणां कृते प्रसङ्गसमापने स्मरणमञ्जुषाया: संस्कृतश्लोकालङ्कारमेकं प्रदर्शयामो यथा –

**चलन्ति गिरय: कामं, युगान्तपवनाहता: ।**
**कृच्छ्रेऽपि न चलत्येव, धीराणां निश्चलं मन: ।।**





निन्दन्तु नीति-निपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥

## सर्वं हि महतां महत् ४१

महागुणा जनाः कुत्रचिदपि निवसन्ति, तथाऽपि ते धूपशलाकावद् धर्मस्यामोदं प्रसारयन्ति सर्वत्र। दीपकवद् धर्मस्यालोकं वितन्वते सुदूरम्। कुसुमवच्च केवलं स्वस्यैव न, अपि तु धर्मोपदेशकार्यैः परिमलयन्ति परेषामपि जीवनम्। तेषां कृते किञ्चिदपि नाऽशक्यम्। यतस्ते सन्ति महापुरुषाः। एतादृशेषु महापुरुषेष्वेकतमा आसन् पुण्यनामधेया गुरुवराः पूज्यपादयुगदिवाकराचार्यदेवश्रीमद्विजयधर्मसूरीश्वराः।

जीवनमध्ये बहूनि कार्याणि तत्रभवद्भिः कृतानि, यैर्गुरुवरा अस्माभिर्धूपवद् दीपवद् कुसुमवच्चानुभूयेरन्। महत्सु तेषु केषुचित् कार्येषु गुरुवराणां निरन्तरं सान्निध्यमपि न प्राप्तम्। परं केवलं तेषां वचनलब्ध्या कृपादृष्ट्या च तानि महान्ति कार्याण्यपि सुकराणि जातानि।

तत्र स्मृतिविषयं भवति महाराष्ट्र–भाईन्दरनगरीयं देवयानसदृशं ५२ जिनालयतीर्थम् । विक्रमसंवत् २०२३ तमस्य वर्षस्य माघमासीया काचिल्लावण्यमयी सन्ध्या। मादुंगा–जीवनअबजीज्ञानमन्दिरोपाश्रयान्तः ५२ जिनायतनस्य निर्माणाय गुरुवरैर्देवचन्दश्रेष्ठी प्रेरितः। गुरुवचनं तेन चातकवद् गृहीतम्, परमेकं भयस्थानं दर्शितम् – "गुरुदेव! मत्समीपे स्थानमभिरामं विद्यते। ५२ जिनालयसर्जनं तत्र सुशक्यम्। किन्तु, अरण्यसदृशे तत्स्थले परमात्मपूजां के करिष्यन्ति ? इदानीं तु तत्र नास्ति कश्चिदपि पूजकः।" भाविनं समयं पश्यद्भिरिव गुरुदेवैः प्रत्युक्तम् – "श्रेष्ठिवर्य! मा चिन्तय। पूजकानामुपासकानां च तत्र पङ्क्तयो भविष्यन्ति। केवलं कार्यं शोभनं सम्पादनीयम्।

गुरुवरप्रेरणाप्रभावतः परःसहस्रलोकानां श्रद्धास्थानं महाराष्ट्रराज्ये सर्वप्रथमं निर्मितं ५२ जिनमन्दिरं सम्प्रति २८ वर्षेषु व्यतीतेषु सत्सु देवविमानसदृशं विराजतेतमाम्। एतादृशानि महान्ति कार्याणि कदाचिदद्यापि भवन्ति। परं,











तदर्थमतितरां धैर्यश्रमावावश्यकौ स्त इति तत्कर्तारः सुचारु जानन्ति। पूज्यपादगुरुवरास्त्वेतद्विधस्य महतेः कार्याय भाईन्दरनगर एकमेव दिनं स्थिता आसन्। जिनालयनिर्माणस्थले केवलं तत्रभवद्भिर्वासक्षेप एव कृतः। प्रभावोपेतं च तद् वासचूर्णं जाने विशालजिनालयस्योद्गममूलं जातम्।

अथैतत्तुल्यमन्यत् संक्षिप्तमुदाहरणम्। लघ्वी प्रेरणा, नहिवत् परिश्रमः, महच्च कार्यम्। तन्नाम बोरीवली–जामलीगलीसङ्घस्य विशालो हृदयङ्गमो विस्मयकारक उपाश्रयः। अयं विशाल उपाश्रयोऽपि गुरुदेवप्रेरणया निर्मितः । परं तदर्थं तत्रभवद्भिश्चतुर्मासमेकमपि तत्र न कृतम्।

अस्योपाश्रयस्य विशालतादिस्वरूपं दृष्ट्वा शासनस्य सक्षमा आचार्या अपि विस्मिता भवन्ति। ततोऽप्यधिकं विस्मयमेवं ज्ञात्वा तेऽनुभवन्ति यत् पूज्यपादयुगदिवाकरगुरुवरैस्तत्सङ्घान्त एकं चतुर्मासमपि न कृतम्। एतत्सदृशानां प्रभावककार्याणामन्यान्यपि नैकान्युदाहरणानि सन्ति। कियन्ति वृत्तानि लिखेयम्?

क्षीप्रचटीउचिततया पक्वा न वा? तज्ज्ञातुं केवलं तस्याः कस्याश्चित् कणिकाया एव संस्पर्श आवश्यकः। तथा गुरुवराणां प्रभावपूतस्य जीवनस्य प्रतिच्छायाऽनयोः प्रसङ्गयोः सुतरां परिदृश्यते।

एतज्ज्ञात्वा विस्मयो भवेदिति शक्यम्। परमहं विस्मयं न प्राप्तवान्। यतः कियत्कालात्प्रागेव तद्विस्मयस्य समाधानदात्री एका संस्कृतपङ्क्तिर्मम दृष्टिपथे समागता, सा चेयम् **'सर्वं हि महतां महत्'** इति। इदं तत्तात्पर्यम्, महतां मानवानां तु जीवनमपि स्यान्महद् मरणं चाऽपि... तेषां स्वभावोऽपि स्यान्महान् प्रभावश्चाऽपि... एवं तेषां कार्याण्यपि महान्ति एव स्युः। अतस्तत्राश्चर्येणाऽलम्।






कल्पद्रुमः कल्पितमेव सूते,
सा कामधुक् कामितमेव दोग्धि।
चिन्तामणिश्चिन्तितमेव दत्ते,
सतां तु सङ्गः सकलं प्रसूते।।







# ज्ञानयज्ञोद्दीपका गुरुवराः ५

परमतारक–त्रिभुवनपति–तीर्थकृत्–परमात्मश्रीमदजितनाथप्रभोः स्तवने (गुणकीर्तने) **'श्रीमदानन्दघन'** इत्याख्यो योगिजनः 'वस्तु विचारे रे दिव्यनयन तणो रे, विरह पड्यो निरधार 'इत्युक्त्या सम्यग्ज्ञानं दिव्यनेत्रस्योपमयाऽन्वितं कृतवान्।

सज्ज्ञानचक्षुष एतादृशा दिव्यचक्षुषः सन्ति, यैः पदार्थस्य प्राप्यते पूर्णबोधः। ऐहिकपदार्थानां तात्त्विक–स्वरूपस्याऽऽत्मनश्च तात्त्विकस्वरूपस्य प्राप्यते सद्बोधः। यावदमुष्य दिव्यचक्षुषः सम्प्राप्तिर्न भवति, तावदज्ञतया सीमातीतगुणसमृद्धेरधीशोऽपि देही क्लेशं प्राप्नोति। परमपदं प्रति तस्य प्रगतिरेतच्चक्षुर्विरहे नाममात्राऽपि न भवति।

अत एव महोपकारिणां भगवतां श्रीजिनेश्वराणां शासने सज्ज्ञानप्राप्तेर्माहात्म्यं पदे पदे कथितम्। किं कारणं तस्मिन्? इदमेव यदागच्छद्भिर्ज्ञानै : स्वयमेव सद्बोधो वर्धते। सुबोधश्च वर्धते तदा व्यवहार–विचिन्तनेषु वैशद्यं वर्धते, तेन चाऽक्षयपदं प्रति जीवः प्रगतिवान् भवति। अनेन कारणेनैव तु प्रत्येको नूतनदीक्षित आत्माऽपि संयमग्रहणदिनादेव गुर्वाज्ञापूर्वकं ज्ञानसाधनालीनो भवति।

आयुषष्षोडशे वर्षे चारित्रं गृहीत्वा भाईचन्दकुमारात् **'पूज्यमुनिश्रीधर्मविजय'** इति नामधारका ते मुनिवरा अपि स्वजीवनेऽध्ययनस्य प्राशां प्राजनयन्। वयं तेषां तद् विस्मयजनकं ज्ञानाध्वरमंशमात्रमेवाऽत्रावलोकयामः।

* संयमजीवनस्य प्रारम्भतो दशवर्षाणि यावत्पूज्यगुरुवर्याः प्रतिदिनं दिवसस्य षष्टिघटिकामध्यात्, त्रिंशद्घटिका–पर्यन्तमध्ययनेष्वेकाग्रचित्ता आसन्।







* 'विद्याधनं सर्वधनप्रधानम्' इति सुभाषितं हृदयधरण्यामालिख्य विद्याधनार्जनाय निम्नोक्तग्रन्थानवलम्ब्य नानाविधविषयाणां तलस्पर्शिनोऽभ्यासका गुरुवरा आसन्।
* व्याकरणविषये लघुकौमुदी – सिद्धान्तकौमुदी – प्रौढमनोरमा – शब्देन्दुशेखर – पारिभाषेन्दुशेखर – वाक्यपदीय– पातञ्जलमहाभाष्यादयः।
* न्यायविषये तर्कसङ्ग्रह – न्यायसिद्धान्तमुक्तावली – पञ्चलक्षणी – सिद्धान्तलक्षण – षड्दर्शनसमुच्चय – जैनतर्कभाषा – प्रमाणनयतत्त्वालोक – स्याद्वादमञ्जरी – न्यायावतारादयोऽनेक–विधटीकाभिःसह ।
* साहित्यविषये पञ्चतन्त्र – रघुवंश – किरातार्जुनीय – माघ – नैषध– कादम्बरी – भट्टीकाव्य – तिलकमञ्जरी – त्रिषष्टिशलाकापुरुषचरित्रादयो लक्ष्यग्रन्थाः , साहित्यदर्पण – काव्यानुशासन – अलङ्कारचूडामणि – विवेक – काव्यप्रकाशादयो लक्षणग्रन्थाः।
* प्रकरणकर्मसाहित्यागमादिविषये च तत्त्वार्थभाष्य – प्रज्ञापनासूत्र – बृहत्सङ्ग्रहणी – क्षेत्रसमास – योगशास्त्र – अष्टकप्रकरण – षोडशक – पञ्चाशक – लोकप्रकाश – ज्ञानसार – वैराग्यकल्पलता – उपमितिभवप्रपञ्चा – अध्यात्मसार – अध्यात्मोपनिषद् – कर्मप्रकृति – पञ्चसङ्ग्रह – कर्मग्रन्थादयः सर्वागमाश्च सटीकाः।

अध्ययनस्येममुत्कटं यत्नमवलोक्य तस्य च विस्तरं निरीक्षमाणा वयमवश्यमेव प्रतीमः 'गुरुवरा ज्ञानस्य जाने जीवन्तं यज्ञमेव प्रारब्धवान्' इति।

आवश्यकक्रियायाः भवनदेव्याः स्तुतौ श्रामण्यविशेषणमस्ति **'ज्ञानादिगुणयुतानां नित्यं स्वाध्यायसंयमरतानां'** इति। अध्ययन–स्यैतद्विशालविस्तरं दृष्टवा विशेषणमिदं गुरुवरेषु सम्पूर्णं सुचरितमासी–दित्यनुभवो न भवति किम् ?





सज्झाएण पसत्थं, झाणं जाणइ य सव्वपरमत्थं।
सज्झाए वट्टंतो, खणे खणे होइ वेरग्गं।।



## नमोऽस्तु तस्मै तव शासनाय ६०

''महाराज! अन्त:काननं मध्येगुल्मं युष्माकं जैनानां एकं विशालं मन्दिरं विद्यते। अद्यापि तन्मन्दिरमविच्छिन्नमस्ति। युष्मदीया परमेश्वरा अपि तत्र विद्यन्ते। क्वचिद् वन्या: पशवोऽपि तत्र दृश्यन्ते । अस्माकं विना केऽपि न जानन्ति रहस्यमिदम्। आगच्छत तत्र, युष्मदीयपरमेशांश्च पश्यत।'' अर्धहिन्दीभाषायां कैश्चिददृष्टपूर्वजनैर्वनवासिभिर्भिल्लजनै: सहसाऽऽगत्योक्तमिदम्।

फाल्गुनकृष्णाऽग्रिमा सा तिथि:। तस्मिन् दिने पूज्ययुगदिवाकरगुरुवरा हिम्मतनगरत: केशरियाजीतीर्थस्य, पुन: केशरियाजीतीर्थतो हिम्मतनगरस्य २८ दिवसीय – छ'री'पालकपदयात्रासङ्घेन सह ग्रामानुग्रामं विहरमाणा आभापुराख्यं ग्रामं समागता:। माध्याह्निकप्रवचनसमये सञ्जाते केचिद् वनवासिन आदिवासिभिल्लजना आगत्य वार्तालापमिमं कृतवन्त:।

प्रभुभक्तगुरुवराणामन्त:करणे श्रुत्वेदं प्रबल उत्साह उद्भूत: । तत्रभवद्भि: श्रमणोपासका आहूता ज्ञापिताश्च – ''अस्माभिर्जिनालयो निरीक्षितव्य: । वयं जिनेश्वराणामनुयायिन: स्म:, अतोऽपि परमेश्वराणां स्थितेर्दर्शनमस्माभिर्नूनं कर्तव्यमेव।''

श्रावकै: स्वाभिप्राय: प्रकटीकृत:– ''गुरुदेव! इमे प्रत्यवरा अरण्यचरा: सन्ति। किंविधस्तत्प्रत्यय: ? गहनं गहनं नीत्वा कदाचित् प्रत्यवस्कन्दं कृत्वा ते लुण्टनस्य जीवनस्य वा प्रत्यवायकारका भवेयुस्तर्हि किं भवेत् ? तस्मादयं विचारो नूनमनुचित: प्रतिभाति।''

परं गुरुवरा ईदृशीषु नैराश्यपूर्णवार्त्तासु सर्वथा नीरसा आसन्। तै: श्रावकेभ्य: स्वनिर्णयो ज्ञापित: – ''इमे भिल्लजनाश्छलमाश्रयेयुरीदृशा नाऽवभासन्ते । ईदृशेन विशालेन पदयात्रासङ्घेन सह वयं नैकदिनै: पदयात्रां कुर्वन्तो दूरस्थं







परमेश्वरं पूजयितुं गच्छेम, अत्र चाऽतिनिकटस्थजिनालये विराजितपरमेशस्य पर्यवेक्षणमपि विस्मरेम, तर्हि वयं जिनाऽनुयायिन: कीदृशा: ? मदीयेच्छा निश्चलाऽस्ति–'अस्माभि: प्रभुदर्शनार्थं निश्चयतो गन्तव्यमेव' इति।''

तदनन्तरं श्रावकैर्गुरूणामन्तर्गता भावना शिरसाऽभिवन्दिता । यतो गुरोराज्ञा भवति सदैव शिवङ्करी। अनुप्रवचनं भिल्लजनानग्रेकृत्य कतिपयश्रमणै: श्रमणोपासकै रक्षकैश्च सह गुरुवरा अरण्यं प्रति प्रस्थितवन्त:। अपराह्नेऽर्धघटिकाऽनन्तरं वनान्तरे नृत्यमण्डप – रङ्गमण्डपादिभिर्युतं शिखरसहितं भव्यं जिनमन्दिरं दृग्गोचरमभवत् । गुरुवरा नि:सीमानन्दभाज: सञ्जाता:।

सर्वे जिनमन्दिरं गता:। गर्भगृहान्त: ५१ 'इंच'मिता विशालकाया: प्रशमरसनिमग्ना: श्रीआदिनाथपरमेश्वरा विराजन्ते स्म। अन्येऽपि चत्वारो जिनेश्वरा अखण्डिता आसन् । भिल्लजनेष्विदं जिनमन्दिरं 'लाखामन्दिर' इति नाम्ना विख्यातमासीत्।

दीर्घदृष्टियुता गुरुवरा: सजलनेत्राभ्यां संसारनाशकारणपरमेशान् प्रणतवन्त: । तै: श्रावका उक्ता: – ''जिनेश्वरा लक्षणैर्नूनं श्वेताम्बरीया: सन्ति। अतोऽस्मत्कर्तव्यम् 'अस्मदीया भगवन्तो दिगम्बरवर्ग–शासकीयपुरातत्त्वविभागादिषु न गच्छेयु:, परमस्मदीयसङ्घे पुन: पूजनीया भवेयुरि'ति।'' श्रावकैर्गुरुवचनमङ्गीकृतम्। अन्येद्यु: प्रतिमा–स्थानान्तरकरणं निर्णीय सर्वेऽपि सङ्घनिवेशं प्रत्यायातवन्त:।

अपरेद्युश्च 'री' पालकसङ्घश्चोरीवाडग्रामं प्राप्तवान् । तत्र दिनद्वयस्थैर्यं घोषितम्। अत्रान्तरे च प्रतिमास्थानान्तरं हिम्मतनगर–सङ्घमध्ये कृतम्। प्रवरगुरूणां मानसं तदानीमानन्दयुगलेनोल्लसति स्म। प्राचीनप्रतिमारक्षणस्याऽऽनन्द:, इतश्च तत्पुन: प्रस्थापनस्याऽऽनन्द:।

पूर्वप्रसङ्गोक्तानां त्रयाणां सद्गुणानामालम्बनेन गुरुवरसंस्तवं वयं तीर्थत्वेन कुर्महे, तेषु तृतीयगुणोऽस्ति 'रक्षकता' इति । प्रस्तुते प्रसङ्गे गुरुवरा अपि रक्षका ज्ञायन्ते।

विपत्सम्भवेऽपि जिनशासनस्य त्रातार:, आपद्मुखे गत्वाऽपि प्राचीनजिनप्रतिमानां रक्षितार ईदृशा आचार्यप्रवरा वर्तमानयुगे विरला: सन्ति। यद्यपीदृशी अवसरप्राप्तिरपि दुर्लभा। तं चाऽवसरं प्राप्य जीवनस्यैव न, अपि तु जिनशासनस्य सुखदस्मृतिस्वरूपमेतादृशं रक्षणकार्यं तु दुर्लभतरं नूनम्।

अद्य मम मानसवासिगुरुवराँस्तु प्रणंस्याम्येव । किन्तु विशेषेण यत्र प्रभुभक्तिरक्षणभावना निर्विकल्पेनाऽऽविर्भूता, तद् हृदयमपि नतशीर्षेण प्रणमन् कथयामि – **'नमोऽस्तु तस्मै तव मानसाय'** इति।





मन्त्रे देवे गुरौ तीर्थे,
दैवज्ञे स्वप्नभेषजे।
यादृशी भावना यस्य,
सिद्धिर्भवति तादृशी।।

## प्रभाते सूर्यास्तम् ५१

''अद्य गगनं कीदृशमभ्रविलिप्तं जातं गुरुवराः! जाने, विषादोऽनुभूयते।'' बालमुनिना स्वीयगुरुवरा उक्ताः।

वैक्रमस्य २०३८ तमसंवत्सरस्य फाल्गुनमासीयशुक्लपक्षीयैकादश्याः, शनैश्चरस्य दिनम्, मुम्बईमहानगरीयं 'मझगाँव' इति विस्तारीयं 'प्रेमसागराख्यं' चतुर्भूमिकं भवनम्, तस्य भवनस्य चतुर्थभूमिकायामेकार्धे जिनमन्दिरं द्वितीयाऽर्धे च सङ्घप्रतिश्रय आसीत्। (अद्यापि अस्ति।)

अनुमानतः समययन्त्रके सार्द्धदशवादने सति निजपाठग्रहणपश्चात् स बालमुनिरुच्चरितवान् प्रागुक्तशब्दान्।

तद्गुरुणा प्रतिध्वनितमिदम् - ''जवाहरलालनहेरुवर्यो मृत्युमाप्तवाँस्तस्मिन् दिनेऽपि एतादृशमेव निरालोकं निष्प्रभं विषण्णं च वातावरणमासीत्। अत एवमनुभूयते नूनमद्य श्वो वा कस्यचिन्महतः प्रभावशालिमहानुभावस्य जीवनविरामो भविष्यति।''

ते प्रभावशालिमान्याः कदाचित् सम्मुखस्थिताः काष्ठपल्यङ्के विराजमाना युगदिवाकरगुरुवराः स्वयं भविष्यन्तीति तु सोऽपि नाऽजानीत्तदानीम्। कलिकालसर्वज्ञभगवतां सानुभववचनमेवात्र चरितार्थं जातमिति प्रतिभाति यथा- **'भाविकार्यानुसारेण वागुच्छलति जल्पताम्'**।

निशायां ९.०० वादनवेलायां सत्यां यथासंवादं वातावरणं जातम्। गुरुवरस्वास्थ्यं सपदि परिवर्तनमाप्नोत्। ते त्यक्तसौख्याः सपीडाश्च सञ्जाताः। रात्रौ १२.०० वादनं यावदयं क्रमः स्थितः। तदनु षड्घटिका यावद् गुरुवरस्वास्थ्यं स्थैर्यमाप्नोत्। तदनन्तरं पुनश्चिन्ताप्रदमितस्ततस्तरलायमानं च सञ्जातम्।

प्रभाते स्थितिरतिकठिना सञ्जाता। गुरुवरान् परितः श्रमणा नमस्कारमहामन्त्रगानं कुर्वन्ति स्म। तेषां हृदयस्पन्दनानि अनियतानि आसन्। शनैः शनैश्चतुर्विधसङ्घः समागच्छत्। तन्मध्ये स्वयं नमस्कारजपं कुर्वन्तः पूर्णसमाधिगुरुवरा अपि अध्यात्मनिमग्ना आसन्, जाने ते मृत्युं सत्कर्तुं गच्छन्ति स्म।







समययन्त्रके प्रातः ५.४५ इति वेला सञ्जाता। घटिकात्रयेण नमस्कारभाष्यजपो निरन्तरं क्रियमाण आसीत् । अथ गुरुवराः स्वयं नमस्कारमन्त्रं वक्तुमक्षमा जाताः। तथाऽपि पूर्णजागरुकास्ते नमस्कारमन्त्रे दत्तावधाना आसन्।

प्रातर्यदा ५.५५ इति वेलायां सञ्जातायां गुरुवराः स्वस्माद् दक्षिणदिशः स्वस्य श्रमणपरिवारं प्रति सुधादृष्टिं प्रसर्तुं प्रवृत्तवन्तः । छायाचित्रपेटिकावत् शनैः प्रसरन्ती साऽऽमृतमयीदृष्टिः प्रसरन्ती प्रसरन्ती पूज्यपन्न्यासप्रवरश्रीसूर्योदयविजयगणिवराणामुपरि अन्ततः पतितवती, तदा समययन्त्रिका ५.५८ इति समयं प्राप्तवती । अलम्... तस्मिन् क्षणे पुण्यनिधानगुरुवरनेत्रे शश्वन्निमीलिते । श्वसनान्यपि शमितानि। तदानीं सव्यपक्षं प्रति नतं गुरुवरशीर्षं तेषामाजीवनान्तेवासिनः पूज्यपन्न्यासश्रीसूर्योदयविजयगणिवरस्य जानोरुपरिष्टात् स्थितम्।

गुरुवराणामन्तिमसुधादृष्टेः सुपवित्रशिरसश्चाऽन्तिमपावकस्पर्शस्य लाभद्वयं तेन भाग्यवता श्रमणवरेणाऽऽप्तम्।

* * *

असारेऽस्मिन् संसारे त्रयः पदार्थाः सारभूताः कथिताः। 'हृदयप्रदीपषट्त्रिंशिका'ग्रन्थमध्ये ते दर्शिताः सन्ति। यथा-

**मनोलयान्नास्ति परो हि योगो, ज्ञानं तु तत्त्वार्थविचारणाच्च।**
**समाधिसौख्यान्न परं च सौख्यं, संसारसारं त्रयमेतदेव।।**

भावार्थोऽयम् - मनोविजय एव प्रशस्यतमो योगः। तत्त्वानामर्थचिन्तनं शोभनतमं ज्ञानम्। समाधिसुखं चैव सर्वोत्तमं सुखम्। नूनं, जगति इमे त्रय एव पदार्थाः साररूपाः सन्ति।

पूज्यपाद्पुण्यनिधयो गुरुवरा नितरां सौभाग्यशालिन आसन्, यतस्तत्रभवन्त इमान् त्रीनपि साररूपपदार्थान् जीवनसमाप्तिं यावत् प्राप्तवन्तः।

* * *

५.५८ इति खेदकलिते तस्मिन् क्षणे नेत्रे केवलं गुरुवराणां निमीलिते, तत्रस्थचतुर्विधसङ्घस्य च लोचनानि सबाष्पानि सञ्जातानि। श्वसनं केवलं गुरुवराणामवरुद्धम्, तत्रस्थानां च सर्वभाविकानां श्वसनानि उन्मनीभूतानि। हृत्स्पन्दध्वनि केवलं गुरुवराणां प्रतिहतः, तत्रस्थसर्वगुरुभक्तानां च हृदयानि हृदयविदारकवेदनया प्रविद्धानि।

गुरुवरा 'युगदिवाकर' विशेषणेन विश्रुता आसन्। युगदिवाकरो नाम युगसूर्यः। गुरुवरा प्रभाते कालधर्मं प्राप्तवन्तः। जाने युगदिवाकरः प्रभातेऽस्ताचलमुपगतवान्। अतः कल्पना भवति **'प्रभाते सूर्यास्तम्'** इति।

फाल्गुनशुक्लत्रयोदश्या आसीत् तत् पवित्रं दिनमवरम् । लक्षमिता जनास्तदानीं शत्रुञ्जयमहागिरिवरमारोहन्ति स्म। शत्रुञ्जयाऽभिमुखैर्गुरुवरैरपि तदानीमेव कृतमूर्ध्वं गमनम्। अश्रुकलिललोचनाभ्यामद्य तदुत्तमं जीवनं स्मरामि, प्रणमामि चोपकारिणः महतस्तान्।





लाभेऽप्यलाभेऽपि सुखे च दुःखे,
ये जीवितव्ये मरणे च तुल्याः।
रत्यामरत्यां च निरस्तभावाः,
समाधिसिद्धा मुनयस्त एव॥

## ६२ महार्घ्यं जीवनम्, भव्यो विरामः

विद्वच्छिरोमणिकलिकालसर्वज्ञश्रीमद्हेमचन्द्राचार्यकृत–त्रिषष्टिशलाकापुरुषचरित्रमध्ये शोभना श्लोकपङ्क्तिरस्ति–'**महात्मनां महर्द्धीनां, उत्सवा हि पदे पदे**' इति। इयं पङ्क्तिः पूज्यगुरुवरजीवने नितरां सुचरितार्थाऽऽसीत्। अत एव तेषां जीवने केवला उत्सवा महोत्सवा एव न, किन्तु शासनप्रभावकमहाकार्याणि अपि बहूनि जातानि आसन् । नैतावद्, तेषां जीवनयात्रा यथा महाप्रभावसम्पन्नाऽऽसीत्तथा तेषां जीवनविरामोऽपि महाप्रभावक आसीत् । तादृश्येव च भव्याऽऽसीद् – गुरुवरदेहविलयपश्चान्निर्गता तत्रभवतां महाप्रभावशालिनी अन्तिमयात्रा। वयमत्र 'चित्रम्' 'अहो' इत्युद्गारजनकं बाष्पजनकं च विश्वाभिलेखरूपमद्भुतमतिभव्यं चरममन्तिमयात्राप्रसङ्गं लेखिनीवायुयानेनावलोकयामः।

* * *

२०३८ तमे वैक्रमीये वर्षे फाल्गुनशुक्लचतुर्दशीदिनमुखे ७.५५ इति वेलायां सत्यां सा विशालचरमयात्रा प्रारब्धा। तदानीमनेकेषां दुन्दुभिवादकमण्डलानां भजनीकमण्डलानां 'बोम्बे जैन स्वयंसेवकमण्डल'नामकवादित्रमण्डलीनां च गगनगामिवादित्ररवैः 'जय जय नन्दा, जय जय भद्दा' इति प्रचण्डघोषैश्च निखिलं वातावरणं शब्दमयमभवत्। तदानीं सर्वत्र निःसीमगुलालचूर्णमुड्डीयमानमासीत्।

'मुम्बईसमाचार'सदृशं ख्यातिप्राप्तं वृत्तपत्रं यत्कृते लिखति स्म – ''भारतराष्ट्रस्यैव भव्येतिहासमध्य एव न, प्रत्युत जगत इतिहासे पदयात्रापूर्विका '२१ किलोमीटर'मिता विशाला चरमयात्रा कस्यचिदपि महापुरुषस्य निर्गता इति







श्रुतं नास्ति। युगदिवाकरशासननायकश्रीमद्विजयधर्मसूरीश्वराणाम-स्यामन्तिमयात्रायां मुम्बईमहानगर्यां विशालसंख्यकगुरुभक्तजना सम्मीलिता आसन्।'' अस्यामन्तिमयात्रायां जनाऽर्णवः शब्दशः तरङ्गायते स्म। **सार्धतृतीयलक्षाणां यावज्जनानां मध्ये विराजन्ती गुरुवराणां शिबिका निःसीमसिन्धौ प्रसरद् बाष्पपोत इव दृश्यते स्म।**

मुम्बई-पायधुनीतश्चेम्बुरशाखापुरं प्रति गच्छन्त्याः शिबिकायात्रायाः प्रारम्भे 'जीपकार'इत्याख्ययानद्वयेनोद्घोषका निरन्तरमुद्घोषयन्ति स्म - ''श्रूयताम्, श्रूयताम्... मुम्बईमहानगरस्य महोपकारिणां, अद्वितीयशासनप्रभावक-शासननायक-पूज्याचार्य-देवश्रीमद्विजयधर्मसूरीश्वराणां शिबिकायात्राऽऽगच्छति... श्रूयताम्, श्रूयताम्...'' एवमेव यात्राऽवसाने चतुश्चक्रयानत्रयेण निरन्तरमनुकम्पादानं दीयमानमासीत्। रूप्यकाणां तण्डुलादीनां च दानमपि क्रियमाणमासीत्। शिबिकायात्रा 'अधुनाऽऽगमिष्यति, अधुनाऽऽगमिष्यति' इत्याशयात् मार्गस्य द्वयोरुपान्तयोर्निश्चलयानेषु विद्युत्स्तम्भेषु चोपरि स्थले स्थले जैन-जैनेतरजनाः पञ्चसप्तघटिकाभि-र्दश-दशघटिकाभिश्चातुरवदनाः प्रतीक्षन्ते स्म। सर्वे मानवा इमान् महागुरुवरान् शिरसा प्रणम्य वन्दन्ते स्म। दक्षिणभारतीयजना उत्तरभारतीयजना यावत् 'एस.आर.पी., पी.आइ.' इत्याख्या अपि शिबिकां दृष्ट्वा पादत्राणे निष्क्राम्य किञ्चित् प्रार्थयन्ति स्म।

अन्तिमयात्रामार्गेऽष्टोत्तरशतेषु स्थलेषु निबद्धानां पुष्पकरण्डिकानां रज्जूःकृष्ट्वा पुष्पवृष्टयः क्रियन्ते स्म। शिबिकायात्रायां सम्मीलिताः शतानि सहस्राणि युवानो युवतयश्च नग्नपादैश्चलन्ति स्म, मार्गमध्ये स्थाने स्थाने भक्तिपूर्वं दीयमानमेकमपि खाद्यं न खादन्ति स्म, यावद् दाधिकां गुडजलं शर्कराजलं वाऽपि नाऽपिबन्। तद्दिने बहवो जना उपवासतपः कृतवन्तः। चतुर्दशघटिका यावत् प्रवाहितेयं शिबिकायात्रा २.०० वादनसमये चेम्बुरशाखापुरसीमां प्राविशत्, तदा मानवसमुद्रश्चेम्बुरनगरे विलसति स्म। चेम्बुरधर्मस्थानप्रवेशसमये प्रवेशद्वारस्योपरिष्टादभित-श्चावलम्बमाना भाविकजनाः गुरुवरसंस्मरणाय शिबिकायाः कौशेयानां कुम्भिकानां च प्राप्तये मिथः सङ्घृष्टवन्तः। फलतः शिबिका यदा चन्दनचितिकां प्राप्तवती, तदा तत्सर्वमेवाऽदृश्यं जातम्। भावाऽर्णवस्य जनाऽर्णवस्य चैतादृशानि






आदित्यस्य गतागतैरहरहः, संक्षीयते जीवितम्,
व्यापारैर्बहु-कार्यभारगुरुभिः, कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं, त्रासश्च नोत्पद्यते,
पीत्वा मोहमयीं प्रमादमदिरामुन्नत्तभूतं जगत् ।।



भव्यदृश्यानि सृज्यन्ते स्म।

२:४५ वादने सति प्रशासकीयवाद्यवादकमण्डलेन करुणस्वरेण चरममभिवादनं प्रणीतम्। २:५० समये सति **'युगदिवाकर अमर रहो'** इति घोषैर्वातावरणं शब्दमयमभवत्। चन्दनचितिका च प्रज्वलिता। हृदयद्रावकमासीत् तद्दृश्यम्। श्रावक-श्राविका नैव, साधवोऽपि तदानीं रुदन्ति स्म। 'महतां सद्गुरूणां शश्वद्वियोगो जातः' इति दुःखं सर्वेषां कण्टकमिव पीडयति स्म।

अग्निसंस्कारपश्चान्नैकघण्टामितसमये व्यतीतेऽपि, बहुरात्रिपर्यन्तमपि भाविकजनास्तत्रतो न गताः। अतिश्रद्धाशीलास्ते भक्तजनाः पूज्यप्रवराणां पवित्रदेहस्य शेवधिसदृश्या रक्षाया ग्रहणार्थं तत्र स्थित्वा तपस्यन्ति स्म। प्रभाते श्रमणा गुरुवराणामन्तिमसमाधिदर्शनार्थं गतास्तदानीं तत्र सर्वेऽपि अवशेषा अदृश्या जाता आसन्। गुरुवरदेहस्य पवित्ररक्षाया अस्तित्वमपि तत्र नाऽवशिष्टम्। एतादृशी आसीत् तेषां भक्तजनानां श्रद्धा, एतादृशी चाऽऽसीत् साऽनुपमाऽन्तिमयात्रा। तस्याः साक्षात्कारं कृत्वा तु नेत्रद्वन्द्वं नयनाम्बुपूर्णं भवेदेव, परं तस्या यथातथं पठनश्रवणेषु क्रियमाणेषु सत्सु नेत्रयुग्मं बाष्पयुतं भवेन्नूनम्। नाऽस्तीयं काऽपि कल्पना, अपि त्वयं मत्स्वानुभवः।

अनुमानतः सार्द्धद्वयलक्षमिता मानवा अस्यामन्तिमयात्रायां समागच्छन्। तस्या अभूतपूर्वाऽन्तिमयात्रायास्तस्या मूलसमप्रभावक-गुरुवराणां चाऽमुया संस्कृतपङ्क्त्या प्रान्ते हृदयाऽञ्जलिं प्रदाय, शिरसा मनसा च प्रणमन्तः प्रस्तुतप्रसङ्ग-प्रसङ्गश्रेण्योर्विराममावहामः - **'महात्मनां मृत्युरपि महोत्सवायते'** इति।

पार्यन्तिके, गुरुवरा आसंस्ते गुणगरिष्ठाः। कल्पनापक्षाभ्यां तज्जीवनप्रसङ्गान् यथातथं प्रापयितुमक्षमा वयमिति वास्तविकता। तथाऽपि कृतः प्रयासः, तद्व्याजाच्च गुरुवरजीवनं स्प्रष्टुं कुतोऽस्ति क्षुद्र आयासः। अस्तु।






नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः,
स्वार्थान् सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान् दुर्मुखान् दूषयन्तः,
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥

# विरलविधाव्यासङ्गः ६

एकदा 'विनोबाभावे' इत्याख्यस्य प्रसिद्धलोकसेवकस्य पार्श्वे कश्चित् पत्रकारस्तस्य पृच्छार्थं ('Interview' इति आङ्ग्लभाषायाम्) आगतः। पत्रकारो विविधप्रश्नान् कर्तुं लग्नः। विनोबाभावेवर्योऽपि तस्य यथार्हमुत्तरं यच्छति स्म। त्रिचतुरेभ्यः प्रश्नेभ्यः पश्चात् पत्रकारेण विलक्षणः प्रश्नः कृतः। स पृष्टवान् – ''मयाऽधुना प्रश्नः क्रियते, पूर्वश्च प्रश्नः कृतस्तन्मध्ये भवान् किं चिन्तितवान्?''

सामान्यतो जना अस्यां परिस्थित्यामभिनवप्रश्नविषये तस्य चोत्तरविषये चिन्तनं कुर्वीरन्। परं, विनोबाभावेवर्येण यदुत्तरं दत्तम्, तत् श्रुत्वा तस्य प्रश्नकारस्याऽन्तःकरणे तं प्रति अत्यादरः समुद्भूतः। विनोबाभावेवर्यः प्रत्युक्तवान्–''मया एषु प्रश्नविहीनरिक्तक्षणेषु पञ्चकृत्वो मत्प्रभोर्नाम गृहीतम्।'' अन्तःकरणे प्रभुप्रीतिः सर्वोत्तमा भवेत्, तदैवैतदुत्तरं दीयेत।

यादृशी प्रभुप्रीतिर्विनोबाभावेवर्यस्याऽऽसीत्, तादृश्येव श्रुतप्रीतिः पूज्ययुगदिवाकरगुरुदेवानां जिनोक्तं श्रुतज्ञानं प्रत्याऽऽसीत्। श्रुतार्जनार्थं गुरुवरैः स्वजीवनेऽतिपरिश्रमपूर्वमध्ययनं कृतम्, यस्य श्रवणमपि अत्याश्चर्यप्रदम्। आगम्यताम्, मानसोद्याने बहुदिनेभ्यः पर्यटनं कुर्वत एकस्य प्रसङ्गस्य माध्यमतस्तेषामुत्तमामध्ययनशीलतां वयं प्रस्तुतीकुर्मः।

* * *

वैक्रमस्य १९९० तमः संवत्सरः।

राजनगर आद्यं श्रमणसम्मेलनं प्रवर्तमानमासीत्।

सम्मेलनार्थं पूज्यागमोद्धारकाचार्यदेवश्रीमत्सागरानन्दसूरीश्वराः पाञ्जरापोलप्रतिश्रये विराजन्ते स्म। पूज्यगुरुवराश्च स्वीयपरमगुरुवरैः पूज्यप्रवचनप्रभावकाचार्यप्रवरश्रीमन्मोहनसूरीश्वरैस्सह जैनमर्चन्टसोसायटीप्रतिश्रये विराजन्ते स्म।







तेषामभ्यासशीलेऽन्तःकरणे तदा पूज्यसागरानन्दसूरीश्वरपार्श्वे वाचनाप्राप्तेर्विचारपुष्पं स्फुटितम्। गुरुवरैरागमोद्धारकगुरुवराणां पार्श्वे वाचनासमयोऽपि निर्णीतः। अतिसान्द्रजलधरान् दृष्ट्वा तस्य सन्मुखाऽऽस्यं व्यादाय स्थितस्य चातकस्य निष्ठेव गुरुवराणामभ्यास-निष्ठाऽऽसीत्।

अतो गुरुवरा अन्वहं स्वकीयगुरूणां भक्तिकार्याणि समाप्य विहृत्य च पाञ्जरापोलमध्ये श्रीसागरानन्दसूरीश्वरेभ्यो वाचनाग्रहणस्योपक्रमं प्रारब्धवन्तः। किञ्च मध्याह्नगोचरीसमयपूर्वं ते पुनः स्वगुरूणां सेवायामुपतिष्ठन्ति स्म। जैनमर्चन्टसोसायटीप्रतिश्रयात् पाञ्जरापोल-स्यान्तरालमपि सार्धक्रोशमितं दीर्घमासीत्। अर्थात् प्रतिपाठार्थं गुरुवरा त्रिक्रोशमितं विहारं कुर्वन्ति स्म। निःसीमघर्मस्य वैशाखमासीयास्ते दिवसाः।

तत्राऽपि पुनरागमनवेलायां सार्धक्रोशमितो विहारो माध्याह्निक-तीव्रपरितापे भवति स्म, अर्थात् परितापः सीमातीतो भवेत्, तथाऽपि नियमबद्धगुरुवराः प्रतिदिनं वाचनाग्रहणाय गच्छन्ति स्म। अत्राऽपि ध्यानाकर्षका गुरुदेवप्रवृत्तिरियं यद् विद्यागुरवः पूज्यप्रवर-श्रीमत्सागरानन्दसूरीश्वराः श्रमणसम्मेलनकार्यवशाद् यदा यदा कार्यव्यस्ताः स्युस्तदा तदा गुरुवरा मौनीभूय स्वस्थानं गृहीत्वा विद्यागुरूणां मुद्रणाधीनागमादिसाहित्यस्य क्षतिसंशोधनं कुर्वन्ति स्म। परं 'अद्याऽहं पाठवञ्चितोऽभूवम्, व्यर्थो मे विहारश्रमः' एतादृशी एकाऽपि खेदाभिव्यक्तिस्तैर्न कृता। किञ्च, वर्षेऽस्मिन् गुरुवरास्तादृशं वैदुष्यं धारयन्ति स्म, येन तस्मिन्नेव वर्षे तैर्नवतत्त्वप्रकरणोपरि नव्या सुमङ्गलाख्या षट्सहस्रश्लोकमिता टीका सृष्टा। एतादृशे वैदुष्ये विलसत्यपि तेषु प्रवर्तमानां पूर्वोक्तविनयशीलतां दृष्ट्वा वयं चिन्तयेम-द्वयोर्मध्ये को गुणो गुरुवराणां प्रशस्यतरः ? अनुपमाऽभ्यासनिष्ठा ? उत अद्‌भुता विनयशीलता ?

संयमजीवनस्य चतुर्दशे वर्षे सञ्जातोऽयं प्रसङ्गः। अस्मिन् विषयेऽहं यदा सर्वेषां जनानां हृदयस्थं सदैव च मधुरहसन्तं गुरुवराणां चित्रपटं प्रति पश्यामस्तस्माच्च निर्दोषप्रेमवृष्टिं कुर्वतो गुरुवरान् नतशीर्षेण पृच्छामि यत्-''महोपकारिगुरुवराः! दीक्षाजीवने चतुर्दशवर्षाणि यावदेकाग्रमनसा भवद्भिरध्ययनं कृतम्, पश्चादपि उक्तविधक्लेशस्य किं प्रयोजनम्? स क्लेशोऽपि परितापदे वैशाखमासे, क्लान्तदेहेऽपि?''

प्रत्युत्तरेऽनुभूयते - गुरुवराः प्रेमकृपानिचिताभ्यां स्वीयशुभ्राक्षिभ्यां हितशिक्षापूर्वं प्रेरयन्ति माम् - ''भोः! एतस्मिन् (अभ्यासविषये) कीदृशः सन्तोषः? कीदृशः क्लेशः? कीदृशी च क्लान्तिः? किं न जानासि त्वं प्रेरणादायिनीं सूक्तिमिमाम्? 'विद्यातुराणां न सुखं न निद्रा।' इति।'' आशास्महे वयं हृदयतः-पूज्यगुरुवराणां हितशिक्षेयं शब्दशोऽस्थि-मज्जावदस्मज्जीवने समवतरेत्।





धनार्थिनां यथा नास्ति,
शीततापादि दुःसहम्।
तथा भवविरक्तानां,
तत्त्वज्ञानार्थिनामपि।।

# ७ तत्त्वज्ञानाय जीवितम्

अस्य प्रसङ्गस्यारम्भे प्राकृतभाषीयः श्लोकः स्मरणपथमवतरति–

'जइवि हु दिवसेण पयं, धरेइ पक्खिण वा सिलोगद्धं ।
उज्जोयं मा मुञ्चसु, जइ इच्छसि सिक्खिउं नाणं ।।'

श्लोकभावार्थोऽयम् – यदि त्वं ज्ञानप्राप्तिमिच्छसि तर्हि दिवसपर्यन्तमुद्यमः क्रियताम्, फलतः केवलं पदमेकं कण्ठस्थं भवेत्। पञ्चदशदिवसपर्यन्तं परिश्रमः क्रियताम्, परिणामतः केवलं श्लोकमेकं चित्तस्थं भवेत्, तथाऽपि परिश्रमो नैव मुच्यताम्।

गुरुवराः प्रस्तुतं श्लोकं जीवनसात्कारका आसन्। ज्ञानप्राप्त्यर्थं स्वानुकूलतात्यागेऽपि तैः कदाऽपि कश्चिदपि विचारो न कृतः। तेषां कृते स्वानुकूलताया अग्रताक्रमो नाऽऽसन्। 'तत्त्वज्ञानाय जीवितमि'ति तेषां मनोगतम्। पूर्वस्मिन् प्रसङ्गे प्रतिकूलतां स्वीकुर्वन्तो गुरुवरा अस्माभिर्विलोकिताः। प्रत्युत वर्तमानलघुप्रसङ्गेऽनूकूलताया निवृत्तमाना गुरुवरा अस्माभिर्विलोकिता भविष्यन्ति।

* * *

प्रस्तुतं वृत्तमपि राजनगरीयम्। २००१ तमं विक्रमवर्षम्। पूज्यपादगुरुवरा नागजीभूधरपोलमध्ये चतुर्मासार्थं स्थिता आसन्। पूज्यवर्याः शासनसम्राटश्रीनेमिसूरीश्वराः पाञ्जरापोलप्रतिश्रये चतुर्मासहेतुना विराजन्ते स्म।







तत्पट्टधरपूज्याचार्यदेवश्रीमद्विजयोदयसूरीश्वराणां पार्श्वे पूज्यगुरुवराः श्रीबृहत्कल्पभाष्याख्यग्रन्थस्य वाचनां ग्रहीतुं काङ्क्षितवन्तः। गुरुवराः स्वयं स्वचतुर्मासक्षेत्रे प्रवचनवाचनाऽऽराधनादिषु व्यापृता आसन्। अतः समयः स्वल्प आसीत्। इतः श्रीविजयोदयसूरीश्वराणामपि नियतसमय एवानुकूल आसीत्। अथ ज्ञानपिपासातृप्त्यर्थं क उपायः? इति व्यामोहो जातः।

अन्ततः पूज्यगुरुवराः पूज्योदयसूरीश्वराणामनुकूलं समयं निर्णीतवन्तः। स समयः प्रदोषकालीन आसीत्। आचतुर्मासमेतत्कृते ते प्रदोषकालीनगोचरीप्रभृतिकार्याणि त्यक्तवन्तः।

गुरुवराणां स्वभावगतं वैशिष्ट्यमासीत् ज्ञानमग्नता। श्रीसङ्घेषु तदानीं ते सक्षमविद्वद्रूपेण प्रतिष्ठिता आसन्। तेषां श्रामण्यमपि पञ्चविंशतिवर्षीयमासीत्, तदा विहितोऽयं वृत्तान्तस्तु अत्र प्रासङ्गिकः प्रस्तुतः। अन्यथा ज्ञानप्राप्त्यै स्वानुकूलतात्यागः प्रतिकूलताऽङ्गीकारस्तु तेषां कृते नाऽऽसीद् बहुमूल्यः, परमासीत् क्रीडातुल्यः।

तत्त्वज्ञानार्जनाय पूर्वलेखोक्त-अत्रोक्तयोर्द्वयोः प्रसङ्गयोर्दृष्टः पूज्यगुरुवर्याणां पुरुषार्थोऽयं नूनं स्मारयति – **'सज्झायसमो नत्थि तवो'** इति शास्त्रवचनम्।



सज्झायेणं भन्ते!

जीवे किं जणयइ?

सज्झायेणं नानावरणिज्जं कम्मं खवेइ।





# ८ गुरुभक्तिमधुमधुव्रताः

''अहो! त्वमधुनाऽपि संस्तारकं न कृतवान्?'' रात्रिर्बह्वी व्यतीता। तथाऽपि गुरुचरणभक्त्यां लीनाः श्रीधर्मसूरीश्वराः (तदानीं मुनिपदस्थिताः) परमगुरुदेवपूज्यपादारविन्दश्रीमोहनसूरीश्वरैः पृष्टाः।

१९८२ तमे वैक्रमवर्षे प्रवृत्तैषा वार्ता।

तस्मिन् वर्षे तलाजानगरे गुरुवराणां चतुर्मासं स्वकीयगुरुपरम्परानिश्रायामासीत्।

पूज्यपादगुरुवराणां च दीक्षाजीवनस्यैष षष्ठः संवत्सरः। तदानीं ते श्रीमहानिशीथसूत्रयोगाराधनायां स्थिता आसन्। तथाऽपि निशायां परमगुरुचरणशुश्रूषाया नित्योपक्रमे ते बद्धानुशया आसन्। अस्यां पदभक्त्यां विशेषताऽप्यासीत्। परमगुरुवरैः 'अथ गच्छ' इत्यनुज्ञा न दीयेत, तावत्पर्यन्तं पदपर्युपासनायां विरामो न कार्य इति प्रतिज्ञायुक्ता सा भक्तिः।

एकदा निशायां गुरुवरैः पदभक्तिः प्रारब्धा। पश्चात् परमगुरुवराः सपदि निद्राधीना जाताः। अतः 'अथ गच्छ' इत्यनुज्ञा न प्राप्ता। समयः सरित्वदवहत्।

घटिकाचतुष्कपर्यन्तं निरन्तरं तैः पदभक्तिः कृता। अत्रान्तरेऽकस्मात् परमगुरुवरा अजागरुः, सहसा च पप्रच्छुः – ''भोः! समयः कतिपयोऽभवत्?''

''एकादशवादनवेला जाता गुरुदेव!'' सहजमुत्तरं प्रदत्तम्।

श्रुत्वेदं परमगुरुवरैः साश्चर्यं प्रागुक्तं पृष्टं यत् – ''अहो! एतावति समये सत्यपि त्वं संस्तारकं न कृतवान?''

गुरुवरा अवदन् – ''न गुरुदेव! अत्रभवतोऽनुज्ञामप्राप्य संस्तारकः कथं भवेत्?''







भक्तिपूर्णं प्रत्युत्तरं श्रुत्वा परमगुरुवराणां निःसीमकृपा गुरुवरेषु वृष्टवती। परमगुरुवरा आशीर्वादसम्भृतहस्तौ गुरुवराणामवनतशीर्षोपरि प्रसारितवन्तः कथितवन्तश्च–''त्वादृशभक्तिवतो शिष्यस्य प्राप्तिरपि दुर्लभा। परं शृणु, अतःपरमेतादृशी प्रतिज्ञा न कर्तव्या। अहं निद्राधीनः स्याम्, तदा सुखेन गन्तव्यं त्वया...''

एतादृश्या गुरुसन्तोषदायिन्या विनयपूर्णगुरुभक्त्या कस्य कार्यस्य सिद्धिर्न भवेत्?

गुरुसन्तोषमाहात्म्यदर्शके कस्मिंश्चित् संस्कृतश्लोके केनचित् चिन्तकेन सत्यमेव लिखितम् – 'नैकेषु जन्मसु कृता यज्ञव्रततपः–क्रियादिसाधनागुरुसन्तोषमात्रतः सफला सिद्धिदा भवती'ति।

पूज्यगुरुवराः स्वजीवने महान्ति शासनप्रभावककार्याणि केन पुण्यबलेन कृतवन्तः? इति कौतुकजनकस्य प्रश्नस्योत्तरं प्रसङ्गमिमं ज्ञात्वा मया लब्धम्।

निःसंशयम्, आश्चर्यप्रदगुरुभक्तेर्विस्मयप्रदप्रभावेन दुःशक्यमपि कार्यं सुशक्यं भवेत्, तस्मिन् कौतुकेनाऽलम्।





त्रैलोक्येऽपि विनीतानां,
दृश्यते सुखमङ्गिनाम् ।
त्रैलोक्येऽप्यविनीतानां,
दृश्यतेऽसुखमङ्गिनाम् ।।

# परमो विनयः १

''भोः! गुरुवराः! पूज्यपन्न्यासश्रीधर्मविजयगणिवरेषु एतादृशी का विशेषता? यतोऽत्रभवन्तस्तेषां सप्रीति ज्ञानदानं कुर्वन्ति?'' जिनशासनस्य अग्रगण्यानामाचार्यप्रवराणां शिष्यास्तेभ्य इदं पृष्टवन्तः।

महामहिमशत्रुञ्जयगिरिराजाङ्के सञ्जातोऽयं प्रसङ्गः–

पादलिप्तपुरस्य धन्यधरा। तत्रस्थ 'माधवलाल'धर्मशालाप्रतिश्रये तेषां विद्वच्छिरोमणि–आचार्यप्रवराणां पार्श्वेऽस्माकं प्रसङ्गनायकाः पूज्यगुरुवराः क्लिष्टतमं सटीकतत्त्वार्थमहाभाष्यमधीयन्ते स्म। कथ्यते विनयो वैरिणोऽपि वशीकर्तुं शक्नोतीति। ततो विद्यागुरूणां का वार्ता? नैसर्गिकविनयशीलाः पूज्यपन्न्यासश्रीधर्मविजयगणिवरास्तेषा–माचार्यप्रवराणां परमप्रीतिपात्रा आसन्। तत आचार्यप्रवरैः श्रीधर्मविजयगणिवराः प्रीत्या सहाऽधीयन्ते स्म। अत उक्तः प्रश्न उद्भूतः शिष्यमनसि।

''सोऽतिविनीतोऽस्ति।''–आचार्यप्रवरा उत्तरं दत्तवन्तः – ''कदाचित् तस्य विनयं दर्शयिष्यामि। तत इमं प्रश्नं कर्तुं मनोऽपि न भविष्यति युष्माकम्।''

पाठसमयो नित्यं द्विवादनतः त्रिवादनं यावदासीत्।

एकदा पाठसमये काचिद् वेला शेषा आसीत्। तदानीमाचार्यवर्या उष्णवस्त्रपरिधानं कृत्वा संस्तारके कामतः सुप्तवन्तः। तदानीमेव साहित्यमन्दिरात् पूज्यपन्न्यासश्रीधर्मविजयगणिवरा आगताः। आसनं विस्तार्य त उपविष्टवन्तः। सुप्तगुरुवरान् दृष्ट्वा स्वपाठपुनरावृत्तौ दत्तचित्ता अभवन्। पूज्याचार्यप्रवराणां च आगमिकपत्रकपरीक्षणादिषु श्रुतभक्ति–







गुरुभक्तिकार्येषु लीना अभवन्। अन्यमुनिभिः सह वार्तालापेन कालक्षेपकारिणी समयदूषणकारिणी वा वृत्तिरपि न। न पाठस्य त्वरा, न कश्चिद् उद्वेगः, न गमनस्य चाञ्चल्यम्।

त्रिवादनवेलायां सत्यां पूज्याचार्यप्रवरा निद्रां त्यक्तवन्त उक्तवन्तश्च – ''अद्य पाठो नास्ति।'' पूज्य पन्न्यासधर्मविजयगणिवरैः शीघ्रं विनीतभावेनोक्तम् – ''भवतु, गुरुदेव!'' तदनु वन्दित्वा सुखशाता–कार्यसेवाश्च पृष्ट्वा ते पूर्ववत् प्रसन्नतापूर्वं गताः।

आश्चर्यभृतनेत्रा आचार्यशिष्याः सार्द्धद्वयघटिकां यावत् पूज्यगुरुवरैः क्रियमाणामिमां विनयपरीक्षां, तस्यां च शुद्धहिरण्यवत् प्रमाणितान् पूज्यपन्न्यासधर्मविजयगणिवरान् निरीक्षन्ते स्म। तेषां मनसि उत्थितः प्रश्न प्रसङ्गेऽस्मिन् निरस्तो जातः।

पूज्यगुरुवराणां विनयपरीक्षकास्ते विद्वांसः पूज्याचार्यवरा आसन्नागमोद्धारकाः श्रीमन्तः सागरानन्दसूरीश्वराः।

गुरुवराणां समर्पणविनयाभ्यां प्रसन्नैरमीभिर्गुरुवरैरेकदा वाचना–मध्येऽपि एवमुक्तम् – ''वाचना तु मत्पार्श्वादद्य यावदनेकैर्गृहीता। किन्तु तेषु श्रीधर्मविजयगणिवरेण गृहीता वाचना नितरामनन्या।''

निसंते सिया अमुहरी, बुद्धाणं अंतिए सया।
अट्ठजुत्ताणि सिक्खिज्जा, निरट्ठाणि उ वज्जए।।

आगमसूत्रश्रीउत्तराध्ययनस्य विनयश्रुताध्ययनस्य श्लोकेऽस्मिन् विद्यार्थिनां चतस्रो हितशिक्षा दत्ताः सन्ति – (१) गुरूणां पुरः प्रसन्नमनसा स्थातव्यम् (२) वाचालता त्यक्तव्या (३) तेषां पार्श्वात् सार्थकवार्ताः पठनीयाः (४) निरर्थकवार्ताश्च परित्यक्तव्या इति।

उक्तं प्रसङ्गं ज्ञात्वाऽनुभूयते – पूज्यगुरुवराणां जीवन इमाश्चतस्रो हितशिक्षाः सर्वदा विद्यमाना आसन्।




विणओ सासणे मूलं,
विणीओ संजओ भवे।
विणयाओ विप्पमुक्कस्स,
कओ धम्मो कओ तवो ?।।